**DHARMASASTRA**

**ACHARYA 2nd YEAR**
**Course/Paper-7**

# माधवाचार्यप्रणीतकालमाधवस्य

*(आदितः ग्रन्थसमाप्तिं यावत्)*

# Mādhavācāryapraṇītakālamādhavasya

***(ādita: granthasamāptiṃ yāvat)***

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमग्रन्थिः(UNIT-I to UNIT-V )

# आमुखम्

कालमाधवनामधेयनिबन्धग्रन्थस्य रचयिता माधवाचार्य्यः दाक्षिणात्य-निबन्धकारेषु प्रमुखं स्थानं भजते।स च भरद्वाजगोत्रीयो बौधायनशाखाध्यायी कृष्ण-यजुर्वेदीयब्राह्मण आसीत् । तस्य पितुर्नाम मायणाचार्य्यः मातुर्नाम च श्रीमती । द्वयोः भ्रात्रोः नाम सायणो भोगनाथश्चेति पराशरमाधवीयाद् ज्ञायते । यथोक्तं तत्र -

श्रीमती जननी यस्य सुकीर्त्तिर्मायिणः पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ।।
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः ।। इति ।।

निखिले दाक्षिणात्ये आदिशङ्कराचार्यानन्तरं माधवाचार्यस्य नाम प्रसिद्धमस्ति। तेन संस्कृतवाङ्मयस्य सर्वासु शाखासु प्रामाणिका ग्रन्था विरचिताः । माधवाचार्यः विद्यारण्यनाम्ना प्रथित आसीत् ।विद्यारण्यनाम्नाभिहितो माधवाचार्यः सन्यासमव-लम्ब्य श्रृङ्गेरी पीठे स्थितः । स माधवाचार्यनाम्ना यथा प्रसिद्धः तथा सन्यासित्वेनापि प्रसिद्धः।माधवाचार्यः प्रचण्डो विद्वान् आसीत् । तस्य प्रभावेण तस्य भ्राता सायणा-चार्यः वैदिकसंहितादिषु ग्रन्थेषु भाष्यं टीकां च विरचितवान् । " कृपालुमाधवाचार्य्यो वेदार्थं वक्तुमुद्यतः " इति वचनात् केचन वदन्ति यत् वस्तुतः वेदभाष्यं न माधवाचार्येण प्रणीतं किन्तु ज्येष्ठे भ्रातरि तस्य भक्त्यतिशयात् तेन सर्वे ग्रन्था माधवीयतया निर्दिष्टाः।सायणो माधवाचार्यस्यानुजस्य नामवद्वंशनामाप्यासीत् ।यतो हि माधवीय-धातुवृत्तौ "यस्य मन्त्री शिखारत्नमस्ति मायणसायणः"इत्यादिना मायणस्य सायण-तयोल्लेखः वंशनामत्वं बोधयति । पुनश्च तत्कृतसर्वदर्शनसंग्रहग्रन्थाद् ज्ञायते यत्-

श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसंग्रहः ।। इति ।।

भोगनाथेनापि रामोल्लासत्रिपुरविजय-उदाहरणमालादिग्रन्थाः विरचिताः । ख्रीष्टीयत्रयोदशशतकादनन्तरं दक्षिणभारते धार्मिकसंप्रदायेषु महान् कलहः समुत्पन्नः। एतस्मिन् समये शङ्कराचार्यः,माधवाचार्यः,रामानुजाचार्यः, लिङ्गायतः, जैनाः इत्येतान् उपजीव्य सांप्रदायिकधार्मिकमतवादेषु सामाजिकं तारतम्यमपि प्रादुरभूत् । सायणा-चार्यस्य वेदभाष्यं, माधवाचार्यस्य पराशरमाधवीयम् ,कालमाधवश्चेति ग्रन्थत्रयं क्षेत्रस्यास्य साम्प्रदायिककलहस्य प्रभावमुररीकृत्य प्रणीतमिति प्रतिभाति । विजय-नगरवासिविद्यारण्यमाधवाचार्यप्रणीतकाल-माधवग्रन्थस्य कारिकातः ज्ञायते यत् विद्यातीर्थः,भारतीतीर्थः,श्रीकण्ठश्चेति नामभिस्तस्य त्रयो गुरव आसन् । माधवा-चार्य्यप्रमुखाः सर्वे भ्रातरः बुक्कस्य, हरिहरस्य, कम्पस्य, सङ्गमस्य च मन्त्रिणः राज-गुरवश्चासन् ।माधवाचार्यः बुक्कस्य बुक्कणस्य वा राज्ञः कुलगुरुः मन्त्री चासीत् । तदनन्तरं स हरिहरस्यापि मन्त्र्यभूत् ।मायणस्तु सङ्गमस्य मन्त्र्यासीत् ।प्रसङ्गेऽस्मिन् स्पष्टतया प्रतिपादितं माधवीयधातुवृत्तौ यत् -

अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः ।
तस्य मन्त्री शिखारत्नमस्ति मायणसायणः ।।इति ।।

पुनश्च माधवाचार्य्येण " सोऽहं प्राप्य विवेकतीर्थपदवी "मित्यादौ कालमाधव-स्योपोद्घातप्रकरणे प्रतिपादनात् तेन विवेकतीर्थ इत्युपाधिर्लब्धः इति ज्ञायते ।

**माधवाचार्य्यस्य कालः-**

विद्यारण्यश्रीचरणेन श्रीमाधवाचार्येण स्वीयकृतिषु भोजराज-वाचस्पतिमिश्र-कालादर्श-तत्त्वप्रकाश-हेमाद्र्यादीनां नाम्नामुद्धरणात् स एतेषां परवर्त्तीति । पुनश्च निर्णयसिन्धु-कालदीप-कालसारादिषु ग्रन्थेषु माधवाचार्यस्य नामोट्टङ्कनात् स एतेषां पूर्ववर्त्तीत्यनुमीयते । अपि च १३४७ तमे ख्रीष्टाब्दे माधवाचार्यो वनवासिराज्ये मारप्पमहाराजस्य मन्त्री आसीत् ।१३५६ ख्रीष्टाब्दे स वाराणसीं प्रति गतः । गुरोस्तु भारतीतीर्थस्यादेशेन विजयनगरं गत्वा प्रायशः १३६८ तमे संवत्सरे स माधवाचार्यः प्रथमवुक्कराज्यस्य प्रधानमन्त्री (महाप्रधानः) अभवत् । १३८० ख्रीष्टाब्दे स जगद्गुरुसंज्ञया संज्ञितोऽभूत् । १३८४ तमे ख्रीष्टाब्दे तस्य शिक्षया द्वितीयो हरिहरः महाराजोऽनुप्राणीतः ।१३८६ तमे ख्रीष्टाब्दे स हाम्पीनगरे दिवं जगामेति इतिहासकाराः प्रतिपादयन्ति । अतस्तस्य कालः १३३०-१३८५७ख्रीष्टाब्दमध्ये भवेदिति धर्मशास्त्रेतिहासकाराणामभिप्रायः ।

**माधवाचार्य्यस्य कृतयः -**

सकलशास्त्रावगाहिमाधवाचार्येण संस्कृतसाहित्यस्य विभिन्नासु शाखासु विभिन्ना ग्रन्था विरचिताः । अनेन माधवाचार्येण पराशरमाधवीयं, कालमाधवः, जीवन्मुक्ति-विवेकः,पञ्चदशी, जैमिनीयन्यायमालाविस्तरः,वैयासिकन्यायमाल-विस्तरः, सर्वदर्शन- संग्रहः,पुराणसारः ,अनुभूतिप्रकाशश्चेति विशिष्टा ग्रन्था विरचिताः । माधवाचार्यो यदा संन्यासी संजातस्तस्यामवस्थायां स जीवन्मुक्तिविवेकं पञ्चदशीञ्च प्रणीतवान् । प्रसङ्गेऽस्मिन् जैमिनीयन्यायमालायां तेनैव प्रतिपादितं यत् -

निर्माय माधवाचार्य्यो विद्वदानन्ददायिनीम् ।
जैमिनीयन्यायमालां व्याचष्टे बालबुद्धये ।।
श्रुतिस्मृतिसदाचारपालको माधवो बुधः ।
स्मार्त्तं व्याख्याय सर्वार्थं द्विजार्थं श्रौतमुद्यतः ।।इति ।।

मीमांसाशास्त्रस्यावबोधनार्थं श्लोकसहस्रद्वितयेन जैमिनीयन्यायमाला विस्तरो माधवाचार्य्येण विरचितः । अत्र विचार्य्यविषया विषय-संशय-पूर्वपक्षो-त्तरपक्षैश्चतुर्भिः क्रमवृत्तिभिः प्रायशः श्लोकद्वयेनैव प्रतिपादिताः । तत्रापि प्रथमश्लोके विषयस्य संशयमुत्थाप्य तत्र हेतूपन्यासपूर्वकं पूर्वपक्ष उपस्थापितः । ततश्च श्लोका-न्तरेणोत्तरपक्षः सिद्धान्तरूपेणोपस्थापितः । एतेषां श्लोकानां वृत्तिरपि स्वयं माधवा-चार्य्येण विहिता या विस्तरशब्देन प्रख्याप्यते ।

ग्रन्थेऽस्मिन् द्वादशाध्यायाः सन्ति ।प्रत्यध्यायञ्च चत्वारःपादाः,प्रति पादञ्च

कानिचिदधिकरणानि सन्ति ।ग्रन्थस्यास्य मुद्रणं यूरोपदेशे कलिकतानगरे , आनन्दाश्रममुद्रणालये च सञ्जातम् ।पराशरेण मुनिना या स्मृतिर्विरचिता ,तस्याः स्मृतेरुपरि माधवाचार्य्येण एकं भाष्यं विरचितं यत्खलु पराशरमाधवीयसंज्ञया व्यवह्रीयते ।पराशरस्मृतेरुपरि भाष्यमिदं सर्वप्रथममिति ,ऐतिहासिका वदन्ति ।

माधवाचार्य्यप्रणीतकालमाधवे पञ्च प्रकरणानि सन्ति । उपोद्घातप्रकरणं, वत्सरप्रकरणं,प्रतिपत्प्रकरणं ,द्वितीयादितिथिप्रकरणं ,प्रकीर्णप्रकरणञ्च ।तत्रोपोद्घातप्रकरणे कालस्य स्वरूपं ,कालसत्ताविचारः,सांख्योक्तपञ्चविंशतितत्त्वेषु कालस्य तत्त्वत्वेनाऽसंगृहीतत्वेन तस्याभावं प्रतिपादयतः पूर्वपक्षस्य मतखण्डनपुरःसरं शैवागमग्रन्थे प्रतिपादितेषु षट्त्रिंशत्तत्त्वेषु कालस्य संग्रहः तेन सप्रमाणं कृतः । वत्सरप्रकरणे संवत्सरायनऋतुमासपक्षादीनां स्वरूपोपयोगौ निरूपितौ ।मलमासस्य स्वरूपविचारेण सह तत्र वर्ज्यावर्ज्यविचारोऽपि प्रतिपादितः।प्रतिपत्प्रकरणे तिथिशब्दस्यार्थः तस्य भेदाः युग्मवचनद्वारा तस्य पूर्वविद्धत्वोत्तरविद्धत्वनिर्णयः,नक्तैकभक्तायाचितव्रतानां स्वरूपं,एकोद्दिष्टपा-र्वणश्राद्धविधेर्विचारः,दानव्रतादीनां निर्णयश्च प्रतिपादितः।ततो द्वितीयादिप्रकरणे द्वितीयामारभ्य पञ्चदश्यन्ततिथीनां निर्णयः नानामुनीनां वचनो-त्थापनपुरःसरं कृतः । तत्र सामान्येन विभिन्नासु तिथिषु विभिन्नानां व्रतानामनुष्ठानं विधाय विशेषेण जन्माष्टमी-जयन्तीव्रतयोः भेदोऽस्ति न वेति विचारपूर्वकं तत्र ग्राह्या तिथिर्निरूपिता ।तद्वत् एकादश्या नित्यत्वं काम्यत्वञ्च प्रतिपाद्य स्मार्त्तवैष्णवभेदेन एकादश्युपवासः निरूपितः ।शिवरात्रिशब्दस्य निरुक्तिं प्रदर्श्य तस्य यौगिकत्वं रूढत्वं, लाक्षणिकत्वञ्च निरस्य योगरूढत्वं प्रतिपाद्य तत्र ग्राह्यातिथिर्निरूपिता।तदनन्तरं प्रकीर्णप्रकरणे इष्टिकालं निर्णीय,संक्रान्तीनां स्वरूपं तत्र पुण्यकालञ्च प्रतिपाद्य, सूर्य्यग्रहण-चन्द्रग्रहणयोः कालं तत्र भोजनवर्जन-स्नान-श्राद्ध-दानादीनां निर्णयः कृतः ।एवं प्रकारेण माधवाचार्य्येण कालमाधवे विषयाणां विवेचनं कृतं दृश्यते ।

**ग्रन्थस्योद्देश्यम् -**

माधवाचार्य्यात्प्राक् यद्यपि कालविषये हेमाद्रिप्रभृतिभिः निबन्धग्रन्था विरचिताः तथापि ,कालमाधवग्रन्थस्य विशिष्टं प्रयोजनं विद्यते।माधवाचार्य्येण परा-शरस्मृतेर्व्याख्यानावसरे मानवानां हितं धर्मं इतिवचनानुसारेण मनुष्याणां हिताय धर्माः कर्त्तव्यत्वेनोपदिष्टाः । तेषाञ्च धर्माणामनुष्ठानार्थं कालविशेषस्य विवक्षायां सत्यां नियतकर्मणः कृते नियतकालः शास्त्रकारैर्विहितः। निर्दिष्टे काले विहितस्य कर्मणोऽन-नुष्ठानात्कर्माणि फलवन्ति न भवन्तीति हेतोःकालस्य महत्त्वं धर्मशास्त्रे सुतरां विद्यते ।

कालस्य स्वरूपप्रतिपादनपूर्वकं,तस्य तत्त्वत्वेन स्वीकारे युक्त्युप- स्थापनपुरःसरं सांख्यशास्त्रगतपञ्चविंशतितत्त्वेषु संग्रहाभावेऽपि शैवागमोक्तषट्त्रिंशत्- तत्त्वेषु तस्यान्तर्भावं प्रदर्श्य कालस्य लक्षणप्रामाण्यप्रयोजनादिप्रदर्शनपूर्वकं स्थापनं कृत्वा , 'कलयति जगदेष कालोऽतः','कालोऽपि कल्यते येन 'इति कालस्य द्विविध-व्युत्पत्त्यनुसारेण नित्यकाल-जन्यकालत्वेन कालस्य द्वैविध्येऽपि संवत्सराऽयनर्तु- मास-

पक्ष-दिवसभेदेन तस्य षोढा भेदः शास्त्रकारैः प्रत्यपादि ।तत्र सौर-सावन- चान्द्र-बार्हस्पत्य-नाक्षत्रभेदेन प्रत्येकसंवत्सरस्य कर्मविशेषे उपयोगं प्रदर्श्य,उत्तरा- यण-दक्षिणायनयोः,षण्णामृतूनां,सौर-सावन-चान्द्र-नाक्षत्रभेदेन चतुर्णां मासाना-मुपयोगोऽपि विवेचितः । तदनु पक्षयोरुपयोगं प्रतिपाद्य दिवसेषु सौर-सावनयो-रसन्देहात् नाक्षत्रस्य धर्मशास्त्रेऽनुपयोगाच्च चान्द्रदिवसस्य, अर्थात् तिथेः स्वरूप-भेद-पूज्यतो-पयोगादिविचारः विस्तरेण कृतः । तेषां कालावयवानां समेषां कर्माङ्गत्वं विद्यत इति । यतो हि कर्म अङ्गि ,कालोऽङ्गमिति हेतोः काल-कर्मणो- र्मध्येऽङ्गाङ्गिभावः धर्मशास्त्रे कल्पितः ।कर्मोद्देश्येन कालस्य विधानात् कर्मणः प्राधान्ये कालस्य गुणत्वमवशिष्यते । एवं प्रकारेण कालस्य कर्माङ्गत्वप्रतिपादनमेव ग्रन्थस्या- स्योद्देश्यम् ।यद्यपि कालस्य स्वरूपं ज्योतिःशास्त्रे प्रतिपादितं तथापि तस्य कर्मणा सह सम्बन्धः धर्मशास्त्रेषु प्रतिपाद्यते । कालविषये हेमाद्रिप्रभृतिभिः निबन्धकारैः यद्यपि बहुविचार उपस्थापितः तथापि नानाग्रन्थेषु विप्रकीर्णत्वेन समुपस्थापितस्य एकत्र समावेशः कर्त्तव्य इति दृष्ट्या ग्रन्थोऽयं माधवाचार्य्येण विरचितः । एतदेव ग्रन्थस्यास्य नवीनमुद्देश्यं प्रयोजनञ्चेति विद्वद्भिः प्रत्येतव्यम् ।

# (प्रथमखण्डः )

संरचना

I.1.प्रस्तावना
I.2. उद्देश्यम्
I.3. कालतत्त्वम्
I.4. सांख्योक्तपञ्चविंशतितत्त्वानि
I.5. कालस्याभाववादिनां मतोपस्थापनं तन्निरसनञ्च
I.6. विरोधाधिकरणन्यायः
I.7. नित्यकालस्य स्वरूपम्
I.8. जन्यकालस्य स्वरूपम्
I.9. कालावयवेषु संवत्सरस्य प्राधान्यम्

## I.1.प्रस्तावना

भारतीयधर्मशास्त्रं सुविशालं भवति । तत्र प्रतिपादितेषु नानाविषयेषु आचार-व्यवहार-प्रायश्चित्तादिविषयाः प्रमुखा भवन्ति। तेषु आचारभागे विचारितेषु नानाविषयेषु कालविषयोऽन्यतमः ।कालमधिकृत्य मन्वादिभिः स्मृतिकारैः गौतमादिभिः सूत्रकारैः चर्च्चाः कृताः बहुभिः निबन्धकारैश्च बहवो ग्रन्था विनिर्मिताः । तत्र कालविषयकनिबन्धग्रन्थेषु माधवाचार्यप्रणीतः कालमाधवो विशिष्टं स्थानं भजते ।

माधवाचार्यः कालमाधवग्रन्थस्यादौ विघ्नविघातय मङ्गलाचरणं विधाय तदनन्तरं तद्ग्रन्थस्य समग्रप्रतिपाद्यविषयस्य निर्णयः श्लोकैरेव संक्षेपेण प्रतिपादितः यः कालमाधव- कारिकेति शब्देन व्यपदिश्यते । ततश्च त एव विषयाः पुनरपि गद्येन मीमांसाशैल्या नानावचोयुक्तिभिः वेदधर्मशास्त्र-पुराणागमज्योतिःशास्त्रादिवचनैः लौकिकन्यायैश्च संपुटी- कृत्य विवृताः। तत्र विद्यमानेषु पञ्चप्रकरणेषु प्रथमं तावदुपोद्घातप्रकरणे माधवाचार्य्येण सांख्योक्तपञ्चविंशतितत्त्वानि समुपस्थाप्य तत्र कालस्यानुपलम्भात्कालो नास्तीति पूर्वपक्ष- रूपेणोपस्थाप्य नानायुक्तिभिः तत् खण्डयित्वा कालस्य लक्षणं प्रयोजनं भेदांश्च प्रतिपाद्य शैवागमोक्तषट्त्रिंशत्तत्त्वेषु कालस्यान्तर्भावं विधाय ,वैशेषिकाणां मते कालस्य नित्यत्वं निरवयवत्वञ्च निरस्य वेदवादिनां मतानुसारेण तस्यानित्यत्वं सावयवत्वञ्च प्रतिपादितम् । तस्मिन् प्रसङ्गे तेन जैमिनीय न्यायमालाविस्तरोक्तं विरोधाधिकरणन्यायमुदाहृत्य स्मृते- रपेक्षया श्रुतेः प्राबल्यं प्रतिपादितम् । ततश्च कालावयवेषु संवत्सरस्य प्राधान्यं प्रतिपाद्य सांख्योक्ततत्त्वेषु कालस्यासंगृहीतत्वेऽपि शैवागमोक्तषटत्रिंशत्तत्त्वेषु कालस्य

सद्भावमाकलय्य कालस्यास्तित्वं न केवलं स्वीकृतम् अपि तु कालः एकं तत्त्वं तस्य चार्थिकः संग्रहः कृत इति प्रतिपादितम् ।

## I.2.उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- कालतत्त्वं विवेचयितुमर्हन्ति ।
- सांख्योक्तपञ्चविंशतितत्त्वानि प्रतिपादयितुम् अर्हन्ति ।
- कालस्याभावविषये पूर्वपक्षस्य मतानि विवेचयितुं शक्नुवन्ति ।
- विरोधाधिकरणन्यायस्य प्रासङ्गिकतामालोचयिष्यन्ति ।
- नित्यकालस्य स्वरूपं प्रतिपादयिष्यन्ति ।
- जन्यकालस्य स्वरूपं प्रतिपादयिष्यन्ति ।
- उभयविधकालस्य प्रयोजनं निरूपयिष्यन्ति ।
- कालावयवेषु संवत्सरस्य प्राधान्यं प्रतिपादयितुं शक्नुवन्ति ।

## I.3.कालतत्त्वम्

कालमाधवे माधवाचार्य्येण कालतत्त्वमुपस्थापयितुं प्रथमं पूर्वपक्षमुखेन कालः तत्त्वं न , कालस्यास्तित्वमेव नास्ति , कालविषये न कोऽपि विचारः करणीयः इत्यादिनाना प्रश्नाः कालस्याभावविषये उपस्थापिताः। यतो हि कालः गगनकुसुममिव एकमप्रसिद्धं वस्तु यस्य सत्तैव जगति नास्ति । यदि नाम काल एकं तत्त्वमभविष्यत् , तर्हि कपिलः सांख्यसूत्रे सर्वेषां पञ्चविंशतितत्त्वानां विचारप्रसङ्गे कालस्यापि विचारमकरिष्यत् ,परन्तु तथा न दृश्यते । नापि मुनिना षड्विंशतितमं तत्त्वं स्वीकृतं न वा स्वीकृतेषु पञ्चविंशतितत्त्वेषु कस्मिन्नेकस्मिन्नपि तत्त्वे कालस्यान्तर्भावः कर्तुं शक्यते ; यतः पञ्चविंशतितत्त्वानां प्रत्येकलक्षणात् कालस्य लक्षणं भिन्नं भवति ।वैशेषिकैस्तावत् कालस्येत्थं लक्षणं कृतं यत् –अतीतानागतादिव्यवहारस्याधारण– हेतुः काल इति । एतल्लक्षणं प्रकृत्यादिपुरुषान्तेषु पञ्चविंशतितत्त्वेषु नैव समन्वेतुं शक्यते । अतः कालः एकं तत्त्वं नेति पूर्वपक्षः । पुनश्च सांख्यशास्त्रे प्रकृतिपुरुषोपयोगिविचारस्य प्रयोजनात् कालस्य प्रासङ्गिकतैव नास्ति । यद्यपि सांख्यकारिकायां ईश्वरकृष्णेन अन्तःकरण– बहिः– करणविचारदशायां " साम्प्रतं कालं बाह्यं त्रिकालाभ्यन्तरं करणमिति "कालशब्दस्य प्रयोगः कृतस्तथापि तत् "परप्रसिद्ध्या परो बौधनीय " इति न्यायेन ,न तु स्वसिद्धान्ताभिप्रायेणेति स्पष्टतया माधवाचार्य्येण प्रतिपादितम् । तदनन्तरं वाचस्पतिमिश्रेण सांख्यकारिकाटीकायां तत्त्वकौमुद्यामुक्तं यत् कालस्तु वैशेषिकाभिमतः एकः अतीतानागतादिभेदभावं प्रवर्त्तयितुमर्हति । अतः कालतत्त्वस्वीकारं विना

पदार्थप्रत्ययवत् भूतादिशब्देषु कालप्रत्ययं कृत्वा भूतकालः वर्त्तमानकालः भविष्यकालः इति व्यवहारः क्रियतां किमर्थं कालतत्त्वस्वीकार इति पूर्वपक्षस्या- भिप्रायः । एवं प्रकारेण कालस्य तत्त्वरूपेण स्वीकर्त्तुमनिच्छतां षण्णां कालस्याभाववादिनां पूर्वपक्षाणां मतान्युपन्यस्य प्रत्येकशः खण्डनमपि माधवाचार्य्येण कृतम् । तेन कालस्य लक्षणं, प्रामाण्यमुपयोगश्च विभिन्नेभ्यः शास्त्रेभ्यः संगृह्य प्रत्यपादि । अन्ते च शैवागमोक्तषट्त्रिंशत्तत्त्वेषु कालोऽन्यतमं तत्त्वमिति प्रतिपाद्य माधवाचार्य्येण कालः स्थापितः तत्त्वत्वेनाभ्युपगतश्चेति ।

स्वानुशीलनप्रश्नाः

१.माधवाचर्यः कुत्रत्यः ?

-----------------

२.कालमाधवः केन विरचितः ?

------------------

३.कालमाधवे कति प्रकरणानि सन्ति ?

-----------------

## I.4.सांख्योक्तपञ्चविंशतितत्त्वानि

कपिलमुनिना सांख्यसूत्रे पञ्चविंशतितत्त्वानि स्वीकृतानि । तानि यथा-

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडकश्च विकारः न प्रकृतिर्न विकृतिः पुरुषः ।। इति ।।

अर्थात् मूलभूता प्रकृतिः विकाररहिता एकं तत्त्वम् । महदहंकारः पञ्चतन्मात्राणि चेति मिलित्वा सप्त प्रकृतिविकृतितत्त्वानि , पञ्चमहाभूतानि पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चेति मिलित्वा षोडशविकृतितत्त्वानि ,न प्रकृतिः न विकृतिः पुरुष इति एकं तत्त्वमिति आहत्य पञ्चविंशतितत्त्वानि सांख्यशास्त्रे कपिलेन प्रतिपादितानि । तत्र सत्वरजस्तमोगुणानां साम्यावस्था मूलप्रकृतिरित्युच्यते ,या कस्मान्न सृष्टा अपि तु अन्यान् सृजति । महत्तत्त्वं नाम बुद्धिरध्यवसायहेतुर्वा । महतः प्रकृतेः सृष्टत्वात् विकृतित्वं महतोऽपेक्षयाऽहंकारस्य सृष्टत्वाच्च तस्य प्रकृतित्वमिति हेतोः महतः प्रकृतिविकृतित्वं सिद्धम् ।अभिमानहेतुरहंकारः । तस्य महतः सृष्टत्वात्तस्य विकृतित्वं ,ततश्च पञ्चतन्मात्राणां सृष्टत्वात् तस्य प्रकृतित्वमिति हेतोरहंकारस्यापि प्रकृतिविकृतित्वं सिद्धम् । एवमहंकारात् पञ्चतन्मात्राणां सृष्टत्वात् तेषां विकृतित्वं ,तेभ्यश्च पञ्चमहाभूतादीनां सृष्टत्वात् तेषां विकृतित्वञ्चेति हेतोः पञ्चतन्मात्राणामर्थात् शब्द-स्पर्श-रूप-रस-गन्धानामपि प्रकृतिविकृतित्वमेव। क्षितिः,आपः,तेजः, मरुत्,व्योम,एतानि पञ्च महाभूतानि ,चक्षुः,नासिका,कर्णः,जिह्वा,त्वगिति पञ्चज्ञानेन्द्रियाणि,वाक्, पाणिः, पादः, पायुः, उपस्थश्चेति पञ्च कर्मेन्द्रियाणि प्रसिद्धानि भवन्ति । एतानि पञ्चतन्मात्रेभ्यः सृष्टानि तेभ्यश्च न किमपि तत्त्वं सृष्टमिति हेतोः तेषां

केवलं विकृतित्वमेव ।तदननन्तरं न प्रकृतिः न विकृतिः पुरुषोऽन्तिमं तत्त्वं भवति । पुरुषतत्त्वं न कस्मात् सृष्टं न वा किमपि सृजतीति हेतोः तस्य न प्रकृतित्वं न वा विकृतित्वमिर्ति ।एतानि सर्वाणि तत्त्वानि मिलित्वा पञ्चविंशतिसंख्यकानि भवन्ति ।

## I.5.कालस्याभाववादिनां मतोपस्थापनं तन्निरसनञ्च

सांख्योक्तपञ्चविंशतितत्त्वेषु कालस्यानन्तर्भावात् कालो नास्ति , स च तत्त्वत्वेनोपन्यस्तुं न सम्भवतीति पूर्वपक्षरूपेण यत्प्रतिपादितं तत्तेनैव माधवाचार्य्येण स्वयमेव सप्रमाणं निरस्तम् । तत्र के तावत् कालस्याऽभाववादिन इति जिज्ञासायां माधवाचार्य्येण षट् पक्षा उपन्यस्ताः । ते यथा –

१) किं कपिलमहामुनिना निराकृतत्वात्
२) किं वा सांख्यशास्त्रप्रणीतेषु तत्त्वेष्वसंगृहीतत्वात्
३) उत लक्षणाभावात्
४) अहोस्वित् प्रमाणाभावात्
५) अथवा प्रयोजनाभावात्
६) अथवा तत्त्वगतपञ्चविंशतिसंख्याऽभ्यासपाटवेनावसितश्रद्धाजाड्यात् ।

एतेषु षट्सु पक्षेषु प्रथमपक्षस्तावन्न समीचीनः । यतो हि कपिलेन प्रणीतं कालनिराकरणसूत्रं क्वापि नोपलभ्यते । एतेन प्रथमपक्षः खण्डितः ।तद्वत् द्वितीयपक्षोऽपि न समीचीनः ।यतो हि ज्योतिष्टोम–धनुर्वेदाऽऽयुर्वेद–गान्धर्ववेद–सङ्गीत–स्वर–शस्त्रादि–शास्त्राणां कपिलेन सांक्योक्तपञ्चविंशतितत्त्वेष्व–संगृहीतत्वेन तेषां तत्त्वत्वेन पृथग्विचार–दर्शनात् कालस्योपरि आक्षेपः न केवलमसमीचीनः अपि तु अतिव्याप्तिदोषग्रस्त एव । एतावता द्वितीयपक्षोऽपि खण्डितः ।

ततः कालस्य लक्षणाभावरूपो यस्तृतीयपक्षः सोऽपि न समीचीनः ।यतो हि सर्वत्र वैशेषिकग्रन्थेषु कालप्रकरणे“अतीतानागतादिव्यवहारस्याऽसाधारणहेतुः काल” इति तस्य लक्षणं प्रतिपादितम् ।एतेन तृतीयपक्षोऽपि खण्डितः । तदनन्तरं कालस्य प्रमाणा–भावरूपो यश्चतुर्थपक्षः सोऽपि न समीचीनः । यतः कालस्य साधकभूतानामनुमाना–दिप्रमाणानां विचारो वैशेषिकदर्शनग्रन्थेषु दृश्यते । कालस्य साधकरूपेण स्मृतिः प्रत्यक्षम्, ऐतिह्यमनुमानश्चेति चत्वारि समुपन्यस्तानि । प्रसङ्गेऽस्मिन् तैत्तिरीया वदन्ति यत्–

स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
एतैरादित्यमण्डलं सर्वैरेव विधास्यते ।।इति ।।

अत्र स्मृतिपदेन मन्वादिस्मृतिशास्त्रं,प्रत्यक्षशब्देन वेदः साक्षिप्रत्यक्षं वा,ऐतिह्य–शब्देन इतिहास–पुराण–ज्योतिःशास्त्राादिकं ,अनुमानशब्देन च शिष्टाचार एव गृह्यते ।

पुनश्च धर्मशास्त्रे “कालं कालविभक्तिश्चेति ” मनुना ,“श्राद्धकालाः प्रकीर्त्तिताः” इति याज्ञवल्क्येन च कालविषये प्रमाणं प्रदर्शितम् । वेदेषु च “कृतं यत् स्वप्ने विचिनोति काले ”,“अहमेव कालो नाहं कालस्य ”,“ का च सन्ध्या कश्च सन्धाकाल ” इत्यादिना कालविषयेऽपि प्रमाणमुपलभ्यते ।एतदतिरिक्तं योगशास्त्रेऽपि धारणाध्यानसमाधिद्वारा योगिनोऽतीतादिकालं प्रत्यक्षतः पश्यन्तीति प्रतिपादितम् । लोकेऽपि अहमस्मिन् काले निवसामीति साक्षिप्रमाणमपि समुपलभ्यते । एतावता कालस्य प्रमाणाभावरूपः चतुर्थपक्षः खण्डितः । तदनन्तरं कालस्य प्रयोजनाभावरूपः पञ्चमपक्षोऽपि न समीचीनः यतो हि नित्यकाल-जन्यकालभेदेन द्विविधस्यापि कालस्य प्रयोजनीयता शास्त्रसिद्धा ।तत्र नित्य- कालस्यानादेरनन्तस्य परमपुरुषस्य भगवतः सर्वत्र कर्मारम्भेषु अनुस्मरणरूपं प्रयोजनं विद्यत इति शिष्टैः स्वीकृतत्वात् नित्यकालस्य प्रयोजनीयता विद्यते । यथोक्तं कालमाधवे-

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।इति ।।

जन्यकालस्य च कर्मणोऽङ्गत्वेनान्वयात् कर्मानुष्ठानार्थमेव कालस्य प्रयोजनीय-त्वात् काल-कर्मणोर्मध्ये चाङ्गाङ्गिभावदर्शनात् कर्मणश्च प्राधान्यात् कालस्तस्याङ्गरूपेण चान्वीयत इति हेतोः जन्यकालस्यापि प्रयोजनीयता विद्यते । एतावता कालस्य प्रयोजनाभावरूपः पञ्चमपक्षोऽपि खण्डितः । ततः श्रद्धाजाड्यकृतरूपः षष्ठपक्षोऽव-शिष्यते । पूर्वपक्षोत्थापितेषु पञ्चसु पक्षेषु खण्डितेषु श्रद्धया जडतामापन्नस्य पक्षस्या-त्यन्तदुर्बलत्वात् पञ्चविंशतिसंख्यापेक्षयाऽधिकसंख्याविशिष्टतत्त्वानां शैवागमदर्शनेषु समुपलम्भात् ,तत्र च कालस्य तत्त्वत्वेन स्वीकृतत्वाच्च स पक्षः स्वयमेव खण्डितः इति माधवाचार्यस्याभिप्रायः । सांख्योक्तपञ्चविंशतितत्त्वैः सह शिव-शक्ति-सदाशिवेश्वराऽ-विद्याख्यानि पञ्चशुद्धतत्त्वानि ततश्च मायातत्त्वं मायातः सृष्टानि काल-नियति-कला-विद्या-रागनामकानि पुनः पञ्च तत्त्वानि मिलित्वा भोजराजेन शैवागमाद् गृहीत्वा षट्त्रिंशत् तत्त्वानि प्रतिपादितानि येषु कालोऽन्यतमतत्त्वरूपेण स्वीकृतः । एतेन कालस्याभाववादिनां सर्वे एव पक्षाः निरस्ताः । तस्मात् कालोऽस्ति तत् तत्त्वं च विचारणीयमिति सिद्धान्तः ।

स्वानुशीलनप्रश्नाः

१.कालस्याभाववादिनां के पक्षाः ?

----------------

२.कालस्य कानि प्रमाणानि ?

----------------

३.कालस्य किं प्रयोजनम् ?

----------------

४.सांख्यशास्त्रे कालः स्वीकृतो न वा ?

----------------

५.सांख्यशास्त्रे कति तत्त्वनि स्वीकृतानि ?

## I.6.विरोधाधिकरणन्यायः

धर्मे श्रुतिः मुख्यभूतं प्रमाणं स्मृतिश्च तदनुमापकतयेति धर्मशास्त्रकारैः प्रतिपादितम् ।परन्तु श्रुतिस्मृतिप्रमाणयोर्मध्ये परस्परं विरोधे श्रुतेः प्राबल्यं स्मृतेश्च दौर्बल्यं स्वीक्रियते । तस्मात् श्रुत्युक्तं गृह्यते स्मृत्युक्तं परित्यज्यते इति भावः । कालविषये श्रुतौ यत्प्रमाणमुपलभ्यते वैशेषिकादिस्मृतौ तद्विरोधेन किमपि श्रूयते । स्मर्यत इति व्युत्पत्त्या सर्वेषां शास्त्राणां स्मृतिरिति संज्ञा यौगिकी । धर्मशास्त्रे तु स्मृतिशब्दः पारिभाषिकः । वेशेषिकस्मृति- मतानुसारेण कालो नित्यः निरवयवश्चेति प्रतिपादितम् । श्रुतौ तु कालावयवानां सृष्टिविषये प्रमाणोपलम्भात् तेषु ऋतुप्रभृतीनां ध्यातव्यवेशविषये च वर्णनादर्शनात् कालोऽनित्यः सावयव- श्चेति प्रतिपादितम् ।एतेन एकस्यापि कालस्य नित्यत्वाऽनित्यत्वयोः निरवयवत्वसावयवत्वयोश्च परस्परं विरोधदर्शनादत्र विरोधाधिकरणन्यायः माधवाचार्य्येणावतारितः ।तस्य च संग्राहकाविमौ श्लोकौ तद्रचितजैमिनीयन्यायमालाविस्तरे प्रथमाध्याये तृतीयपादे द्वितीयाधिकरणे विद्यते।

तद्यथा- औदुम्बरी वेष्टितव्या सर्वेत्येषा स्मृतिर्मितिः ।
अमितिर्वेति सन्देहे मितिः स्यादष्टकादिवत् ।।
औदुम्बरीं स्पृशन् गायेदिति प्रत्यक्षवेदतः ।
विरोधान्मूलवेदस्या ऽ ननुमानादमानता ।।इति ।।

अत्रायमभिप्रायो यत्सोमयागस्योत्तरवेद्यां विद्यमानस्य सदोनामकस्य मण्डपस्य मध्ये काचिदुदुम्बरशाखा स्तम्भत्वेन निखाता भवति । तां शाखामुद्दिश्य "औदुम्बरी सर्वा वेष्टि- तव्येति " स्मृतिवचनेन सर्ववेष्टनं स्मर्यते । तत्र संशयो भवति यत् एषा स्मृतिः प्रमाणं न वेति । ततः पूर्वाधिकरणे अष्टकाकर्त्तव्येति स्मृतिवचनस्य वेदानुमापकत्वेन प्रामाण्यं प्रतिपादितम् । अतः तेन न्यायेन सर्ववेष्टनस्मृतिरपि प्रमाणं भवत्विति पूर्वपक्षः । किन्तु "औदुम्बरीं स्पृशन् गायेदिति" प्रत्यक्षवेदप्रमाणात् तस्याः औदुम्बर्य्याः शाखायाः स्पर्शो विधीयते । सर्ववेष्टने च सति नैतच्चोप- पद्यते । अतः सर्ववेष्टनरूपवेदानुमापकस्मृति-प्रमाणापेक्षया प्रत्यक्षवेदस्य विरोधात् निर्मूला सर्व- वेष्टनस्मृतिरप्रमाणमिति सिद्धान्तः । एतेन स्मृत्यपेक्षया श्रुतेः प्राबल्यनिरूपणात्कालस्य नित्यत्व- निरवयवत्ववादिपक्षं निरस्य ,अनित्यत्व-सावयवत्ववादिपक्षः स्वीकृतः । एतावता कालोऽनित्यः सावयवश्चेति प्रतिपादितम् । इदमेव विरोधाधिकरणन्यायस्य तात्पर्य्यम् ।

स्वानुशीलनप्रश्नाः

१.श्रुतिस्मृत्योर्मध्ये कस्याः प्राबल्यम् ?

----------------

२.विरोधाधिकरणन्यायः कुतः संगृहीतः ?

-----------------

३.वैशेषिकाणां मते कालो नित्योऽनित्यो वा ?

----------------

## I.7.नित्यकालस्य स्वरूपम्

कालो द्विविधः नित्यो जन्यश्चेति । नित्यकालः कालकालः महाकालः उत्पत्ति- स्थितिविनाशकारिरूपेण प्रदर्शितः । कालोऽपि कल्यते येनेति व्युत्पत्त्या कालकालाऽ- परपर्य्यायरूपस्य नित्यकालस्य स्वरूपं वासिष्ठरामायणे प्रतिपादितम् । यथोक्तं तत्र -

स विश्वकृद्विश्वविदात्मयोनि-
ज्ञः कालकालो गुणी सर्वविद्यः ।
प्रधानं क्षेत्रज्ञपतिर्गुणेशः
संसार-मोक्ष-स्थिति-बन्धहेतुः ।। इति ।।

स च नित्यकालोऽनादिरनन्तोऽजरःजगदीश्वरः महेश्वरः परमात्मा भगवानित्यादि- शब्दैः कूर्मपुराणे वर्णितः । तद्यथा-

अनादिरेष भगवान् कालोऽनन्तोऽजरः परः ।
सर्वगत्वात् स्वतन्त्रत्वात् सर्वात्मत्वान्महेश्वरः ।।
ब्रह्माणो बहवो रुद्रा अन्ये नारायणादयः ।
एको हि भगवानीशः कालः कविरिति स्मृतः ।।
ब्रह्मनारायणेशानां त्रयाणां प्राकृतो लयः ।
प्रोच्यते कालयोगेन पुनरेव च सम्भवः ।।
परं ब्रह्म च भूतानि वासुदेवोऽपि शङ्करः ।
कालेनैव च सृज्यन्ते स एव ग्रसते पुनः ।।
तस्मात्कालात्मकं विश्वं स एव परमेश्वरः ।।इति ।।

पुनश्च विष्णुधर्मोत्तरेऽपि कालोऽयमनादिनिधनः रुद्रः सङ्कर्षणः इत्यादिरूपेण चित्रितो दृश्यते । यथोक्तं तत्र -

अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः ।
कलनात्सर्वभूतानां स कालः परिकीर्त्तितः ।।

कर्षणात्सर्वभूतानां स तु सङ्कर्षणः स्मृतः ।
सर्वभूतशमित्वाच्च स रुद्रः परिकीर्त्तितः ।।
अनादिनिधनत्वेन स महान् परमेश्वरः ।।इति ।।

एवं नित्यकालस्य परमेश्वरस्वरूपत्वेन पूजनं स्मरणं परिकीर्त्तनञ्च शास्त्रेषु सर्वत्र दृश्यते ।

स्वानुशीलनप्रश्नाः
१.नित्यकालस्य किं स्वरूपम् ?
-----------------
२.नित्यकालस्य क उपयोगः ?
------------------
३.नित्यकालस्य निर्णयो माधवाचार्य्येण कृतो न वा ?
------------------

## I.8.जन्यकालस्य स्वरूपम्

कलयति जगदेषः कालोऽतः इति वचनानुसारेण जगतः कलयितृरूपेण ख्यातो यः कालः स एव जन्यकालः केवलकाल इति शब्देन व्यवह्रीयते । सच कालो महाकालेन कलित इत्यत्र संशयो नास्ति ,तद्विषयेऽपि पूर्वं प्रतिपादितम् । जन्यकालोऽयं मासपक्षतिथ्यादि- रूपः यस्य स्वरूपं ज्योतिःशास्त्रेषु सम्यक् निर्णीतम् । स च कालः सामान्यविशेषाभ्यां द्विविधः । तत्र यः सामान्यकालः स विशेषानुगतत्वात् तदपेक्षया नित्यः ग्रहगत्यादिभिरनुमेयः भूतोत्पत्ति- निमित्तकारणमिति तार्किका ज्योतिषिकादयश्च स्वीकुर्वन्ति ।प्रसङ्गेऽस्मिन् माधवाचार्य्येण काल- माधवे सोदाहरणं प्रतिपादितं यत् -

युगवर्षमासदिवसाः समं प्रवृत्तास्तु चैत्रशुक्लादेः ।
कालोऽयमनाद्यन्तो ग्रहभैरनुमीयते क्षेत्रे ।। इति ।।

यश्च कालविशेषः इति कथ्यते तेषु संवत्सरः प्रधानीभूतः ।अन्ये सर्वेऽयन-ऋतु-मास- पक्षदिवसादयो गुणभूताः भवन्ति । एते सर्वे संवत्सरस्यावयवाः । अतः संवत्सरोऽवयवीत्युच्यते । संवत्सरादारभ्य ततोऽर्वाङ् कालावयवानां कर्माङ्गत्वेन स्वीकारात् तेषां महत्युपादेयता विद्यते ।

## I.9.कालावयवेषु संवत्सरस्य प्राधान्यम्

यद्यपि युगवर्षमासदिवसाः सममेव प्रवृत्तास्तथापि संवत्सरस्य प्रथमं सृष्टत्वात् तस्य प्राधान्यं सर्वैः स्वीक्रियते । वस्तुतः कालावयवेषु सूक्ष्मतमोऽवयवो निमेषः , दीर्घतमोऽवयवश्च परार्द्धमिति सर्वे आमनन्ति । अतोऽनयोर्द्वयोर्मध्येऽन्यतरस्यैव प्राधान्यमुचित- मिति केचिद्वदन्ति ।परन्तु संवत्सरस्य प्रथमं सृष्टत्वात् तस्यैव

प्राधान्यमिति वाजसनेयिनां वचनाद् ज्ञायते । यथोक्तं तैः -“ सोऽकामयत द्वितीयो मे आत्मा जायेतेति , स मनसा वाचा मिथुनं समभवत् , यद्रेत आसीत् स संवत्सरोऽभवत् , तस्मात् संवत्सरः प्रधानमिति ”।

तस्मिन् संवत्सरे निमेषाद्या अयनपर्यन्ता क्षुद्राः काला अणुत्वेन प्रविशन्ति ,युगाद्याः परार्द्धपर्यन्ता महान्तः कालाऽवयवाः आवृत्त्यैव प्रविशन्ति । एतेन सर्वेषां कालावयवानामध्यक्षः संवत्सर एवेति कथ्यते । स च संवत्सरः तैरणुभिर्महद्भिश्च सर्वैः समाविष्टः अतिदीर्घः सन् जगत्यस्मिन् न कदाचिदुच्छिद्यते।यथा भागीरथीगोदावर्य्यादिकां कस्मादुत्पत्तिस्थानात् प्रवहमानां नदीमन्या अल्पनद्यः अभितः प्रविशन्ति , सा च प्रविष्टैः नद्यन्तरैः सह विस्तीर्णा सती प्रवहति , न तु अप्रवाहा सती शुष्यति , तद्वत् नानाविधरूपैः समुत्पन्नाः कालावयवाः संवत्सराख्यं प्रधानं कालमाश्रिताः निमेषादयनपर्यन्ताः संवत्सरादणवः , युगाद्याः परार्द्धपर्यन्ताः संवत्सरान्महान्तः, ते सर्वे संवत्सरं सम्यक् प्रविशन्ति । तत्राणूनामवयवत्वेन प्रवेशः महतां तु संवत्सरावृत्त्येति भेदः । यद्धवतु कालावयवेषु संवत्सरस्यैव प्राधान्यमित्यत्र नास्ति संशयलेशः । प्रसङ्गेऽस्मिन् कालमाधवे आरुणकेतुकब्राह्मणग्रन्थस्योदाहरणं माधवाचार्य्येण प्रदत्तम् । तद्यथा-

नदीव प्रभवा काचिदक्षय्या स्यन्दते यथा ।
तां नद्योऽभिसमायान्ति सोरुः सती न निवर्त्तते ।।
एवं नानासमुत्थानाः कालाः संवत्सरं श्रिताः ।
अणुशश्च महत्शश्च सर्वे समवयन्ति तम् ।।
स तैः सर्वैः समाविष्ट उरुः सन्न निवर्त्तते ।। इति ।।

एवं कालावयवेषु संवत्सरस्य प्राधान्यं वेदितव्यम् ।

स्वानुशीलनप्रश्नाः

१.जन्यकालस्य किं स्वरूपम् ?

-----------------

२.कालावयवेषु कस्य प्राधान्यम् ?

------------------

३.कथं संवत्सरस्य प्राधान्यम् ?

------------------

## सारांशः

अस्मिन् खण्डे सांख्योक्तपञ्चविंशतितत्त्वेषु कालस्यासंगृहीतत्वेन कालः

माधवाचार्यकृतः कालमाधवः

गगनकुसुमतुल्यः अप्रसिद्धं किमपि वस्तु यः तत्त्वरूपेण विवेचयितुं न शक्यत इति कालस्याभावविषये षट्पक्षान् पूर्वपक्षरूपेणोत्थाप्य सयुक्तिकं तत् खण्डयित्वा माधवाचार्येण कालतत्त्वं स्थापितम् । वैशेषिकमते कालस्य नित्यत्वं निरवयवत्वञ्च निरस्य वेदवादिनां मते कालस्याऽनित्यत्वं सावयवत्वाञ्च प्रतिपादयितुं तेन विरोधाधिकरण-न्यायस्यावतरणं कृतम् । ततश्च कालस्य नित्यत्वजन्यत्वभेदेन द्वैविध्यं प्रतिपाद्य तयोः स्वरूपमुपयोगश्च सम्यक् प्रतिपादितः । तदनन्तरं निमेषादारभ्य परार्द्धं यावद् विद्यमानेषु कालावयवेषु तत्र संवत्सरस्य प्रथमं सृष्टत्वात् तस्यैव प्राधान्यं प्रदर्शितम् ।

---

## पारिभाषिकशब्दाः

अतिप्रसङ्गः- अतिव्याप्तिः(लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम् )

अध्वरः - यज्ञः

अनुमानः - शिष्टाचारः

अभावपदार्थाः - प्रागभावः,प्रध्वंसाभावः,अत्य न्ताभावः, अन्योन्याभावश्चेति चत्वारः

अहंकारः - अभिमानस्य हेतुः

आचारः - सदाचारः

आध्वर्जवं - अध्वर्य्योः कर्म

आभाणकम्- कथानकम्

आयुवेदः - वैदिकं चिकित्साशास्त्रम्

उक्थ्यः - सोमसंस्थाविशेषः

उपाधिः - बहिस्तत्वम्

ऐतिह्यं - इतिहासपुराणादिकम्

कापिली - कपिलकृता सांख्यस्मृतिः

कालकालः - नित्यकालः महाकालो वा

कालात्ययापदिष्टः- यस्य बलवता प्रमाणेन क्षेसाध्याभावो निश्चीयते स हेतुः कालात्ययापदिष्टः इति

केवलकालः - जन्यकालः

गान्धर्ववेदः- सङ्गीतशास्त्रविषयको वेदः

छन्दोगाः - सामवेदीयाः

ज्योतिष्टोमः सोमयागः

धनुर्वेदः- धनुर्विद्याविषयको वेदः

पञ्चतन्मात्राणि - शब्द-स्पर्श-रूप-रस-गन्धाः

पदार्थाः- द्रव्य-गुण-कर्म-समवाय सामान्य-विशेषाभावाः सप्त पदार्थाः

पुरुषः - यस्य न प्रकृतित्वं न वा विकृतित्वम्
प्रकृतिः- यत्तत्त्वं स्वयं सृष्टं सदन्यत् सृजति
प्रकृतिविकृतयः - यत्तत्त्वमन्यस्मात्सृष्ट सदन्यत् सृजति
प्रत्यक्षं - वेदप्रमाणम्
प्रहरः - अहोरात्रस्याष्टमो भागः
बह्वृर्चाः- ऋग्वेदीयाः
मनोमयाधिकरणं- अधिकरणमिदं शारीरिकेऽ(१-२-१)स्ति
महत् - महत्तत्वं ,बुद्धिः
महावेदी - उत्तरवेदी
महाव्रतम्- सत्रविशेषः
विकारः- विकृतिः
विकृतिः - यत्तत्त्वमन्यस्मात्सृष्टं किन्तु नान्यत् सृजति
शिष्टाः - विगतमत्सराः कुम्भीधान्या अलोलुपा दम्भ-दर्प-मद-मोह विवर्जिताः जनाः
सत्कार्यवादः - सतः कारणात् सत्कार्यं जायत इति वादः
सदोमण्डपः - उत्तरवेद्या उपरि निर्मितो मण्डपविशेषः सूचीकटाहन्यायः- बहुकाल-स्वल्पकालसाध्ययोःकर्मणोः
स्वल्पकाल साध्यकर्मणःप्रथममनुष्ठानार्थ- मयं न्यायो लोके प्रयुज्यते ।
स्मृतिः - धर्मशास्त्रम्
हिरण्मयाधिकरणं - इदमधिकरणं शारीरिकेऽ(१-१-७)स्ति

---

## सहायकग्रन्थाः

१.कालमाधवः - चन्द्रकान्ततर्कालङ्कारकृतः,वेंकटेश्वरप्रेस्मुम्बाइ ।

२.कालमाधवः - हरिदाससंस्कृतग्रन्थमाला , वाराणसी

३.कालमाधवः - डा.व्रजकिशोरस्वाईसम्पादितः,
चौखम्बासंस्कृतसंस्थान , वाराणसी ,१९८९

४.कालसारः - राधारमणपुस्तकालयः कटक-२, १९७०

५.कालनिर्णयः - डा.खगेश्वरमिश्रसम्पादितः,
महावीर आफसेटप्रेस् ,पुरी , २००६

६.कालदीपः - दिव्यसिंहमहापात्रकृतः

७.समयमयूखः - नीलकण्ठभट्टकृतः

## आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) कालस्याभाववादिनां मतानि निरस्य माधवोक्तदिशा कालं स्थापयत ।
२) विरोधाधिकरणमुल्लिख्य तस्य प्रासङ्गिकतां प्रदर्शयत ।
३) सलक्षणं कालस्य प्रामाण्यं भेदांश्च प्रतिपादयत ।
४) कालस्य स्वरूपमुल्लिख्य कालावयवेषु संवत्सरस्य प्राधान्यं प्रदर्शयत ।
५) माधवाचार्य्यस्य परिचयं प्रदाय तस्य देशकालकृतीः प्रदर्शयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) सांख्योक्तपञ्चविंशतितत्त्वानि माधवोक्तदिशा प्रतिपादयत ।
२) कालस्य नित्यत्वाऽनित्यत्वविषये निरवयवत्व-सावयवत्वविषये च प्रमाणं प्रदर्शयत ।
३) कालस्य प्रयोजनानि प्रतिपादयत ।
४) कालावयवेषु संवत्सरस्य प्राधान्यं प्रदर्शयत ।

### लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) शैवागमोक्तषट्त्रिंशत्तत्त्वानि कानि ?
२) जन्यकालस्य स्वरूपं प्रदर्शयत ।
३) कालस्य कर्माङ्गत्वं प्रतिपादयत ।
४) सूचीकटाहन्यायस्य तात्पर्य्यं प्रदर्शयत ।
५) माधवाचार्यस्य कृतीः प्रदर्शयत ।

### एकाङ्कप्रश्नाः (प्रत्येकं१अङ्कः )

१) माधवाचार्यः कुत्रत्यः ?
२) माधवाचार्यस्य पितुर्नाम किम् ?
३) माधवाचार्यस्य मातुर्नाम किम् ?
४) माधवाचार्यस्य गुरोर्नाम किम् ?
५) माधवाचार्यस्य भ्रातुर्नाम किम् ?
६) माधवाचार्यः कस्य कुलगुरुः मन्त्री चासीत् ?
७) माधवाचार्य्येण का पदवी लब्धा ?
८) सांख्यशास्त्रे कति तत्त्वानि ?
९) शैवागमे कति तत्त्वानि ?
१०) कति विकृतितत्त्वानि ?
११) कालः कस्मात् सृष्टः ?

१२) सावकाशनिरवकाशयोः किं बलीयः ?
१३) कानि कालसाधकानि श्रुतौ उपन्यस्तानि ?
१४) कालकर्मणोर्मध्ये कः सम्बन्धः ?
१५) कर्मारम्भेषु कोऽनुस्मर्त्तव्यः ?

## एकाङ्कप्रश्नानामुत्तराणि

१) दाक्षिणात्यः २) मायणाचार्यः ३) श्रीमती

४) श्रीकण्ठः ५) सायणाचार्यः भोगनाथश्च ६) राज्ञः बुक्कणस्य

७) विवेकतीर्थम् ८) पञ्चविंशतिः

९) षट्त्रिंशत् १०) षोडश ११) मायातः

१२) निरवकाशम् १३) स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्च

१४)अङ्गाङ्गिभावः १५) नित्यकालः

**********

# (द्वितीयखण्डः )- कालमाधवस्य वत्सरप्रकरणम्

## संरचना

II.1.प्रस्तावना

II.2. उद्देश्यम्

II.3.संवत्सरस्य स्वरूपम्

II.4.अयनम्

II.5.ऋतुः

II.6.मासः

II.7.मलमासः

II.8.मलमासे वर्ज्यावर्ज्यविचारः

II.9.पक्षः

## II.1 प्रस्तावना

कालमाधवस्य द्वितीयप्रकरणे संवत्सरो विचारितः ।तत्र संवत्सरस्य का व्युत्पत्तिः तस्य किं स्वरूपं, तस्य के भेदाः, कीदृशः संवत्सरः कियद्दिनात्मकः,कुतश्चारभ्यते, कस्य संवत्सरस्य क उपयोग इत्यादिविषये विचारो विहितः । ततः चान्द्रसंवत्सरस्य प्रभवाद्यवान्तर- षष्टिभेदाः प्रतिपादिताः।तदनन्तरमयनस्य व्युत्पत्तिं स्वरूपं भेदावुपयोगांश्च प्रतिपाद्य ऋतूनां व्युत्पत्तिस्वरूपभेदोपयोगविषयेऽपि विचारः सन्निवेशितः । ततो मासशब्दस्य व्युत्पत्तिं प्रदर्श्य मासस्य स्वरूपं भेदानुपयोगांश्च प्रतिपाद्य अधिमासस्य स्वरूपं,तत्पाते कारणं ,द्वयोरधिमासयो- र्मध्ये व्यवधानं ,तत्रानुष्ठानप्रकारविशेषः ,क्षयमासस्य स्वरूपं , तस्यागमनकालविचारः,मलमासे वर्ज्यावर्ज्यविवेकश्च सविस्तरं प्रतिपादितः ।तदनन्तरं पक्षस्य व्युत्पत्तिं स्वरूपं भेदानुपयोगञ्च प्रतिपाद्य शुक्लकृष्णपक्षयोर्दिवसानां रात्रिणां च पृथक् पृथक् संज्ञा खण्डेऽस्मिन् विचारिताः।

## II.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- संवत्सरस्य व्युत्पत्तिं स्वरूपं भेदांश्च विवेचयितुमर्हन्ति ।
- संवत्सरस्योपयोगं प्रतिपादयितुम् अर्हन्ति ।
- विभिन्नप्रकारकसंवत्सराणां दिनसंख्यां गणयितुमर्हन्ति ।
- चान्द्रसंवत्सरस्य षष्टिभेदान् विचारयिष्यन्ति ।
- अयनस्य स्वरूपोपयोगादिविषये विवेचनं करिष्यन्ति ।
- ऋतूनां व्युत्पत्तिस्वरूपभेदोपयोगादिविषये स्पष्टयितुं शक्नुवन्ति ।
- मासस्य स्वरूपं भेदांश्च विवेचयिष्यन्ति ।
- मलमासस्य स्वरूपोपयोगादिविषये विवेचनं करिष्यन्ति ।
- मलमासे वर्ज्यावर्ज्यं प्रतिपादयिष्यन्ति ।
- अधिमास-क्षयमासयोः स्वरूपं तत्पतनकालञ्च विवेचयिष्यन्ति ।
- पक्षस्य स्वरूपमुपयोगञ्च निरूपयिष्यन्ति ।
- अधिमास-क्षयमासयोः स्वरूपं तत्पतनकालञ्च विवेचयिष्यन्ति ।

## II.3 संवत्सरस्य स्वरूपम्

सम्यग् वसन्ति अयनर्तुमासादयो यस्मिन् सः संवत्सरः । स चायनाद्य-वयवयुक्तोऽवयवी कालविशेषः । द्वादशमासाः संवत्सर इति श्रुतिवचनात् संवत्सरो द्वादशमासा- त्मकः । माधवाचार्यमते संवत्सरः पञ्चविधः । सौरः, चान्द्रः, सावनः,बार्हस्पत्यः,नाक्षत्रश्चेति । द्वादशसु राशिषु सूर्यसंक्रमणैर्निष्पन्नः सौरः। स च मेष संक्रमणादिर्मीनान्तः। चन्द्रकलावृद्धिक्षय- प्रयुक्तप्रतिपदादितिथीनां षष्ट्यधिकशतत्रयेण निष्पन्नः चान्द्रः। स च चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शान्तः । चान्द्रसंवत्सरे पक्षतिथिप्रभृतीनां प्रयोगो भवति नान्यत्र। षष्ट्युत्तरशतत्रया- होरात्रात्मकः सावनः । तस्य नियतारब्धकालो नास्ति । गुरोरेकराशिस्थितिकालो बार्हस्पत्यः । नक्षत्रचक्रद्वादशाऽऽवृत्त्या सम्पन्नो यः स नाक्षत्रसंवत्सर इत्युच्यते ।

एते संवत्सराः यदा सावनमानेन परिमीयन्ते तदा तेषां नियतमरिमाणो ज्ञातुं शक्यते। तत्र सौरसंवत्सरः पञ्चषष्ट्यधिकशतत्रयदिवसैः सम्पद्यते । चान्द्रसंवत्सरः चतुःपञ्चाश-

दधिकशतत्रयदिवसात्मको भवति सावनसंवत्सरः षष्ट्युत्तरत्रिशतदिनात्मकः, बार्हस्पत्यसंवत्सरः एकषष्ट्युत्त-रत्रिशतदिनात्मकः,नाक्षत्रश्च चतुर्विंशत्यधिकशतत्रय-दिवसात्मको भवति ।

एतेषां संवत्सराणां मातुलपातालादिसंज्ञाऽपि श्रूयते । तत्र गणकप्रसिद्ध्या मातुलशब्दः पञ्चषष्ट्यधिकशतत्रयं बोधयति । यतो हि नियमानुसारेण सर्वे स्वरवर्णाः शून्य- संख्यका भवन्ति । कवर्ग-चवर्ग-टवर्ग-पवर्गाणां क्रमेण प्रतिवर्गं विद्यमानानामक्षराणामेक-द्वि-त्रि-चतुः-पञ्चसंख्या परिकल्पिताः । तवर्गस्य टवर्गेऽन्तर्भावात् तत्र स्थितानामक्षराणां क्रमेण षट् सप्तादिसंख्या स्वीक्रियते । यरलवानाञ्च क्रमेण एक-द्वि-त्रि-चतुःसंख्या परिकल्पिता। एतेन मातुलशब्दे विद्यमानः मकारः ५ ,तकारः ६ ,लकारः ३ संख्यां बोधयतीति हेतोः , अङ्कानां वामतो गतिरिति नियमाच्च तैः संख्याभिः ३६५ सम्पद्यते । अतः मातुलशब्दः सौरसंवत्सरस्य बोधको भवति ।तद्वत् पातालशब्दः( प-१,त-६,ल-३)अङ्कानां प्रतिलोमेन ३६१ संख्यां बोधयति , येन पातालशब्दः बार्हस्पत्यसंवत्सरस्य लक्षको भवति । पुनश्च अतुलशब्दः तेनैव प्रकारेण (अ-०.त-६-ल-३ )३६० संख्यां बोधयति , येन अतुलशब्देन सावनसंवत्सरो बोध्यते ।एवं प्रकारेण विमलशब्दः (व-४,म-५,ल-३)३५४ संख्याया बोधकत्वेन चान्द्रसंवत्सरं लक्षयति । वराङ्गशब्दश्च (व-४,र-२,ग-३)३२४ संख्याया बोधकत्वेन नाक्षत्रसंवत्सरं लक्षयति । अतः प्रसङ्गेऽस्मिन्नुक्तं कालमाधवे यत् -

सौर-बृहस्पति-सावन-चान्द्रिक-नाक्षत्रिकाः क्रमेण स्युः ।
मातुल-पातालातुल-विमल-वराङ्गाश्च वत्सराः पञ्च ।। इति ।।

एते पञ्चविधाः संवत्सराः केषुचित्कर्त्तव्येषु व्यवतिष्ठन्ते केषुचिच्च विकल्प्यन्ते । यथा तिलकव्रताऽनन्तव्रतादीनां निर्दिष्टपक्षतिथिमुपजीव्य प्रवृत्तत्वात् तत्र संवत्सरः चान्द्र एव । सुजन्मावाप्तिव्रतादौ संक्रमणे पूजोपवासादीनां विधानात् तत्र संवत्सरः सौरः । सत्राद्यनुष्ठाने सावनसंवत्सरस्योपयोगो भवति ।तत्र यद्यपि निर्दिष्टायां तिथौ सत्रस्य कृते दीक्षा श्रूयते , तथापि मुख्यकर्मणि सावनमान एव गृह्यते । बार्हस्पत्यसंवत्सरः सिंहराशौ बृहस्पतौ सति गोदावर्य्यादि स्नानादा-वुपयुज्यते ।नाक्षत्रिकस्य ज्योतिः शास्त्रप्रसिद्धेरायुर्दायादावुपयोगो दृश्यते ।

चान्द्रसंवत्सरस्य पञ्च अवान्तरभेदा अपि सन्ति । यथा- संवत्सरः , परिवत्सरः इदावत्सरः अनुवत्सरः इद्वत्सरश्चेति । तेषु संवत्सरे तिलदानं , परिवत्सरे यवदानं , इदावत्सरे वस्त्रदानं ,अनुवत्सरे धान्यदानं इद्वत्सरे च रजतदानं विशिष्यत इति विष्णुधर्मोत्तरपुराणवचन- मुत्थाप्य माधवाचार्य्येण प्रतिपादितम् । तेषां वत्सराणामधिष्ठातृदेवताः क्रमेण बह्निः,सूर्यः,सोमः, प्रजापतिः महेश्वरश्च कल्पिताः । अतस्तेषां मण्डलविन्यासपूर्वकं पूजाहोमादिकं कार्य्यम् । अस्यैव चान्द्रसंवत्सरस्य प्रभवविभवादिक्रमेण षष्टिभेदा अपि सन्ति, ते च ज्योतिःशास्त्रादिभ्यो- ऽवगन्तव्याः ।

स्वानुशीलनप्रश्नाः

१.संवत्सरस्य किं स्वरूपम् ?

-----------------

२.संवत्सरः कतिविधः ?

------------------

## II.4 अयनम्

अयते यात्यनेन ऋतुत्रयेण सूर्य्यो दक्षिणाशामुत्तराशाञ्चेति ऋतुत्रयमयनम् । तच्च द्विविधम् । षण्मासात्मकं दक्षिणायनं षण्मासात्मकमुत्तरायणञ्च । तदपि ऋतुत्रयात्मकं भवति । कर्कटसंक्रमणान्मकर-संक्रमणं यावद्दक्षिणायनं ,मकरसंक्रमणात् कर्कटसंक्रमणं यावदुत्तरायणम् । इदं सौरमानेन ज्ञायते । चान्द्रमानेनापि ज्येष्ठमासादारभ्य कार्त्तिकमासान्तं यावद्दक्षिणायनं, मार्गशीर्षमासादारभ्य वैशाखमासान्तं यावदुत्तरायणमित्यच्यते । तत्रोत्तरायणे देवतातडागाऽऽ- रामादीनां प्रतिष्ठा ,अन्यानि सौम्यकर्माणि च क्रियन्ते । तानि दक्षिणायने क्रियन्तेचेत् निष्फलानि भवन्ति । किन्तु कानिचित् क्रूरकर्माणि दक्षिणायनेऽपि भवितुमर्हन्ति ।

प्रसङ्गेऽस्मिन् माधवाचर्य्येण कालमाधवे सत्यव्रत-वैखानससंहितयोर्वचन- मुत्थापनपूर्वकं प्रतिपादितं यत् -

देवताऽऽरामवाप्यादि-प्रतिष्ठोदङ्मुखे रवौ ।
दक्षिणाशामुखे कुर्वन् न तत्फलमवाप्नुयात् ।। इति ।।
मातृ-भैरव-वाराह- नरसिंह-त्रिविक्रमाः ।
महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने ।। इति ।।

एवं प्रकारेण द्वयोरयनयोः स्वरूपोपयोगौ प्रतिपादितौ ।

## II.5 ऋतुः

“ ऋ गतौ ” इत्यस्माद्धातोः तु-प्रत्यये ऋतुशब्दो निष्पद्यते । इयर्त्ति गच्छति अशोकपुष्पविकासाद्यसाधारणलिङ्गमिति वसन्तादिकालविशेष ऋतुः । स च मासद्वयात्माऽपि षड्विधः ,षड्वा ऋतव इति श्रुतेः । ते च वसन्त-ग्रीष्म-वर्षा-शरद्धेमन्त-शिशिरसंज्ञकाः। पञ्चप्रयाजानामनुमन्त्रणप्रसङ्गे हेमन्त-शिशिरयोरेकीकरणेन पञ्चाना मेव ऋतूनां ग्रहणात् द्वादश मासाः पञ्चर्त्तव इति यद्यपि श्रुतौ दृश्यते , तथापि द्वादशसु मासेषु षडेव ऋतवो घटीयन्त्रघटवत् नैरन्तर्य्येणावर्त्तन्ते । तेषु वसन्तस्यैव प्राथम्यं शास्त्रेषु दृष्टम् । स च ऋतुः सौरचान्द्रभेदेन पुनरपि द्विविधः। मीनमेषयोः मेषवृषयोर्वा वसन्त इति सौरवसन्तोऽभिप्रेतः । पुनश्च मधुश्च माधवश्च वासन्तिकावृतू इत्यादौ मधुमाधवादिना चैत्रवैशाखयोर्ग्रहणादृतुश्चान्द्र एवेति बोध्यते ।

एतेषामुपयोगविषये श्रुतिस्मृत्यादिषु बहूनि प्रमाणानि समुपलभ्यन्ते ।तत्र वसन्ते ब्राह्मणमुपनयीत , ग्रीष्मे राजन्यं शरदि वैश्यमित्यादिना , वसन्ते ब्राह्मणोऽग्नीनादधीत , ग्रीष्मे राजन्य आदधीत शरदि वैश्य आदधीत इत्यादिना चोपनयनाऽग्न्याधानयोर्वसन्तादिकालता शास्त्रसिद्धा । पुनश्च विभिन्नेषु ऋतुषु विभिन्नानि दानान्यपि देवीपुणाणे प्रतिपादितानि । यथा- वर्षासु तिलदानं शरद्यन्नदानं ,हेमन्तेऽग्निदानं शिशिरे वस्त्रदानमित्यादि । एवं प्रकारेण ऋतूनां स्वरूपविनियोगौ प्रतिपादितौ ।

स्वानुशीलनप्रश्नाः

१. अयनशब्दस्य काव्युत्पत्तिः ?

-----------------

२. अयनयोः क उपयोगः ?

------------------

३. ऋतुशब्दस्य का व्युत्पत्तिः ?

------------------

४. ऋतूनां क उपयोगः ?

----------------

५. ऋतूनां मध्ये कस्य प्राथम्यम् ?

----------------

## II.6 मासः

मस् परिमाणे इत्यस्माद्धातोः घञ्प्रत्यये कृते मासशब्दो निष्पद्यते । मस्येते परिमीयेते यावता कालेन चन्दवृद्धिक्षयौ,स चान्द्रो मासः । प्रसङ्गेऽस्मिन् सिद्धान्तशिरोमणिवचनमुत्थाप्य माधवाचार्य्येण कालमाधवे प्रतिपादितं यत् –

मस्यन्ते परिमीयन्ते स्वकालवृद्धिहानितः ।
मास एते स्मृता मासाः त्रिंशत्तिथिः समन्विताः ।। इति ।।

यद्यप्येतेन मासस्य चान्द्रत्वमेव बोध्यते , तथापि मासस्य चातुर्विध्यस्वीकाराच्च , अन्येऽपि सौर-सवन-नाक्षत्रा मासाः सन्ति । तेषामपि व्युत्पत्तिरेतादृशी कर्त्तुं शक्यते तद्यथा- सूर्यस्य राशिगतिर्यत्र परिमीयते स सौरः । अहोरात्राणां त्रिंशत्संख्या यत्र परिमीयते स सावनः । नक्षत्राणां सप्तविंशतिसंख्या यत्र परिमीयते स मासो नाक्षत्रः इति । यथोक्तं ब्रह्मसिद्धान्ते –

चान्द्रः शुक्लादिदशान्तः सावनस्त्रिंशता दिनैः ।
एकराशौ रविर्यात्कालं मासः स भास्करः ।।इति ।।

विष्णुधर्मोत्तरपुराणे नाक्षत्रमासस्य स्वरूपमित्थमभिहितं यत् –

सर्वर्क्ष-परिवर्त्तैस्तु नाक्षत्रो मास उच्यते । इति ।

एतेषु मासेषु मेषराशौ सूर्यस्य संक्रमणे सौरमास आरभ्यते । स च वृषराशौ सूर्यसंक्रमणाव्यवहितपूर्वक्षणं यावत् तिष्ठति । पुरुषेच्छया यस्मात् कस्माद्दिनादारभ्य त्रिंशदहो- रात्राणां पूर्त्तौ एकः सावने मासो भवति । तद्वच्चन्द्रस्य समग्रनक्षत्राणां भोगकालः एको नाक्षत्र- मास उच्यते। तेषु मासेषु ब्राह्मस्य कृते दर्शान्तचान्द्रमासः ,क्षत्रियाणां कृते सौरमासः , वैश्यानां कृते पूर्णिमान्तचान्द्रमासः परिकल्पितः ।शूद्रस्य कृते न कश्चिन्मासो नियतः । सावनः सर्वैरेवोपयोक्तुं शक्यते ।मासोऽयं संवत्सरस्य द्वादशांशः,अयनस्य षष्ठांशः,ऋतोश्चाऽ- र्द्धभागः,पक्षद्वयात्मकः,त्रिंशद्दिनात्मकश्च भवति ।एतेषु नाक्षत्रमासस्य धर्मशास्त्रे उपयोगाभावात् केवलं सौरसावनचान्द्राणां मासानां विषये चर्च्चाऽत्र क्रियते ।एकस्मात्संक्रमणात्परवर्त्तिसंक्रमणा- वधि एकः सौरमासः। त्रिंशदहोरात्रात्मकः सावनः। त्रिंशत्तिथिसमन्वितः चान्द्रश्च । सौर-चान्द्रयोर्व्यवहारः सर्वश्रौतस्मार्त्तादिकर्मसु भवति ।

यथा संक्रमणात् सौरमासो ज्ञायते तथा चित्रादिनक्षत्रयुक्ता पूर्णिमा चैत्रादिमासं ज्ञापयति । अर्थाथ् यस्मिन् मासे पूर्णिमा चित्रानक्षत्रेण युज्यते स मासः चैत्रः इति । कदाचित् चित्रानिकटवर्त्ति स्वातीनक्षत्रयोगेऽपि चैत्रमास इति कथ्यते । तद्वत् यस्मिन् मासे विशाखाऽनु- राधयोरन्यतमेन नक्षत्रेण पूर्णिमा युक्ता भवति स मासः वैशाख इति । एवं प्रकारेण ज्येष्ठमूलयो- रन्यतरेण यत्र पूर्णिमा युक्ता स मासः ज्येष्ठः । पूर्वाषाढोत्तरषाढयोरन्यतरनक्षत्रयोगेन आषाढः , श्रवणा-धनिष्ठयोरन्यतरेण श्रावणः, शतभिषा-पूर्वफाल्गुन्युत्तरफाल्गुनि-नक्षत्राणामन्य-तमयोगेन भाद्रपदः,रेवत्यश्विनीभरणी-नामन्यतमयोगेन आश्विनः,कृत्तिकारोहि-ण्योरन्यतरयोगेन कार्त्तिकः, मृगशीर्षार्द्रयोर-न्यतरयोगेन मार्गशीर्षः, पुनर्वसु-पुष्ययोरन्यतरयोगेन पौषः,अश्लेषामघयोरन्यतर-योगेन माघः,पूर्वफाल्गुन्युत्तरफाल्गुनिहस्तानामन्यतमयोगेन फाल्गुनमासश्च व्यवस्थीयन्ते ।

एतेषु त्रिविधेषु मासेषु सौरमासो विवाहादौ , सावनः सत्रादौ, चान्द्रश्चाब्दिक- पितृकार्य्येषु विनियुज्यन्ते । प्रसङ्गेऽस्मिन् ब्रह्मसिद्धान्तवचनमुत्थाप्य कालमाधवे माधवा-चार्य्येण प्रतिपादितं यत्-

सोरमासो विवाहादौ यज्ञादौ सावनः स्मृतः ।
आब्दिके पितृकार्य्ये च चान्द्रो मासः प्रशस्यते ।।इति।।

स्वानुशीलनप्रश्नाः

१. मासशब्दस्य काव्युत्पत्तिः ?

-----------------

२. मासः कतिविधः ?

------------------

३. कस्य मासस्य क उपयोगः ?

------------------

४. वर्णभेदेन मासव्यवस्था कीदृशी ?

----------------

## II.7 मलमासः

दर्शान्तचान्द्रमासो यदाऽसंक्रान्तो भवति तदा मसमासः पतति मलत्वं नाम कालाधिक्यम् । अत एतादृशो मलमासोऽधिमास इत्युच्ते ।“चान्द्रमासो ह्यसंक्रान्तो मलमासः प्रकीर्त्तित ” इति ब्रह्मसिद्धान्तवचनात् । सौरसंवत्सरश्चान्द्रसंवत्सरश्च यदा सावनमानेन परि- मीयेते,तदा सौरसंवत्सरः पञ्चषष्ट्युत्तरत्रिशतदिनानि,चान्द्रश्च चतुःपञ्चाशदधिकत्रिशतदिनानि भवन्ति।तथा सति एकस्मिन् वर्षे सौरसंवत्सरः चान्द्रसंवत्सरापेक्षया एकादशभिर्दिनैरतिरिच्यते । तद्वत् चान्द्रसंवत्सरद्वयात् सौरसंवत्सरद्वयं द्वाविंशत्या दिनैरधिकं भवति । तत ऊर्ध्वं चान्द्रमासा ष्टकात् सौरमासाष्टकं सार्द्धसप्तभिर्दिनैरतिरिच्यते । तदनन्तरं पुनः षोडशभिर्दिनैर्घटिकाचतुष्टयेन चार्द्धदिनमधिकं भवति । एवं मिलित्वा द्वात्रिंशद्भिर्मासैः षोडशभिर्दिनैर्घटिकाचतुष्टयेन च सम्पूणः त्रिंशद्दिनात्मक एको मासोऽधिको भवति यो मलमासशब्देनाभिधीयते । स च मलमासः सर्वेषु काम्यकर्मसु गर्हितो भवति । प्रसङ्गेऽस्मिन् विष्णुधर्मोत्तरपुराणवचनमुद्धृत्य माधवाचार्य्येण कालमाधवे सम्यक्तया प्रदर्शितं यत् –

सौरेणाब्दस्तु मानेन यदा भवति भार्गव !
सावने तु तदा माने दिनषट्कं प्रपूर्यते ।।
दिनरात्राश्च ते राम प्रोक्ताः संवत्सरेण षट् ।
सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ।।
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन !
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ।
स चाधिमासकः प्रोक्तःकाम्यकर्मसु गर्हितः ।। इति ।।

एकस्मात् मलमासात् मलमासान्तरं यावत् यद्व्यवधानं तत् सिद्धान्त-ज्योतिषग्रन्थादुद्धृत्य माधवाचार्येण कलमाधवे प्रतिपादितं यत् –

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतति ह्यधिमासकः ।।इति ।।

द्वादशसूर्य्या द्वादशसु मासेषु उदयन्ति । यदा मलमासः पतति ,तदा त्रयोदश मासाः सञ्जायन्ते ।परन्तु त्रयोदशसंखयकसूर्य्याणामभावात् योऽधिकमासः स सूर्यवर्जितः इति हेतोः नपुंसकशब्देन व्यवह्नीयते । स च मासः तदा राक्षसैराक्रान्तत्वात्

मलिम्लुचशब्देनापि व्यपदिश्यते । मलमासयोर्मध्ये यद् व्यवधानं तन्मानद्वयेन व्यवहृतं दृश्यते । स्फुटमानं मध्यममानञ्च । द्वात्रिंशद्भिर्मासैः षोडशभिर्दिनैरेकवारमधिमासः पततीति यदुक्तं तन्मध्यम- मानमाश्रित्योक्तम् । अस्य व्यभिचरोऽपि दृश्यते । यतो हि यदा स्फुटमानेन गणना क्रियते ,तदा क्वचिदेकोनत्रिंशन्मासानन्तरं त्रिंशत्तमो मासोऽपि मलमासो भवतीति प्रतिपादितम् । प्रसङ्गेऽस्मिन् काठकगृह्यसूत्रवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत् ।। इति ।।

परन्तु नायं दोषः ; यतः चान्द्रमासारम्भो नियततया शुक्लप्रतिपद्येव भवति । द्वात्रिंशद्भिर्मासैरित्यादिवचनेन षेडशदिनानन्तरं घयिकाचतुष्टये गते यदि मलमासः पतेत् , तर्हि मासारम्भः कृष्णद्वितीयायां भवेत् यन्न सम्भवति । तस्मात् स्फुटमानमाश्रित्य मलमासस्य गणना क्रियते तदनुसारेण च श्रौतस्मार्त्तादिक्रिया अनुष्ठीयन्ते । मलमासोंयं क्वचित् पञ्चत्रिंशत्तमो मासः क्वचित त्रयत्रिंशत्तमो मासः क्वचिच्च एकोनत्रिंशत्तमो मासोऽपि भवति । किन्तु यदाऽसौ पतति तदा कस्यांचित् शुक्लप्रतिपद्येव नान्यत्रेति निश्चितम् ।

अयमधिमाससंज्ञको मलमासः यदा पतति तदा द्वयोः संक्रमणयोर्मध्ये दर्शद्वयं भवति । दर्शानतेन मासान्तविवक्षायां तस्मिन्नेकमासे मासद्वयस्यावस्थितिः कल्प्यते । तत्र प्रथमः त्रिंशद्दिनात्मको मासो मलः, द्वितीयः त्रिंशद्दिनात्मको मासः शुद्ध इति कथ्यते । अतोऽसौ मासः षष्टिदिनात्मको भवति । अत एवोक्तं कालमाधवे -

षष्ट्या तु दिवसैर्मासः कथितो वादरायणैः ।
पूर्वार्द्धं तु परित्यज्य कर्त्तव्या उत्तरे क्रियाः ।।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृतः।
एवं षष्टिदिनो मासस्तदर्द्धं तु मलिम्लुचः ।। इति ।।

सोऽयं मलमासः न स्वतन्त्रो भवितुमर्हति किन्तु द्वयोर्मासयोर्मध्यवर्त्तिनः उत्तर-मासाङ्गत्वं शास्त्रेषु प्रपादितम् तद्यथा- शुद्धाषाढ-शुद्धश्रावणयोर्मध्ये यदा मलमासस्तदा मध्यवर्त्तिनः मलमासस्य श्रावणत्वमेव नाषाढत्वम् । अतः तेषां त्रयाणामेव मासानां मध्ये प्रथमं शुद्धाषाढः ततो मलःश्रावणः ततश्च शुद्धः श्रावण इति क्रमः ।

द्विविधयोर्मलमासयोर्मध्ये एकोऽधिमासः,अपरश्च क्षयमास इति कथ्यते। यदा दर्शान्तश्चान्द्रमासो द्विसंक्रान्तो भवति ,तदा एको मासः क्षीयते इति हेतोः स क्षयमास इति कथ्यते । स च क्षयमासःअधिमासवत् वारं वारं नियतव्यवधानेन नायाति; परन्तु कादाचित्कत्वेन बहुकालव्यवधानेन पतति । परन्तु यदाऽसौ पतति तदा कार्त्तिकादिषु त्रिषु मासेष्वन्यतमे पतति। पुनश्च तस्मिन् वर्षे तस्य क्षयमासात् पूर्वमेकोऽधिमासः परश्चैकोऽधिमासः,एवमधिमाद्वयं पतति । क्षयमासस्य पूर्ववर्त्तिनोऽधिमासस्य संज्ञा संसर्पः सम्यक् सर्पति कर्मार्हः सन् गच्छतीति व्युत्पत्तेः। तस्य

पर वर्त्तिनोऽधिमासस्य चाधिमास इति संज्ञा ।मध्यवर्त्तिनः क्षयमासस्यांऽहस्पतिरिति संज्ञा दीयते , अंहसः पापस्य पतिरिति व्युत्पत्तेः । प्रसङ्गेऽस्मिन् ज्योतिः सिद्धान्तेऽभिहितं यत् -

असक्रान्त-मासोऽधिमासः स्फुटः स्यात्
द्विसंक्रान्त-मासः क्षयाख्यः कदाचित् ।
क्षयः कार्त्तिकादित्रये नान्यदा स्यात्
तदा वर्षमध्येऽधिमासद्वयं स्यात् ।।इति।।

अस्य क्षयमासस्यागमनकालः बहुवर्षव्यवधानेनैकवारं कदाचित् पतति । अर्थादेकस्मात् क्षयमासात्परं क्षयमासान्तरं क्वचित् चतुःसप्त्यधिकनवशतवर्षव्यवधानेनाऽपतत् । तदनन्तरं पञ्चदशाधिकैकादशशत-वर्षव्यवधानेन,ततश्च षट्पञ्चाशदधिकद्वादशशतवर्षव्यवधानेन क्वचिच्चाष्टसप्त-त्यधिकशतत्रयवर्षवयवधानेन क्वचित्पुनः एकचत्वारिंशदधिकैकशत-वर्षव्यवधानेन क्वचिदप्येकोनविंशतिवर्षव्यवधानाऽप्यपतत् । क्षयमासेऽस्मिन् मासद्वयस्य पितृक-र्माणि कार्य्याणि। अधिमासवत् सर्वाणि काम्यकर्माण्यप्यत्र वर्ज्यानि भवन्ति । प्रसङ्गेऽस्मिन् सिद्धान्तशिरोमणि- वचनमुत्थाप्य माधवाचार्येणोक्तं यत् -

गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले
तिथीशैर्भविष्यत्यथाङ्गाक्षसूर्य्यैः ।
गजाद्र्यग्निभूमिस्तथा प्रायशोऽयं
कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च ।। इति ।।

स्वानुशीलनप्रश्नाः
१. मलमासस्य किं स्वरूपम् ?
-----------------
२. मलमासः कदा पतति ?
------------------
३. क्षयमासस्यागमनकालः कः ?
------------------

## खख.८.मलमासे वर्ज्यावर्ज्यविचारः

मलमासे नित्यं नैमित्तिकञ्च कर्म कुर्यात् ; किन्तु काम्यं कर्म वर्जयेत् । एतेन काम्यकर्मणो यो निषेधः कृतः स चारम्भसमाप्तिविषयः ।अर्थात् मले काम्यकर्म नारभेत । यदि किमपि कर्म मलमासात् पूर्वमारब्धं तर्हि तन्मलमासमध्ये न

समाप्य तत्प्रचालयेत्, मलमासानन्तरं शुद्धे मासि समागते सति समापयेदित्यभिप्रायः । प्रसङ्गेऽस्मिन् जबालिवचन– मुत्थाप्य माधवाचार्येण प्रतिपादितं यत् –

नित्य–नैमित्तिके कुर्यात् प्रयतः सन् मलिम्लुचे ।
तिथिनक्षत्रवोरोक्तं नैव कुर्य्यात्कदाचन ।। इति ।।

परन्तु यदावश्यकं काम्यं कर्म तत् मलमासेऽप्यनुष्ठेयम् । तद्यथा–मल–मासे प्रक्रान्ते तत्र द्वित्रेषु दिनेषु गतेषु यदि कश्चिद्बालः ब्रह्मराक्षसादिना गृह्यते, तर्हि तदा रक्षोघ्नीष्टिः सद्यः एव कर्त्तव्या । यदि तदिष्ट्यनुष्ठानार्थं मलमासस्य समाप्तिं यावत् प्रतीक्षेत तर्हि बालो म्रीयेत । तद्वत् अभिचरतः प्रतिचारं कुर्वाणोऽपि न मलमासस्य समाप्तिं प्रतीक्षेत ।तथा सति अभिचारग्रस्तस्य मरणमपि भवितुमर्हति । पुनश्च यदनन्यगतिकं नित्यं नैमित्तिकं वा तदेव मले कुर्य्यात् । यस्य गत्यन्तरं विद्यते, अर्थात् मले न कृत्वा शुद्धेमास्यनुष्ठाने न कापि क्षतिः तादृशं नित्यं नैमित्तिकं वा मले न कार्यम् । यथा “ वसन्ते वसन्ते ज्योतिषा यजेत ” इति श्रुतिवाक्यात् सोमयागस्य नित्यत्वेऽपि चैत्रवैशाखयोर्वसन्तत्वादुभयोरन्यतरे मलमासे सति , अपरस्मिन् शुद्धे मासि तद्यागानुष्ठानस्यावकाशत्वात् स नित्योऽपि मले नानुष्ठेयः । एवं यत् कर्म नित्यं नैमित्तिकं काम्यं वा भवतु तद्यदि अगतिक म् अर्थादवश्यमेव कर्त्तव्यं भवति , तर्हि तन्मलेऽपि कार्यम् । सगतिकं चेत् तन्न कार्यमिति तात्पर्य्यम् । एतेन यानि कर्माणि मलमासे वर्ज्यानि तानि न कार्य्याणि , यान्यवर्ज्यानि तानि कार्य्याण्येव ।

कालादर्शकारेण कानिचित् कर्माणि मले शुद्धे चोभयत्र कार्याणि ,कानि चित् मले वर्ज्यानि ,कानिचिन्मले वर्जयित्वा शुद्धेऽवश्यं कार्य्याणि ,कानि चिदु भयोरन्यतरस्मिन् कार्याणीति विभिन्नप्रकारकाणि कर्माणि संगृह्य प्रति पादि तानि । तत्र सपिण्डीकरणं , पुंसवनं , सीमन्तोन्नयनं ,जातकर्म, पुंसवनसीमन्तोन्नयनयोः श्राद्धं , रोगे शान्तिः प्रायश्चित्तकर्माणि च मले शुद्दे वा कार्याणि । अब्दोदकुम्भदानं मन्वादिषु युगादिषु महालये च श्राद्धानि अहरहश्राद्ध–दर्शश्राद्धादीनि च मले शुद्धे चोभयत्र कार्याणि । अग्न्याधानाऽपूर्वतीर्थयात्रा, देवताऽऽरामादि– प्रतिष्ठा,वृषोत्सर्गः,मौञ्जीबन्धनं प्रथमचूडाकरणं राजाभिषेकाऽन्नप्राशन–गृहारम्भ–गृहप्रवेशादि– कर्म–विवाह–व्रतारम्भसमाप्ती, प्रायश्चित्तादिकञ्च मलमासे वर्ज्यान्येव । उपाकर्मोत्सर्जनादिकं दमनार्पणं , विष्णोः शयनपार्श्वपरिवर्त्तनादिकं ,इन्द्रध्वजस्थापनादिकञ्च मले न कृत्वा शुद्धे एव करणीयानीति बहुविधा व्यवस्था माधवाचार्य्येण संगृह्य विहिता ।

पुनश्च मलमासे मृतस्य यद्वार्षिकं श्राद्धं यदि कदाचित् मले पतति तर्हि तन्मले एव करणीयम् । शुद्धमासे मृतस्य प्रथमादिब्दकं यदि मले पतति तर्हि मले एव कार्यम् । द्वितीयाब्दिकन्तु मले न कृत्वा शुद्धे एव कार्य्यम् । प्रसङ्गेस्मिन् माधवाचार्य्येण भृग्वादि– वचनमुत्थाप्य प्रतिपादितं यत् –

मलमासमृतानान्तु यच्छ्राद्धं प्रतिवत्सरम् ।
मलमासे तु तत्कार्यं नान्येषान्तु कदाचन ।। इति ।

पुनश्च –

श्राद्धीयेऽहनि संप्राप्ते मलमासो भवेद्यदि ।
मासद्वयेऽपि कुर्वीत श्राद्धमेवं न लुप्यते ।।इति।।

एवं प्रकारेण माधवाचार्यदिशा कालमाधवे मलमासे वर्ज्यावर्ज्यनिरूपणं कृतम् ।

स्वानुशीलनप्रश्नाः

१. मलमासे कानि कर्माणि कार्याणि कानि च वर्ज्यानि ?

----------------

२. मले शुद्धे च कानि कर्माणि कार्याणि ?

------------------

३. मल–शुद्धयोरन्यतरस्मिन् कानि कर्माणि कार्याणि ?

------------------

## II.9. पक्षः

“ पक्ष परिग्रहे ” इत्यस्माद्धातोरच् प्रत्यये पक्षशब्दो निष्पद्यते । देवकार्य्यार्थं वा पितृकार्य्यार्थं वा पक्ष्यते परिगृह्यते यः कालविशेषः ,स पक्षः ।अथवा चन्द्रस्य पञ्चदशानां कलानामापूरणं क्षयो वा यस्मिन् परिगृह्यते स पक्षः । पक्षशब्दः रूढ इत्यपि केचन वदन्ति । तेषां मते द्वेधा विभक्तस्य मासस्य एकैकमर्द्धं पक्षः इति । स च शुक्लकृष्णभेदेन द्विविधः । शुक्ले चन्द्रकलानामेकैकशः आपूरणं भवति कृष्णे चैकैकशः क्षयः । स च शुक्लपक्षः पूर्वपक्ष इत्युच्यते यत्र देवानां कर्म क्रियते । कृष्णपक्षः अपरपक्ष इत्युच्यते यत्र पितृश्राद्धादिकं प्रशस्तं भवति ।

शुक्लेपक्षे कृष्णपक्षे चाहोरात्राणां नामानि पृथक् पृथक् कल्पितानि । तत्रादौ शुक्लपक्षस्य पञ्चदशदिवसानां नामानि नपुंसकलिङ्गात्मकानि श्रूयन्ते । तानि यथा–संज्ञानं ,विज्ञानं ,प्रज्ञानं ,ज्ञानम् ,अभिज्ञानं ,संकल्पमानं प्रकल्पमानं ,उपकल्पमानं ,उपक्लृप्तं , क्लृप्तं ,श्रेयोवसीयः ,आयन्तं ,सम्भूतं , भूतं,प्रभूतम् इति ।शुक्लपक्षस्य पञ्चदशरात्रीणां नामानि स्त्रीलिङ्गानि यथा–दर्शा, दृष्टा ,दर्शना , विश्वरूपा ,सुदर्शना, आप्यायमाना. प्यायमाना प्याया, सूनृता ,इरा,आपूर्य्यमाणा ,पूर्यमाणा ,पूरयन्ती,पूर्णा, पौर्णमासी इति । ततः कृष्णपक्षस्य पञ्च- दशदिवसानां नामानि नपुंसकलिङ्गात्मकानि श्रूयन्ते । तानि यथा–प्रस्तुतं,विष्टुतं,संष्टुतं,कल्याणं, विश्वरूपं ,शुक्रम् ,अमृतं ,तेजस्वि

, तेजः ,समिद्धम् ,अरुणं ,भानुमत् ,मरीचिमत् ,अभितपत् , तपस्वत् इति । पुनश्च कृष्णपक्षस्य रात्रीणां नामानि स्त्रीलिङ्गानि पठितानि यथा-सुता , सुन्वती ,प्रसूता ,सूयमाना ,अभिषूयमाणा ,आपीती , प्रपा ,सम्पा ,तृप्तिः ,तर्पयन्ती ,कान्ता , काम्या ,कामजाता , आयुष्मती , कामदुधा इति ।

स्वानुशीलनप्रश्नाः

१. पक्षशब्दस्य का व्युत्पत्तिः ?

-----------------

२. पक्षशब्दो यौगिको रूढो वा ?

------------------

३. पक्षयोः क उपयोगः ?

------------------

४. शुक्लकृष्णपक्षयोरहोरात्राणां काः संज्ञा ?

------------------

## सारांशः

अस्मिन् खण्डे संवत्सरायन-ऋतु-मास-पक्षाणां स्वरूपभेदोप-योगाः निरूपिताः । शुद्धमासनिरूपणानन्तरं मलमासस्य स्वरूपं मलमासः कथं कदा च पतति ,तस्य क उपयोगः,क्षयमासस्य किं स्वरूपं स च कियता व्यवधानेन पतति,तस्य च क उपयोगः,मल- मासे किं कार्यं किं न कार्यं तत्र च वर्ज्यावर्ज्यविचारादिकं सर्वं सोदाहरणं निरूपितम् । शुक्ल-कृष्णपक्षयोरहोरात्राणां पृथक् पृथक् दिवसनामानि रात्रिनामानि च प्रतिपादितानि ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| अग्निहोत्रं - | सायं प्रातः क्रियमाणो होमविशेषः |
| अतुलः - | (३६०)सावनसंवत्सरः |
| अधिमासः- | संक्रान्तिरहितः दर्शान्तचान्द्रमासः |
| अधिसंवत्सरः - | यस्मिन् चान्द्रसंवत्सरे बृहस्पतेश्चलनं न |
| अनुवाकः - | मन्त्रसमुच्चयः |
| अन्नप्राशनं - | जन्मतः षष्ठे मासि क्रियमाणः संस्कारविशेषः |

अभिचारः- मारणसम्मोहनोच्चाटनाद्याभिचारिकं कर्म

अभिप्लवषडहः- प्रायणायोऽतिरात्रः प्रथममहः,चतुर्विंशो द्वितीयम्, उक्थ्यस्तृतीयं,ज्योतिगौः चतुर्थं ,आयुगौः पञ्चमं, आयुज्योतिः षष्ठमहः सोऽयं षडहोऽभिप्लवः

असूर्य्याः- अधिमासाः

अष्टका - हेमन्तशिशिरयोः कृष्णपक्षाष्टमीषु क्रियमाणं श्राद्धं

अंहस्पतिः- क्षयमासः

आपूर्यमाणपक्षः - शुक्लपक्षः

इष्टिः - ओषधीप्रधानयागः

उत्सर्गिणामयनम् - अयनसत्रविशेषः

उदगयनं - उत्तरायणम्

उपलक्षणं - स्वबोधकत्वे सति स्वेतरबोधकत्वम्

उपसद् - एकदिनसाध्ये सोमयागे क्रियमाणो होमविशेषः

उपाकर्म - श्रावण्यां क्रियमाणो वेदारम्भः

काम्यं - फलोद्देश्येन क्रियमाणं कर्म

कारीरी - वृष्ट्यर्थं क्रियमाणेष्टिविशेषः

कुण्डपायिनामयनम्- अयनसत्रविशेषः

क्षयमासः- द्विसंक्रान्तियुक्तो मासः

गवामयनम् - अयनसत्रविशेषः

चौलं- चूडाकर्म

तुरायणम्- उत्तरायणम्

दर्शः- अमावास्या

नवश्राद्धं - प्रेतोद्देश्येन प्रथम-तृतीय-पञ्चम-सप्तम-नवम-दशमैकादशदिनेषु कियमाणमेकोद्दिष्टश्राद्धम्

नित्यं - यस्य कर्मणोऽकरणे प्रत्यवायः तत् कर्म

निर्य्या - दोषः

निष्क्रमः- जन्मतः चतुर्थे मासि क्रियमाणः संस्कारविशेषः

नैमित्तिकं- यस्य कर्मणोऽकरणे प्रत्यवायः कृते च लाभः तत्

पातालः - (३६१)बार्हस्पत्यसंवत्सरः

पुंसवः- गर्भचलनात्प्राक् तृतीये मासि क्रियमाणः संस्कारः

पूर्वपक्षः- शुक्लपक्षः

पृष्ठ्यःषडहः - त्रिवृत्स्तोमसाध्यं प्रथममहः, पञ्चदशस्तोमसाध्यं द्वितीयम्,सप्तदशस्तोमसाध्यं तृतीयं ,एकविंश-स्तोमसाध्यं चतुर्थं,त्रिणवस्तोमसाध्यं पञ्चमं, त्रयस्त्रिंशस्तोमसाध्यं षष्ठमहः सोऽयं पृष्ठ्यःषडहः

| | |
|---|---|
| प्रतिचारः- | अभिचारं प्रति क्रियमाणोऽभिचारः |
| प्रयाजाः- | दर्शपौर्णमायोरङ्गयागाः |
| बहुलपक्षः- | कृष्णपक्षः |
| ब्राह्मणं - | वेदस्य विधायकभागः |
| मध्यममानः- | चशरप |
| मन्त्रः- | वेदस्य संहिताभागः |
| मलम् - | अधिकम् |
| मलिम्लुचः- | मलमासः |
| महालया - | आश्विनमासस्यापरपक्षे क्रियमाणानि श्राद्धानि |
| मातुलः- | (३६५)सौरसंवत्सरः |
| मौञ्जीबन्धनं - | उपनयनसंस्कारः |
| वराङ्गः- | (३२४)नाक्षत्रसंवत्सरः |
| वरुणप्रघासः- | चातुर्मास्ययागस्य द्वितीयं पर्व |
| वार्द्धुषिककृत्यं- | स्वल्पवृद्ध्या ऋणं गृहीत्वाऽधिकवृद्ध्या प्रयोगः |
| विकल्पः - | तुल्यबलयोर्विरोधे विकल्पः |
| विमलः- | (३५४)चान्द्रसंवत्सरः |
| वृद्धिश्राद्धम्- | आभ्युदयिकं श्राद्धम् |
| वैश्ववदेवः - | चातुर्मास्ययागस्य प्रथमं पर्व |
| सत्रं - | सोमयागविशेषः |
| सपिण्डनं - | प्रेतस्य पितृत्वप्राप्त्यर्थं क्रियमाणं श्राद्धम्  श्राद्धम् |
| संसर्पः- | क्षयमासस्य पूर्ववर्त्यधिमासः |
| सिनीवाली - | चतुर्दशीयुक्ताऽमावास्या |
| सीमन्तः - | गर्भाधानात्परं षष्ठेऽष्टमे मासि वा क्रियमाणः संस्कारविशेषः |
| सुत्या- | सोमरसेन हवनम् |
| स्फुटमानः - | स्फुटगणनया गृहीतो  मानः |

## आदर्शप्रश्नाः

निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) संवत्सरस्य स्वरूपं भेदानुपयोगांश्च माधवाचार्योक्त दिशा प्रतिपादयत ।
२) अयनर्त्तुमासानां स्वरूपप्रदर्शनपूर्वकं तेषामुयोगं विवृणुत ।
३) मलमासस्य स्वरूपमुल्लिख्य स कथं पतति तत्प्रतिपादयत ।
४) मलमासे वर्ज्यावर्ज्यं विवेचयत ।

विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) संवत्सराणां भेदानुपयोगांश्च प्रतिपादयत ।
२) मलमासः कथं कदा च पतति तद्विवेचयत ।
३) मलमासस्य स्वरूपं विलिख्य तत्र वर्ज्यावर्ज्यं विमृशत ।
४) ऋतूनां स्वरूपविनियोगौ प्रदर्शयत ।
५) पक्षयोः विनियोगं प्रदर्श्य तत्राहोरात्राणां नामानि निर्दिशत।

लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) संवत्सरः कतिविधः ?
२) मासभेदान् प्रदर्शयत ।
३) पक्षयोः स्वरूपं प्रतिपादयत ।
४) ऋतूनामुपयोगं प्रदर्शयत ।
५) क्षयमासस्य स्वरूपं प्रदर्शयत ।
६) चान्द्रसंवत्सरस्य भेदान् निर्दिशत ।
७) संसर्पस्य स्वरूपं प्रतिपादयत ।

एकाङ्कप्रश्नाः (प्रत्येकं१अङ्कः )

१) संवसत्सरः कतिविधः ?
२) सौरसंवत्सरः कति दिनात्मकः ?
३) चान्द्ररसंवत्सरः कति दिनात्मकः ?
४) सावनसंवत्सरः कति दिनात्मकः ?
५) बार्हस्पत्यसंवत्सरः कति दिनात्मकः ?
६) नाक्षत्रसंवत्सरः कति दिनात्मकः ?
७) सावनसंवत्सरस्य कुत्रोपयोगः ?
८) चान्द्रसंवत्सरस्य कुत्रोपयोगः ?
९) विहादौ कस्य संवत्सरस्योपयोगो भवति ?
१०)ऋतुः कतिविधः ?
११)कयोर्मासयोः चान्द्रवसन्तत्वम् ?
१२)मासः कतिविधः ?
१३)असंक्रान्तो दर्शान्तचान्द्रमासः क उच्यते ?
१४)कः क्षयमासः ?
१५)मले सगतिकं नित्यं कर्म कार्य्यं न वा ?
१६)शुद्धमासे मृतस्य प्रथमाब्दिकं मले कार्यं न वा ?
१७)मलमासे मृतस्य द्वितीयाद्याब्दिकं पुनः मले पतति चेत् कदा कार्य्यम् ?
१८)शुक्लपक्षे किं कर्म कार्य्यम् ?
१९)पितृकर्म कस्मिन् पक्षे विशिष्यते ?

२०)चान्द्रमासः कतिविधः ?

## एकाङ्कप्रश्नानामुत्तराणि

१) पञ्चविधः
२) ३६५ दिनात्मकः
३)३५४ दिनात्मकः
४) ३६० दिनात्मकः
५) ३६१ दिनात्मकः
६) ३२४ दिनात्मकः
७) सत्रादौ
८) पितृश्राद्धादौ
९)सौरस्य चान्द्रस्य च १०) षड्विधः
११) चैत्रवैशाखयोः
१२) चतुर्विधः
१३) अधिमासः
१४) द्विसंक्रान्तो दर्शान्तः चान्द्रमासः
१५) न
१६) कार्य्यम्
१७) मले एव कार्य्यम्
१८) दैवं कर्म
१९) कृष्णपक्षे
२०) द्विविधः

*****************८

# तृतीयखण्डः-कालमाधवस्य तृतीयं प्रकरणम्
# (तिथिनिर्णयादारभ्याऽयाचितनिर्णयान्तम्)

संरचना

III.1.प्रस्तावना
III.2. उद्देश्यम्
III.3. तिथिस्वरूपम्
III.4. दिवसस्य पञ्चधा विभागविशेषाः
III.5. युग्मवाक्यम्
III.6. कर्मकालवचनस्य स्वरूपम्
III.7. पारणविचारः
III.8. एकभक्तम्
III.9. नक्तव्रतम्
III.10.अयाचितम्

## III.1 प्रस्तावना

कालमाधवस्य तृतीयप्रकरणे तिथयो निर्णीताः ।तत्र प्रथमं प्रतिपत्तिथि-विचारिता । तदारभ्य अयाचितनिर्णयपर्यन्तं खण्डेऽस्मिन् प्रतिपादितम् ।तत्र तिथेः किं स्वरूपं, कथं तिथयः सम्भवन्ति , तस्य च कति भेदाः ,युग्मवचनस्य किं स्वरूपं , का तिथिः पूर्वविद्धा का चोत्तरविद्धा , चान्द्रदिवसस्य के विभागाः , कर्मकालवचनस्य किं स्वरूपं , खर्वादिवाक्यस्य कं स्वरूपं, एकभक्त-नक्तायाचितानां कर्मकालनिर्णयश्च खण्डेऽस्मिन् कृतः ।

## III.2 उद्देश्यम्

प्रियपाठकाः!अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- तिथिशब्दस्य व्युत्पत्तिं स्वरूपं भेदांश्च विवेचयितुमर्हन्ति ।
- पञ्चधा विभक्तदिवसस्य भागान् पर्य्यालोचयिष्यन्ति ।
- मुहूर्त्तानां नामानि स्वरूपञ्च प्रदर्शयितुमर्हन्ति ।
- युग्मवचनं व्याख्यातुम् अर्हन्ति ।
- चान्द्रदिवसस्य विभागान् प्रतिपादयिष्यन्ति ।
- कर्मकालवचनस्य स्वरूपमुपयोगञ्च प्रदर्शयितुमर्हन्ति।
- पारणस्य स्वरूपं विवेचयिष्यन्ति ।
- एकभक्तव्रतस्य कर्मकालं स्वरूपञ्च प्रतिपादयितुं शक्नुवन्ति ।
- नक्तव्रतस्य स्वरूपं कर्मकालञ्च प्रतिपादयिष्यन्ति ।
- अयाचितव्रतस्य स्वरूपं स्पष्टयितुं शक्नुवन्ति ।

## III.3 तिथिस्वरूपम्

" तनु विस्तारे "इत्यस्माद्धातोः क्तिन् प्रत्यये कृते तिथिशब्दो निष्पद्यते । तनोति विस्तारयति वर्द्धमानां क्षीयमाणां वा चन्द्रकलामेकां यः कालविशेषः सा तिथिः । अथ वा यथोक्तकलया तन्यते इति तिथिः । प्रसङ्गेऽस्मिन्नुक्तं सिद्धान्तशिरोमणौ यत् -

तन्यते कलया यस्मात् तस्मात्तास्तिथयः स्मृताः ।इति ।

तिथिशब्दो यथा स्त्रीलिङ्गे तथा पुंलिङ्गेऽपि प्रयुक्तो दृश्यते ।चन्दः षोडशकलः । पौर्णमास्यां चन्द्रः सम्पूर्णमण्डलो दृश्यते ।ततः कृष्णपक्षे प्रतिपदि एकाकला, द्वितीयायां कलाद्वयं तृतीयायां कलात्रयम् एवं क्रमेण एकैका कला क्षीयमाणा सती,अमावास्यायां पञ्चदशकलानां क्षयात् कलाहीनश्चन्द्रो न प्रकाशते ।चन्द्रस्य षोडशकलाभ्यो या एका कलाऽवशिष्यते साऽमाकलेति कथ्यते, यया चन्द्रमा न प्रकाशते । सा चामाकला क्षयोदयरहिता नित्या देहिनां देहधारिणी महाकला ध्रुवाकलेति चोच्यते । तया कलया युक्ता तिथिः सामान्यतिथिः। अवशिष्टा वृद्धिक्षयोपेताः या पञ्चदशकलास्ताभिः प्रतिपदादिपञ्चदश्यन्ताः तिथिविशेषा भवन्ति ।

सोमोत्पत्तौ तासां पञ्चदशकलानां देवताभिः पानं श्रूयते । बह्न्यादिप्रजापत्यन्ता

देवताः तासां कलानामेकैकां कलां पिवन्ति । एकस्याः कलायाः पानेन कृष्णपक्षस्य प्रतिपत् , कलाद्वयपानेन कृष्णपक्षद्वितीया,एवं प्रकारेण पञ्चदशकलापानेन कृष्णपञ्चदशी, अर्थादमावास्या सञ्जायते । पुनश्च ताः पीताः कलाः तत्तत्पातृबह्न्यादिदेवताभ्यो निर्गत्य चन्द्रमण्डलं यदा पूरयन्ति , तदा शुक्लपक्षगताः प्रतिपदादितिथयो भवन्ति । यथोक्तं तत्र–

प्रथमां पिबते बह्निर्द्वितीयां पिबते रविः ।
विश्वेदेवास्तृतीयान्तु चतुर्थीं सलिलाधिपः ।।
पञ्चमीन्तु वषट्कारः षष्ठीं पिबति वासवः ।
सप्तमीमृषयो दिव्या अष्टमीमज एकपात् ।।
नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम् ।
दशमीं पिबते वायुः पिबत्येकादशीमुमा ।।
द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः ।
त्रयोदशीं धनाध्यक्षः कुवेरः पिबते कलाम् ।।
चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः ।
निष्पीतश्च कलाशेषश्चन्द्रमा न प्रकाशते ।। इत्यादि ।।

स्वानुशीलनप्रश्नाः

१. तिथेः किं स्वरूपम् ?
----------------
२. तिथेः के भेदाः ?
----------------
३. शुद्धातिथेः किं लक्षणम् ?
----------------
४. तिथयः कथमुत्पद्यन्ते ?
----------------

पुनश्च सिद्धान्तशिरोमणिकारेण सूर्य्याचन्द्रमसोः सन्निकर्षविप्रकर्षाभ्यां दर्शपूर्णिमयोः समुत्पत्तिः परिकल्पिता । यथोक्तं तत्र कालमाधवे –

अर्काद्विनिसृतः प्राचीं यद्यात्यहरहः शशी ।
तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः ।।इति ।।

अर्थात् यदा सूर्यचन्द्रौ एकस्मिन् राशौ एकस्मिन्नंशे वर्त्तेते तदा सूर्यमण्डल स्याधः– प्रदेशवर्त्तिनि मण्डले चन्द्रस्तिष्ठति । तेन सूर्यस्य प्रखरेण तेजसा चन्द्रकिरणाः साकल्येनाभिभूता न प्रकाशन्ते । तदनन्तरं यदा क्रमशः शीघ्रगत्या चन्द्रः सूर्यमुल्लंघ्य प्राचीं गच्छति तदा तस्य पञ्चदशांशः दर्शनयोग्यो भवन्ति । सोऽयं भागः प्रथमकलेत्यभिधीयते । तत्कलानिष्पत्तिपरिमितः कालः प्रतिपत्तिथिर्भवति ।यथा यथा चन्दः सूर्य्याद्दूरतरं

गच्छति तथा तथा चन्द्रस्य शुक्लिमा वर्द्धते । अनयैव रीत्या यथा यथा चन्द्रः सूर्य्यस्य निकटतरो भवति तथा तथा तस्य कृष्णत्वं वर्द्धते । अतः सर्वाधिको विप्रकर्षः पौर्णमासी सर्वेधिकसन्निकर्षश्चामावास्येति । एवं सूर्य्यरश्मौ चन्द्रस्य प्रवेशनिर्गमौ भवतु , अथवा बह्न्यादिदेवतानां कलापानादिकं भवतु सर्वथा कलाप्रयुक्ता एव प्रतिपदादितिथयो भवन्ति ।अतः चान्द्रदिवसः एव तिथिशब्देन बोध्यते । सौरदिवससावन- दिवसयोः सन्देहाभावत् चान्द्रदिवससंज्ञकस्य तिथेः निर्णयः क्रियते ।

स च तिथिः त्रिविधः । खर्वो दर्पो हिंस्रश्चेति । सावनदिवसवत् चान्द्रदिवसः प्रति दिनं समानकालात्मको न भवति तत्र ह्रासवृद्ध्योः सद्भावात् । तिथयः षष्टिदण्डा- त्मिकाश्चेत् ताः खर्वा इत्युच्यन्ते । याः षष्टिदण्डापेक्षयाऽधिकास्ता दर्पाः,याश्च न्यूनास्ता हिंस्रा इति कथ्यन्ते ।अत एव गर्गवचनमुत्थाप्य माधवाचार्य्येण प्रतिपादितं यत् -

खर्वो दर्पस्तथा हिंस्रस्त्रिविधं तिथिलक्षणम् ।
धर्माधर्मवशादेवं तिथिस्त्रेधा विवक्षिताः ।। इति ।।

तत्र खर्वा नाम समा तिथिः । दर्पा वृद्धिमती । हिंस्रा क्षययुक्ता । पुनश्च तिथिः द्विविधा। सम्पूर्णा खण्डा चेति । सूर्योदयात् पुनरुदयं यावत् सम्पूर्णा , दिवसे तिथ्यन्तरयुक्ता खण्डा । सम्पूणायां तिथौ विधिनिषेधयोर्नास्ति सन्देहः । खण्डायान्तु सन्देहसद्भावात् तत्र व्यवस्था वर्त्तते। प्रसङ्गेऽस्मिन् माधवाचार्येण गर्गवचनमुत्थाप्य प्रतिपादितं यत् -

निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः ।
विधिः पूज्यतिथौ तत्र निषेधः कालमात्रके ।।
तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ।
निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्ष्यते ।। इति ।।

स्वानुशीलनप्रश्नाः

१. दशपूर्णिमयोरुत्पत्तिः कथं भवति ?
-----------------
२. का नाम तिथेः पूज्यता ?
-----------------
३. खण्डातिथेः किं लक्षणम् ?
-----------------

चान्द्रपक्षो मासो वा प्रतिपद्यते प्रारभ्यते यस्यां सा तिथिः प्रारम्भवाचिना प्रतिपच्छब्देन व्यवह्रीयते । वेदेषु बहुत्र प्रतिपच्छब्दः प्रारम्भमेव बोधयति । तस्मात् प्रथमेति स्थाने प्रतिपदिति प्रयोगः तिथिविषये सर्वत्र धर्मशास्त्रेषु कृतः । ततश्च द्वितीया- तृतीया- दितिथयः प्रवर्त्तन्ते । एताश्च तिथयः शुद्धाविद्धाभेदेन द्विविधा अपि भवन्ति । सूर्य्योदयादारभ्य या तिथिः षष्टिदण्डात्मिका सा शुद्धा। सर्वाः शुद्धातिथयः

षष्टिदण्डात्मिकाः , परन्तु सर्वाः षष्टिदण्डात्मिकाः तिथयः शुद्धा न भवन्ति । याश्च तिथ्यन्तरयुक्ताः ता विद्धाः । शुद्धायामनुष्ठाने सन्देहाभावात् विद्धाविषये निर्णय आवश्यकः । प्रतिपत् पूर्वदिने अमावास्यया सह परदिने च द्वितीयया सह युक्ता भवति । अतः पूर्वदिने प्रतिपत् अमावास्याविद्धा ,अथात् पूर्वविद्धा , परदिने च द्वितीयाविद्धा अर्थात् परविद्धेति कथ्यते । द्विविधयोरेतयोः तिथ्योर्मध्ये कस्यां तिथौ कर्म करणीयं कस्यास्तिथेश्च पूज्यता विद्यत इति प्रतिपादनार्थं नानावचनानि माधवाचार्येण संगृह्य समुपस्थापितानि । तत्र प्रतिपद्विषये उक्तं यत् - प्रतिपत् सम्मुखी ग्राह्या । सम्मुखी नाम सायाह्नव्यापिनीति हेतोः पूर्वविद्धैव ग्राह्येति प्रतीयते । पुनश्च विधिरयमुपवासविषये ज्ञेयः । व्रतादिविषये च परविद्धापि भवितुमर्हति । एते च सायाह्ना ऽपराह्णादि कालविशेषाः सावन- दिवसस्य भागविशेषा भवन्ति ।

स्वानुशीलनप्रश्नाः

१. प्रतिपच्छब्दस्य कोऽर्थः ?

-----------------

२. प्रतिपत् पूर्वविद्धा परविद्धा वा ?

------------------

३. का नाम सम्मुखी तिथिः ?

------------------

## III.4 दिवसस्य पञ्चधा विभागविशेषाः

सावनाहोरात्रस्य यो दिवाभागः स मतभेदेन पञ्चधा विभाजितः । यथा-द्विधा विभागः ,त्रेधा विभागः ,चतुर्धा विभागः ,पञ्चधा विभागः ,पञ्चदशधा विभागश्चेति । तत्र द्विधा विभागपक्षे पूर्वाह्णः अपराह्णश्च । आवर्त्तनात्पूर्वं पूर्वाह्णः ,ततः परञ्चापराह्णः इति । पूर्वाह्णो देवानां कृते अपराह्णश्च पितॄणां कृते परिकल्पितः । अतः श्राद्धविषये पूर्वाह्णादपराह्णो विशिष्यत इति मनुवचनं माधवाचार्येण कालमाधवे उदाहृतं यथा-

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ।
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते ।।इति ।।

त्रेधा विभागपक्षे पूर्वाह्णः ,मध्याह्नः,अपराह्णश्चेति त्रयो विभागा भवन्ति । तत्र प्रति विभागं मुहूर्त्तपञ्चकं कल्पितम् । अर्थात् प्रथमपञ्चमुहूर्त्तात्मककालः पूर्वाह्णः ,ततः तावान् कालो मध्याह्नः ततश्च तावान् कालोऽपराह्ण इति । एतेषु पूर्वाह्णे देवा अशनमभ्यवहरन्ति , मध्याह्ने मनुष्याः अपराह्णे पितरश्चेति । अत एवोक्तं पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणामिति । एवं चतुर्द्धाविभागपक्षोऽपि गोभिलेन प्रदर्शितः । तद्यथा-पूर्वाह्णः,मध्याह्नः, अपराह्णः, सायाह्नश्चेति ।प्रसङ्गेऽस्मिन्नुक्तं माधवाचार्येण कालमाधवे यत् -

पूर्वाह्णः प्रहरं सार्द्धं मध्याह्नः प्रहरं तथा ।
आतृतीयादपराह्णः सायाह्नश्च ततःपरम् ।।इति ।।

अत्र सर्वे भागाः पूर्ववन्न समानाः । पूर्वाह्णः सार्द्धप्रहरात्मकः अर्थात् सार्द्धचतुर्घण्टा- त्मकः । मध्याह्नस्तु प्रहरात्मकः, अर्थात् घण्टात्रयात्मकः ।अपराह्णश्च केवलं सार्द्धघण्टापरिमितः। ततः सायाह्नः प्रहरात्मकः अर्थात् घण्टात्रयात्मकः । एतेन चतुर्णां भागानां समता न दृश्यते । तदनन्तरं पञ्चधाविभागपक्षे प्रतिभागं मुहूर्त्तत्रयात्मकं दृश्यते । ते च भागाः प्रातः-पूर्वाह्ण-मध्याह्ना-ऽपराह्ण-सायाह्नश्चेति । ते सर्वे भागाः समाना भवन्ति । अर्थात् सूर्योदयान्मुहूर्त्तत्रयं यावत् प्रातः ,ततः मुहूर्त्तत्रयं पूर्वाह्णः ,ततश्च मुहूर्त्तत्रयं मध्याह्नः ,तदनन्तरं मुहूर्त्तत्रयमपराह्णः ततो मुहूर्त्तत्रयं सायाह्नश्चेति । प्रसङ्गेऽस्मिन् व्यासवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

मुहूर्त्तत्रितयं प्रातस्तावानेव तु सङ्गवः ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः ।
सायाह्नस्त्रिमुहूर्त्तस्तु सर्वधर्मबहिष्कृतः ।। इति ।।

अत्र सङ्गवशब्देन पूर्वाह्ण एव बोध्यते । सर्वेभ्यो भागेभ्यः पञ्चधा विभाग पक्षः सर्वेषु श्रौतस्मार्त्तकर्मसु भूयस्त्वेनोपयुज्यते । पञ्चदशधाविभागपक्षे एकैको मुहूर्त्तः एकैकं भागं बोधयति। तेषां पञ्चदशमुहूर्त्तानां नामानि शङ्खोक्तानि माधवेन प्रदर्शितानि यथा-

रौद्रश्चैत्रश्च मैत्रश्च तथा शालकटः स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्वः कुतपस्तथा ।।
रौहिणश्च विरिञ्चश्च विजयो नैर्ऋतस्तथा ।
महेन्द्रो वरुणश्चैव भेदाः पञ्चदश स्मृताः ।।इति ।।

अत्र भेदा इति स्थाने भगा इति पाठान्तरं दृश्यते । तच्च समीचीनम् ,यतो ह्यस्मिन् श्लोकद्वये चतुर्दशमुहूर्त्तानामेव नामानि दृश्यन्ते । अतः भगसंज्ञकमुहूर्त्तेन सह एते पञ्चदशमुहूर्त्ताः। एतेषु एकैकस्य भागस्य एकैकमुहूर्त्तत्वं कल्पितम्। एतेषां विनियोगविषयेऽग्रे चर्च्चा करिष्यते।

स्वानुशीलनप्रश्नाः

१. सावनदिवसस्य कति भागाः सन्ति ?

----------------

२. त्रेधा विभक्तस्य दिवसस्य के भागाः ?

-----------------

३. पञ्चधाविभक्तस्य भागाः के ?

----------------

४. दिवसे मुहूर्त्तानां कानि नामानि ?

## III.5 युग्मवाक्यम्

एकस्मिन् दिने तिथिद्वयस्य सद्भावे पूर्वातिथिः परां ,परा च पूर्वां विध्यतीति नियमो विद्यते । शुक्ले पक्षे कृष्णपक्षे च सामान्येन त्रिभिर्मुहूर्तैः पूर्वातिथिः परां ,परा च पूर्वां विध्यति । प्रसङ्गेऽस्मिन् माधवाचार्य्येण पैठीनसिवचनमुत्थाप्य प्रतिपादितं यत् –

पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम् ।
त्रिभिर्मुहूर्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः ।। इति ।।

अर्थात् पूर्वेद्युरुदयानन्तरमावास्या त्रिमुहूर्त्ता चेत्सा प्रतिपदं विध्यति ,परेद्युरस्तमयात्प्राक् द्वितीया त्रिमुहूर्त्ता चेत् सा पूर्वां प्रतिपदं विध्यति । एवमुभयतो विद्धयोः दिनद्वयवर्त्तिन्योः प्रतिपदोर्मध्ये पूर्वा ग्राह्या उत्तरा वेति शङ्कायाः समाधानार्थं युग्मवचनस्यावश्यकता विद्यते । तच्च युग्मवचनं व्यासोक्तं निगमवचनमित्युच्यते । तद्वचनं यथा–

युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः ।
रुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा ।।
प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम् ।। इति ।।

अत्र युग्मादिशब्दाः तिथिप्रतीकभूताः । अर्थात् युग्मं नाम द्वितीया , अग्निः तृतीया युगं चतुर्थी , भूतं पञ्चमी ,षट् षष्ठी, मुनिः सप्तमी , वसुः अष्टमी , रन्ध्रं नवमी ,रुद्र एकादशी । एतानि सप्त युग्मानि भवन्ति । एतेषु पक्षद्वयेऽपि पूर्वा तिथिरुत्तरविद्धा ,उत्तरा च पूर्वविद्धा ग्राह्या । अर्थात् द्वितीया तृतीयाविद्धा ,तृतीया च द्वितीयाविद्धा ग्राह्या । एतेन द्वितीया प्रतिपद्विद्धा न ग्राह्या न वा तृतीया चतुर्थी विद्धा ।तद्वत् चतुर्थी पञ्चमीविद्धा पञ्चमी च चतुर्थी विद्धा ग्राह्या । एतेन चतुर्थी यथा तृतीयाविद्धा न ग्राह्या तथा पञ्चम्यपि षष्ठीविद्धा न ग्राह्येति प्रतीयते । एवं प्रकारेण षष्ठी सप्तमीविद्धा , सप्तमी च षष्ठीविद्धा ग्राह्या । तेन षष्ठी पञ्चमीविद्धा न ग्राह्या , सप्तमी चाष्टमीविद्धा न ग्राह्येति ज्ञायते । तद्वत् अष्टमी नवमीविद्धा , नवमी चाष्टमीविद्धा ग्राह्या । एतेनाष्टमी सप्तमीविद्धा यथा न ग्राह्या तथा नवमी दशमीविद्धापि न ग्राह्या भवति । एवमेकादशी द्वादशीविद्धा , द्वादशी चैकादशीविद्धा ग्राह्या । तस्मादेकादशी दशमीविद्धा न ग्राह्या नापि द्वादशी त्रयोदशीविद्धा ग्राह्या । पुनश्च चतुर्दशी पूर्णिमाविद्धा , पूर्णिमा च चतुर्दशीविद्धा ग्राह्या । एतेन शुक्लचतुर्दशी त्रयोदशीविद्धा न ग्राह्या न वा पूर्णिमा कृष्णप्रतिपद्विद्धा ग्राह्या भवति । तद्वच्च शुक्लप्रतिपदमावास्याविद्धा ग्राह्या ,अमावास्या च शुक्लप्रतिपद्विद्धा ग्राह्या । एतेन शुक्लप्रतिपद् द्वितीयाविद्धा न ग्राह्या , अमावास्या च कृष्णचतुर्दशीविद्धा न ग्राह्या भवति । एतद्युग्मवाक्यं चतुर्दश्या च पूर्णिमेति युग्मात् केचित् शुक्लपक्षपरकमेवेति वदन्ति । तन्न

समीचीनम् । प्रतिपद्यप्यमावास्येति युग्मस्योभयपक्षपरकत्वावगतेः सर्वं युग्मवचनमुभयपक्षपरकमित्यभिप्रायः ।

स्वानुशीलनप्रश्नाः

१. किं नाम युग्मवचनम् ?

----------------

२. कति युग्मानि ?

----------------

३. आपस्तम्बोक्तं युग्मवाक्यं किम् ?

----------------

४. युग्मवाक्यं शुक्लपक्षपरकमुभयपक्षपरकं वा ?

----------------

एतेन व्यासोक्तयुग्मवचनेन सह कदाचिदापस्तम्बोक्तयुग्मवचनस्यापि विरोधो जायते । यतो हि तेन किञ्चिदन्यथा प्रतिपादितम् ।तद्यथा-प्रतिपत् सद्वितीया स्यात् द्वितीया प्रतिपद्युता । इति । अत्र तुल्यबलविरोधे विकल्प इति न्यायेन विकल्पमत्र व्यवस्थितं कृत्वोभयोर्वचनयो-रेकवाक्यता सम्पादनीया ।अर्थात् शुक्लप्रतिपदमावास्या विद्धा भवतु ,कृष्णप्रतिपच्च कृष्ण- द्वितीयाविद्धा । एतेनोभयोर्वचनयोर्विरोधः परिहर्तुं शक्यते । तद्वत् कृष्णद्वितीया कृष्णप्रति- पद्विद्धाऽस्तु शुक्लद्वितीया च शुक्लतृतीयाविद्धा । तथा सति न कोऽपि विरोधो भवति ।अथवा उपवासविषये शुक्लप्रतिपदमावास्याविद्धा भवतु व्रतविषये च शुक्लद्वितीयाविद्धा ।तथा सति न कोऽपि विरोधोऽपि भवितुमर्हति । एवं प्रकारेण युग्मवचनमाश्रित्य तिथीनां पूर्वविद्धत्वे परविद्धत्वे च पूज्यतां ज्ञात्वा तदनुसारेण व्रतोपवासादीनामनुष्ठानं करणीयम् ।

## III.6 कर्मकालवचनस्य स्वरूपम्

निर्दिष्टस्य कर्मणः निर्दिष्टः कालो धर्मशास्त्रे विहितः। यस्य कर्मणो यः कालस्तस्मिन् काले तत्कर्म यदि न क्रियेत तर्हि तत् फलं न ददाति । तस्माच्च कालकर्मणोर्मध्ये- ऽङ्गाङ्गिभावः परिकल्पितः । एतच्च कर्मकालवचनं बौधायनेन प्रदर्शितं कालमाधवे दृश्यते यथा-

यो यस्य विहितः कालः कर्मणस्तदुपक्रमे ।
तिथिर्याभिमता सा तु कार्य्या नोपक्रमोज्झिता ।।इति ।।

एतेन कर्मण आरम्भे अन्ते च तत्कृते विहितः कालोऽवश्यमेव स्यादिति तात्पर्य्यम् । अर्थात् दैवकर्मणः कालः पूर्वाह्णः । तत्कर्म यदि मध्याह्नेऽपराह्णे वा क्रियेत , तर्हि तत् फलं नददाति । अतो यथाकालं कर्म कर्त्तव्यमित्यभिप्रायः । यत्तु देवलादिप्रयुक्तसाकल्यवचनानुसारेण या तिथिः सूर्योदयकाले न्यूनातिन्यूनतया मुहूर्त्तत्रयव्यापिनी विद्यते दैवकर्मणः कृते सा समग्रेऽपि दिवसे, या च सूर्य्यास्तसमये न्यूनातिन्यूनतया मुहूर्त्तत्रयव्यापिनी विद्यते पितृकर्मणः कृते सापि समग्रदिवसे विद्यत इत्युच्यते । एतेनोदयत्रिमुहूर्त्तानन्तरं ज्योतिःशास्त्रादृष्ट्या तिथ्यन्तरव्याप्तावपि साकल्य–वचनेन पूर्वतिथेः व्याप्तिं धर्मशास्त्रदृष्ट्या आपाद्य दैवं कर्म तत्र क्रियते । तद्वत् पितृकर्मापि बोद्धव्यम् । तच्च साकल्यवचनं किमिति वीक्षायाकालमाधवे प्रतिपादितं यत् –

यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
तिथिः सा सकला ज्ञेया दानाध्ययनकर्मसु ।।
यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीप्रियः ।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्ता यदा भवेत् ।। इति ।।

## III.7 पारणविचारः

पारणं नाम कर्माङ्गभोजनम् ।“ पार ” समाप्तावित्यस्माद्धातोः ल्युट्प्रत्यये कृते पारणमितिशब्दो निष्पद्यते । अतः सामान्येन व्रतसमाप्तिरेव पारणशब्दस्यार्थः । वस्तुतः पूर्वदिने उपवासं कृत्वा तत्परदिने पारणरूपेण व्रताङ्गभोजनेन उपवासस्य समाप्तिः क्रियते । यस्यां तिथौ यस्मिन्नक्षत्रे वोपवासः कृतः तत्परदिने तस्मिन् तिथौ तस्मिन् नक्षत्रे च विद्यमाने सति पारणं निषिद्धम् । अतः तिथ्यन्ते नक्षत्रान्ते च पारणं कर्त्तव्यमिति तात्पर्य्यम् अन्यथा व्रतभङ्गो जायते । अत एव सुमन्तुवचनमुत्थाप्य माधवाचार्य्येण प्रतिपादितं यत् –

तिथिनक्षत्रनियमे तिथिभान्ते च पारणम् ।
अतोऽन्यथा पारणे तु व्रतभङ्गमवाप्नुयात् ।। इति ।।

परन्तु निशीथव्यापिव्रतेषु जन्माष्टमीशिवरात्रिप्रभृतिषु तद्दिने सम्यगुपवासं कृत्वा तत् परदिने दिवसाभ्यन्तरे तिथिनक्षत्रयोरन्यतरस्य समाप्तावपि पारणं कर्त्तुं शक्यते । यद्यन्य– तरस्यापि समाप्तिः चतुर्थप्रहरात् पूर्वं नैव सम्भाव्यते , तर्हि तिथिमध्ये नक्षत्रमध्ये च प्रातरेव पारणमपिकर्त्तुं शक्यते । प्रसङ्गेऽस्मिन्नुक्तं कालमाधवे यत् –

तिथ्यन्ते चैव भान्ते च पारणं यत्र चोद्यते ।
यामद्वयोर्ध्ववर्त्तिन्यां प्रातरेव हि पारणम् ।। इति ।।

अनेन सामान्यतः पातरेव पारणस्य कर्मकाल इति ज्ञायते । पुनश्च “उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेदिति ” देवलवचनानुसारेणापि पारणस्य कर्मकालः पूर्वाह्ण इत्यपि प्रतीयते । एवं व्रतोपवासादिकृते विहितासु व्यवस्थासु यदि कुत्रचित् सन्देहो भवति , तर्हि शिष्टानामुपदेशेन परम्परां चानुसृत्यापि कर्म करणीयं भवति ।

स्वानुशीलनप्रश्नाः

१. कर्मकालवचनस्य किं स्वरूपम् ?

-----------------

२. किं नाम साकल्य वचनम् ?

------------------

३. पारणशब्दस्य कोऽर्थः ?

-----------------

४. पारणं कदा कर्त्तव्यम् ?

------------------

५. निशीथव्यापिव्रतेषु पारणं कथं कर्त्तव्यम् ?

------------------

## III.8 एकभक्तम्

सम्पूर्णेऽहोरात्रे एकवारं भोजनमेव व्रतस्यास्य स्वरूपम् । एकभक्तं त्रिविधम् । स्वतन्त्रं ,अन्याङ्गं , उपवासप्रतिनिधिरूपञ्चेति । अस्य व्रतस्य कः कर्मकालः किं च स्वरूपमिति वीक्षायां माधवाचार्य्येण देवलवचनं स्कन्दपुराणवचनञ्चोत्थाप्य प्रतिपादितं यत् -

दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण तु ।। इति ।।

अपि च

दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हि ।। इति ।।

अतो दिवसस्य मध्याह्नादुपरि सार्द्धमुहूर्त्तपरिमितः कालः एकभक्तस्य मुख्यः कर्मकालः इति । तस्मिन् काले एकवारं भुक्त्वा रात्रौ न किमपि भुञ्जीत । तदनन्तरं सूर्य्यास्तात् प्राक् वर्त्तमानो गौणकालः इति ।अत एवोक्तं स्कन्दपुराणे-मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथि- रिति । एकभक्तस्य दैवत्वे यद्यपि पूर्वाह्ण एव कर्मकाल इति सामान्यवचनात् प्रतीयते , तथापि विशेषवचनान्मध्याह्न एव कर्मकाल इत्यवगन्तव्यम् । यस्यां तिथौ एकभक्तमिष्यते सा पूर्वविद्धा परविद्धा वेति उपवासवदत्र नैव विचारणीयम् ; तद्वचनापेक्षया कर्मकालवचनस्य प्राबल्यात् ।

तच्चैकभक्तं षोढा भिद्यते । पूर्वेद्युर्मध्याह्नव्यापित्वं ,परेद्युरेव मध्याह्नव्यापित्वं ,उभयत्र तद्व्यापित्वं ,नोभयत्र तद्व्यापित्वं ,उभयत्र साम्येन तदेकदेशव्यापित्वं ,उभयत्र वैषम्येण तदेक- देशव्यापित्वञ्च । तत्र प्रथमपक्षे एकभक्तं पूर्वद्युरेव ।द्वितीयपक्षे परेद्युः । तृतीयपक्षे दिनद्वये मुख्य- कालव्याप्तेः समत्वेऽपि गौणकालव्याप्तेराधिक्यात् पूवेद्युरेव । चतुर्थपक्षे दिनद्वये मुख्यकाल- व्याप्त्यभावस्य समत्वेऽपि गौणकालव्याप्तिलाभात् पूवेद्युरेव । पञ्चमपक्षे उभयत्र साम्येन मुख्य- कालस्य तदेकदेशव्यापित्वेऽपि गौणकालव्याप्तेराधिक्यात् पूवेद्युरेव । षष्ठपक्षे तु यदा पूर्वेद्यु- र्मध्याह्नैकदेशमधिकं व्याप्नोति , तदानीं तदाधिक्यात् गौणकालव्याप्तेश्च पूर्वेद्युरेव ग्राह्या । यदा परेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति ,तदा गौणकालव्याप्त्यभावेऽपि मुख्यकालव्याप्त्याधिक्यानु- सारेण परेद्युर्ग्राह्या । अयञ्च निर्णयः स्वतन्त्रैकभक्ते वेदितव्यः ।

अन्याङ्गैकभक्ते त्वङ्गिनः पूजादेः मध्याह्नविहितत्वेन तदङ्गस्यैकभक्तस्याप- राह्णादौ गौण-कालेऽनुष्ठातुं शक्येत । उपवास प्रतिनिधिरूपे एकभक्ते तु उपवासतिथावेव एकभक्तं कार्य्यम् । प्रसङ्गेऽस्मिन् सुमन्तुवचनमुत्थाप्य माधवाचार्य्येण प्रतिपादितं यत् - "तिथौ यत्रोपवासः स्यादेकभक्तेऽपि सा तथा ।" इति ।

उपवासव्रतादिषु प्रक्रान्तेषु रोगादिना तत्कर्तुमसमर्थः गुर्वनुज्ञया जलमूलफलादि- भक्षणपूर्वकं यदि तत् करोति ,तर्हि तस्य व्रतं न नश्यति । यतो हि तान्यव्रतघ्नानीति कथ्यन्ते । एवमष्टौ सन्ति अव्रतघ्नानि । तानि कालमाधवे प्रतिपादितानि यथा-

> अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
> हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ।। इति ।।

स्वानुशीलनप्रश्नाः

१. एकभक्तव्रतस्य किं स्वरूपम् ?

----------------

२. एकभक्तव्रतस्य कः मुख्यकर्मकालः ?

-----------------

३. उभयत्र मध्याह्नव्याप्तौ कदा व्रतं कार्य्यम् ?

----------------

४. कान्यव्रतघ्नानि ?

-----------------

## III.9 नक्तव्रतम्

नक्तशब्दो भोजनपरः न कालपरः नक्तं कुर्वीतेति प्रयोगात् । न हि कालः केन चित् कर्त्तुं शक्येत । तस्मात् भोजनस्य रात्रौ विधिरिति व्रतस्योद्देश्यम् । अतः दिवा भोजनरहितत्वे सति रात्रिभोजनमेव व्रतस्य स्वरूपम् ।अस्य व्रतस्याङ्गं विष्णुपूजनं होमादिकञ्चेति नक्तस्य काल-विषये भविष्यत्पुराणवचनमुत्थाप्य माधवाचार्य्येण प्रतिपादितं यत् -

मुहूर्त्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः ।
नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप ! ।।इति ।।

एतेन कालद्वयं नक्तव्रतस्य यत् प्रतिपादितं तदधिकारिभेदेन देवलेन व्यवस्थितं यथा-

नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम् ।
यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते ।।इति ।।

पुनश्च नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्य्यात् तत्सदिवाकरम् ।।
सदिवाकरन्तु तत्प्रोक्तमन्तिमे घटिकाद्वये ।
निशानक्तं तु विज्ञेयं यामार्द्धे प्रथमे सदा ।।इति ।।

एतेन नक्तव्रतस्य मुख्यकर्मकालः प्रदोषः नक्तं प्रदोषव्यापिन्यां तिथौ च कार्य्यमिति वत्सवचनमुट्टङ्क्य माधवाचार्येण प्रतिपादितम् तद्यथा-

प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः ।
एकादशीं विना सर्वाः शुक्ले कृष्णे तथा स्मृता ।।इति ।।

एतेन एकादश्यां यन्नक्तं तत् हरिनक्तं , तत्र चोदयव्यापिनी तिथिर्ग्राह्या ।एवं प्रकारेण सामान्यनक्ते प्रदोषः मुख्यकर्मकालः, ततः पूर्वं सायाह्नः गौणकर्मकालत्वेनाऽभ्यनुज्ञायते । तत्र प्रदोषः क इत्यपेक्षायामुक्तं यत् "प्रदोषोऽस्तमयादूर्ध्वंघटिकात्रयमिष्यते "," त्रिमुहूर्त्तः प्रदोषः स्याद् भानावस्तं गते सति"। अत्र घटिकात्रयं मुहूर्त्तत्रयञ्चेति प्रदोषस्य यत्परिमाणद्वयं दृश्यते , तत्रास्तमयात् समनन्तरवर्त्तिघटिकात्रयस्य निद्रामैथुनभोजनादिनिषिद्धकालत्वात् तत्परवर्त्ति-घटिकात्रयमेव नक्तभोजनकाल इति मन्तव्यम् । अतःसूर्य्यास्तादनन्तरं प्रथमघटिकात्रयं विहाय परवर्त्तिघटिकात्रयमेव नक्तव्रतस्य मुख्यकर्मकालः । यदि प्रदोषव्याप्तिर्न लभ्यते ,तर्हि सायाह्ने गौणकाले भोजनं कुर्वीत ।

सप्तमी-भानुवासरादौ सौरनक्तं विहितम् ।तत्र सायंकलव्याप्तिः मुख्यकल्पः । प्रदोष- व्याप्तिश्च गौणकल्पः इति । एकभक्तवत् नक्तव्रतस्यापि षोढाविभागो वर्त्तते । पूर्वेद्युः प्रदोष- व्यापित्वं,परेद्युरेव प्रदोषव्यापित्वं ,उभयत्र तद्व्यापित्वं , नोभयत्र तद्व्यापित्वं , उभयत्र साम्येन तदेकदेशव्यापित्वं,उभयत्र वैषम्येण तदेकदेशव्यापित्वञ्च ।तत्र प्रथमपक्षे नक्तं पूर्वेद्युरेव ।द्वितीयपक्षे परेद्युः।तृतीयपक्षे दिनद्वये

मुख्यकालव्याप्तेः समत्वेऽपि गौणकालव्याप्तेराधिक्यात्परेद्युरेव । चतुर्थ- पक्षे दिनद्वये मुख्यकालव्याप्त्यभावस्य समत्वेऽपि गौणकाल व्याप्तिलाभात् परेद्युरेव ।पञ्चमपक्षे उभयत्र साम्येन मुख्यकालस्य तदेकदेशव्यापित्वेऽपि गौणकालव्याप्तेराधिक्यात् परेद्युरेव ।षष्ठपक्षे तु यदा पूर्वेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति ,तदानीं तदाधिक्यात् गौणकालव्याप्तेश्च परेद्युरेव ग्राह्या ।एतच्चस्वतन्त्रनक्तव्रते वेदितव्यम् । अन्याङ्गनक्ते उपवासप्रतिनिधिरूपे नक्ते च एकभक्तवद् व्यवस्था द्रष्टव्या ।

## III.10 अयाचितम्

न याचितमयाचितम् ।यस्मिन् व्रते याचितभोजनं निषिद्धं तद्व्रतम् ।“ अस्मिन्नहोरात्रे याचितमन्नं न भोक्षे ”इति एतावान् सङ्कल्पः क्रियते ।अत्र याचितादन्यदयाचितमित्यप्रयत्न- लभ्यस्य परदत्तस्य भोजनं विवक्ष्यते । तस्य पराधीनत्वात् तत्र कालविशेषो न विधातुं शक्यते अयाचित। यद्यपि स्वगृहे पूर्वसञ्चितं वस्तु सम्प्रति अयाचितं भवति तथापि पूर्वप्रयत्न- सम्पादितत्वात् तदयाचितमेव ।अतःअयाचितशब्दः सर्वदा परद्रव्यमेव विषयीकरोति । अयाचित- शब्दो द्वेधा व्यवहृतो दृश्यते । एकः पर्युदासपरकः ,अपरश्च प्रसज्यप्रतिषेधपरकः । तत्र “त्र्यह-मद्यादयाचितम् ”इत्यत्र पर्युदासरूपः,“अथापरं त्र्यहं न कञ्चन याचेत” इत्यत्र प्रसज्यप्रतिषेधरूपो दृष्टः । यद्भवतु व्रतस्यास्य कालविशेषाभावात् यदा कदापि यस्मात् कस्मात्यत् किमपि भोज्यं वस्तु ग्रहीतुं शक्यते । परन्तु लब्धाद् भोज्यद्रव्यात् केवलं दशग्रासा एव ग्राह्याः ।प्रसङ्गेऽस्मिन् चतुर्विंशतिमतात् संगृह्य माधवाचार्य्येण प्रतिपादितं यत् -

स्वानुशीलनप्रश्नाः

१. नक्तव्रतस्य किं स्वरूपम् ?

-----------------

२. नक्तव्रतस्य कः मुख्यकर्मकालः ?

-----------------

३. उभयत्र प्रदोषव्याप्तौ कदा नक्तं कार्य्यम् ?

-----------------

४. अयाचितस्य किं स्वरूपम् ?

-----------------

प्रातस्तु द्वादश ग्रासा नक्ते पञ्चदशैव तु ।
अयाचिते तु द्वौ चाष्टौ प्राजापत्यो विधिः स्मृतः ।।इति ।।

एतेन व्रतेऽस्मिन् मितभोजित्वं बोध्यते । अत्र नियतकाल विशेष विधे- रभावात् उपवासवत् शुक्लकृष्णप्रतिपदौ पूर्वोत्तरविद्धे यथाक्रमं ग्राह्ये ।

## सारांशः

अस्मिन् खण्डे तिथिशब्दस्य व्युत्पत्तिं स्वरूपञ्च प्रतिपाद्य तस्य भेदाः उपयोगश्च प्रतिपादिताः । तदनन्तरं सावनदिवसस्य प्रातः पूर्वाह्ण-मध्याह्नाऽ-पराह्ण-सायाह्नादिपञ्चधा विभागा निरूपिताः । ततो दिवसे विद्यमानानां पञ्चदशमुहूर्त्तानां नामानि स्वरूपञ्च प्रदर्श्य व्यासोक्तयुग्मवचनं व्याख्याय तस्योपयोगोऽप्यत्र प्रतिपादितः । तदनन्तरमापस्तम्बोक्तयुग्मवचनं प्रतिपाद्य तेन सह व्यासोक्तयुग्मवचनस्य विरोधे तस्य परिहारोऽपि प्रदर्शितः । ततः चान्द्र- दिवसस्य विभागान् प्रतिपाद्य शुक्ल-कृष्णपक्षयोरहोरात्राणां पृथक् पृथक् दिवसनामानि रात्रिनामानि च क्रमेण प्रतिपादितानि । ततश्च कर्मकालवचनस्य स्वरूपमुयोगश्च प्रदर्श्य पारणस्य स्वरूपं विवेचितम् । तदनन्तरमेकभक्तनक्तव्रतयोः स्वरूपं तयोश्च कर्मकालं प्रतिपाद्य,
अयाचितव्रतस्य स्वरूपमपि माधवाचार्य्योक्तदिशा प्रतिपादितम् ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| अपराह्णः - | पञ्चधा विभक्तदिवसस्य चतुर्थभागः |
| अमाकला - | क्षयोदयरहिता चन्द्रस्य षोडशी कला |
| अमावास्या- | कृष्णपञ्चदशीतिथिः |
| अयाचितम् - | व्रतविशेषः |
| आमश्राद्धम् - | आमान्नेन क्रियमाणं श्राद्धम् |
| उपवासः - | अहोरात्रमभोजनम् |
| उपोषणम्- | उपवासः |
| एकभक्तम्- | मध्याह्ने एकवारभोजनरूपं व्रतम् |
| एकोद्दिष्टम् - | एकमुद्दिश्य क्रियमाणं प्रेतश्राद्धम् |
| खण्डातिथिः- | या तिथिः मध्याह्नात् प्राक् समाप्ता |
| खर्वः - | षष्टिदण्डात्मकः तिथिः |
| चान्द्रदिवसः - | तिथिः |
| त्रुटिः- | निमेषद्वयपरिमितः कालः |
| दर्पः - | षष्टिदण्डापेक्षयाऽधिकदण्डात्मकः तिथिः |
| ध्रुवाकला - | अमाकला |
| नक्तम् - | प्रदोषे एकवारभोजनरूपव्रतविशेषः |
| नाडिका - | दण्डपरिमितः कालविशेषः |
| निमेषः- | लघ्वक्षरोच्चारणार्थमावश्यकः कालः |
| निशीथः- | मध्यरात्रः |
| परविद्धा- | परवर्त्तितिथियुक्ता |

पर्य्युदासः– विधिप्रधानको निषेधः

पारणम् – व्रताङ्गभोजनम्

पार्वणम् – त्रैपुरुषिकं श्राद्धम्

पूर्णिमा – शुक्लपञ्चदशी

पूर्वविद्धा– पूर्ववर्त्तितिथियुक्ता

पूर्वाह्णः – पञ्चधा विभक्तदिवसस्य द्वितीयो भागः

प्रतिपत् – शुक्ले कृष्णे वाऽऽरम्भमाणा प्रथमा तिथिः

प्रतिषेधः – प्रसक्तस्य निषेधः

प्रदोषः – सूर्यास्तात्परं दण्डत्रयपरिमितः कालः

प्राजापत्यः– द्वादशदिनात्मकः प्रायश्चित्तविशेषः

प्राणः– दशत्रुटिपरिमितः कालविशेषः

प्रातः – पञ्चधा विभक्तस्य दिवसस्य प्रथमभागः

मध्याह्नः– पञ्चधा विभक्तस्य दिवसस्य तृतीयभागः

महाकला – ध्रुवाकला अमाकला वा

मुहूर्त्तः – दण्डद्वयपरिमितः कालः

युग्मवाक्यम् – व्यासोक्तं निगमवचनम्

वल्युत्सवः– कार्त्तिकशुक्लप्रतिपदि क्रियमाण उत्सवः

विकल्पः– तुल्यबलविरोधे विकल्पः

विद्धातिथिः– एकस्मिन् दिने तिथ्यन्तरसहिता

विनाडिका – दण्डस्य षष्टितमो भागः

वृद्धिश्राद्धम् – नान्दीमुखिश्राद्धम्

शिष्टाचारः– सदाचारः

शुद्धातिथिः– सूर्य्योदयात्सूर्य्योदयावधि वर्त्तमाना तिथिः

सङ्गवः– पूर्वाह्णः

सम्पूर्णातिथिः – सम्पूर्णदिवसं व्याप्य स्थिता तिथिः

सम्मुखी – सायाह्नव्यापिनी तिथिः

सायाह्नः – पञ्चधा विभक्तस्य दिवसस्य पञ्चमभागः

सावनदिवसः– सूर्य्योदयात्परदिनसूर्य्योदयावधिकः कालः

| | |
|---|---|
| सौरदिवसः - | सौरमासस्य त्रिंशत्तमो भागः |
| हिंस्रः- | षष्टिदण्डापेक्षया न्यूनदण्डात्मकः तिथिः |

## आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) तिथेः स्वरूपं भेदांश्च प्रदर्श्य तस्योपयोगं विवृणुत ।
२) दिवसभेदान् माधवोक्तदिशा प्रतिपाद्य युग्मवचनं व्याख्यात ।
३) कर्मकालवचनस्य स्वरूपं प्रदर्श्य साकल्यवचनस्य तात्पर्य्यं प्रतिपादयत ।
४) एकभक्तस्य स्वरूपं कर्मकालञ्च विलिख्य दिनद्वये मध्याह्नव्याप्तौ निर्णयं विवृणुत ।
५) नक्तव्रतस्य स्वरूपं कर्मकालञ्च प्रतिपाद्य दिनद्वये प्रदोषव्याप्तौ निर्णयं प्रदर्शयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) अयाचितस्य स्वरूपं प्रतिपाद्य तस्य कर्मकालो विद्यते न वेति प्रतिपादयत ।
२) शुद्धा-विद्धतिथ्योः स्वरूपं सोदाहरणं प्रदर्शयत ।
३) युग्मवचनमुल्लिख्य व्याख्यात ।
४) एकभक्तव्रतस्य स्वरूपं कर्मकालञ्च प्रदर्शयत ।

### लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) तिथिशब्दस्य व्युत्पत्तिं प्रदर्शयत ।
२) अयाचितस्यार्थं स्पष्टयत ।
३) नक्तव्रतस्य भेदान् कर्मकालञ्च निरूपयत ।
४) सावनदिवसस्य पञ्चधाविभागान् प्रदर्शयत ।
५) एकभक्तस्य भेदान् कर्मकालञ्च प्रतिपादयत ।
६) साकल्यवचनस्य स्वरूपं प्रदर्शयत ।
७) पारणस्य स्वरूपं विचारयत ।

### एकाङ्कप्रश्नाः (प्रत्येकं १अङ्कः )

१) तिथिः कतिविधः ?
२) चान्द्रदिवसः क उच्यते ?
३) का तिथिः शुद्धा ?
४) का तिथिः विद्धा ?

५) कः खर्वतिथिः ?
६) को दर्पतिथिः ?
७) का तिथिः खण्डा ?
८) को हिंस्रतिथिः ?
९) युग्मवचनं शुक्लपक्षपरकमुभयपक्षपरकं वा ?
१०)का सम्मुखी तिथिः ?
११)एकभक्तस्य को मुख्य कर्मकालः ?
१२)नक्तव्रतस्य को मुख्य कर्मकालः ?
१३)अयाचितव्रतस्य निर्दिष्टकर्मकालोऽस्ति न वा ?
१४)उपवासस्य कः कमकालः ?
१५)दिवसे कति मुहूर्त्ताः सन्ति ?
१६)पारणशब्दस्य कोऽर्थः ?
१७)मुहूर्त्तः कतिदण्डात्मकः ?
१८)त्रुटेः परिमाणः कियान् ?
१९)का विनाडिका ?
२०)अहोरात्रे कतिमुहूर्त्ताः सन्ति ?
२१)प्रातः कियान् कालः ?

एकाङ्कप्रश्नानामुत्तराणि

१)द्विविधः
२) तिथिः
३)उदयादुदयं यावद् वर्त्तमाना
४) तिथ्यन्तरसहिता
५) समतिथिः
६)षष्टिदण्डापेक्षयाऽधिकः
७) मध्याह्नात्पूर्वं समाप्ता
८)षष्टिदण्डापेक्षया न्यूनः
९)उभयपक्षपरकम्
१०)सायाह्नव्यापिनी
११) मध्याह्नः
१२)प्रदोषः
१३)नास्ति
१४)अहोरात्रम्
१५) पञ्चदश
१६)व्रताङ्गभोजनम्
१७)द्विदण्डात्मकः
१८) निमेषद्वयात्मकः
१९)नाडिकायाः षष्टितमो भागः
२०)त्रिंशत्
२१)मुहूर्त्तत्रयात्मकः

********************

# (चतुर्थखण्डः )- कालमाधवस्य प्रतिपद्दान व्रतानीत्यारभ्य प्रतिपत्प्रकरणान्तम्

संरचना

IV.1.प्रस्तावना
IV.2. उद्देश्यम्
IV.3. प्रतिपद्दानव्रतानि
IV.4. एकोद्दिष्टम्
IV.5. एकोद्दिष्टम्

## IV.1 प्रस्तावना

कालमाधवस्य तृतीयप्रकरणे प्रतिपद्दानव्रतानि निर्णीतानि । तत्र व्रतो- पवासादीनां कृते नियतं कालं प्रतिपाद्य दानादीनां कृते कालो निरूपितः । तदनन्तरं पित्र्यनिरूपणप्रसङ्गे प्रथममेकोद्दिष्टश्राद्धस्य स्वरूपं कालश्च प्रतिपाद्य ततः पार्वणश्राद्धस्य स्वरूपं कालश्च निरूप्य तिथिविशेषे श्राद्धकरणे फलविशेषं प्रतिपाद्य ,अपराह्णव्यापिन्याः तिथेः षोढाभेदान् प्रदर्श्य तत्र दिनद्वयेऽपराह्णे तिथिव्याप्तौ निर्णयः प्रदर्शितः ।

## IV.2 उद्देश्यम्

प्रियपाठकाः!अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् अलोचयिष्यन्ति ।

- दानव्रतादीनां कृते तिथीन् निरूपयिष्यन्ति ।
- विभिन्नव्रतानां कर्मकालान् पर्य्यालोचयिष्यन्ति ।
- एकोद्दिष्टस्य स्वरूपं प्रदर्शयितुमर्हन्ति ।
- पार्वणश्राद्धस्य स्वरूपं निरूपयितुमर्हन्ति ।
- खर्वादितिथीनां स्वरूपं प्रतिपादयिष्यन्ति ।
- तिथिविशेषे श्राद्धकरणे फलविशेषं प्रदर्शयितुमर्हन्ति ।
- श्राद्धकालान् विवेचयिष्यन्ति ।

## IV.3 प्रतिपद्दानव्रतानि

विभिन्नासु तिथिषु विभिन्नानि दानानि व्रतानि च पुराणोक्तानि संगृह्य माधवाचार्य्येण कालमाधवे प्रतिपादितानि । तेषु दानमधिकृत्य भविष्योत्तरपुराणवचनमुत्थाप्य माधवाचार्य्येण कालमाधवे प्रतिपादितं यत् –

प्रतिपत्सु द्विजान् पूज्य पूजयित्वा प्रजापतिम् ।
सौवर्णमरविन्दञ्च कारयित्वाऽष्टपत्रकम् ।।
कृत्वा त्वौदुम्बरे पात्रे सुगन्धिघृतपूरिते ।
पुष्पैर्धूपैः पूजयित्वा विप्राय प्रतिपादयेत् ।।इति ।।

पुनश्च ब्रह्मपुराणे फलव्रतमधिकृत्य माधवाचार्य्येण प्रतिपादितं यत् –

मासे भाद्रपदे शुक्ले पक्षे च प्रतिपत्तिथौ ।
नैवेद्यन्तु पचेन्मौनी षोडशत्रिगुणानि च ।।
फलानि पिष्टपक्वानि दद्याद्विप्राय षोडश ।
देवाय षोडशैतानि दातव्यानि प्रयत्नतः ।। इति ।।

एतेषां दानव्रतादीनां दैवकर्मत्वात् "पौर्वाह्णिकास्तु तिथयो दैवे कार्य्ये फल- प्रदाः "इति बृहद्याज्ञवल्क्यवचनानुसारेण पूर्वाह्णव्यापिन्यां तिथावेव तानि कर्माणि कार्य्याणि। अतो दानव्रतादीनां पूर्वाह्णस्यैव कर्मकालत्वात् कर्मकालवचनस्य युग्मवचनापेक्षया प्राबल्याद्युग्म- वचनमत्र बाधकं न भवति । कर्मकालव्याप्तितिथेः प्रयोजकत्वविषये माधवाचार्येण वृद्धयाज्ञ- वल्क्य-स्कन्दपुराण-गार्ग्यवचनान्युत्थाप्य प्रसङ्गेऽस्मिन् प्रतिपादितं यत् –

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ।।इति ।।
यस्मिन् काले तु यत्कर्म तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ।।इति ।।
यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ।।इति ।।

अयञ्च पूर्वाह्णः क इत्यपेक्षायामुच्यते यत् – सावनदिवसस्य पञ्चधाविभागपक्षेऽसौ मुहूर्त्तत्रयात्मकः,चतुर्धाविभागपक्षे सार्द्धप्रहरात्मकः,त्रेधाविभागपक्षे पञ्चमुहूर्त्तात्मकः द्वेधाविभाग- पक्षे सार्द्धसप्तमुहूर्त्तात्मको भवति । एतेषु बहुशास्त्रानुरोधात् पञ्चधाविभागपक्षस्य ग्राह्यत्वे सति मुहूर्त्तत्रयात्मकः कालोऽपेक्ष्यते । तत्रापि यदि दानव्रतादिकमनुष्ठातुं न शक्येत , तर्हि सार्द्धसप्त- मुहूर्त्तात्मकः पूर्वाह्णः स्वीकर्त्तुं शक्यते । तत्राप्यसम्भवे सम्पूर्णोऽपि दिवसोऽभ्यनुज्ञायते। प्रसङ्गेऽ-
स्मिन् साकल्यवचनमेव प्रमाणम् । यथोक्तं देवल-व्यासाभ्याम् –

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।

सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ।। इति ।।
उदयन्नेव सविता यां तिथिं प्रतिपद्यते ।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ।। इति ।।

बौधायनेनापि व्रतोपवासदानादीनां कृते सूर्य्योदयकाले विद्यमाना स्वल्पाऽपि तिथिः वरं न तु सूर्य्योदयं परित्यज्य तदुपरि विद्यमाना प्रभूता तिथिः । अत एवोक्तं तेन-

आदित्योदयवेलायां याऽल्पापि च तिथिर्भवेत् ।
पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विना ।। इति ।।

एवं दैवकर्मणः कृते यथा सूर्य्योदयव्यापिन्यास्तिथेः प्राशस्त्यं तथा पितृकर्मणः कृते सूर्य्यास्तमयव्यापिन्यास्तिथेः प्राशस्त्यं वर्त्तते । तत्रापि सूर्य्योदयकाले तिथिः न्यूनातिन्यूनतया यथा मुहूर्त्तत्रयव्यापिनी भवेत् तथा सूर्य्यास्तमयकालेऽपि । त्रिमुहूर्त्ताभावे द्विमुहूर्त्तोऽपि गौण- कल्पत्वेन स्वीकर्त्तुं शक्यते । यथा प्रतिपादितं माधवाचार्य्येण-

उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।
द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ।।इति ।।

अतः सूर्य्यादये मुहूर्त्तत्रयव्यापिनी प्रतिपद्दानव्रतयोः ग्रहीतव्ये । नात्र शुक्लकृष्ण-पक्षभेदेन काचित् पृथग् व्यवस्था वर्त्तते । अत्रापि एकभक्तवत् षोढाभेदः कल्पयितुं शक्यते । उदयकाले पूर्वेद्युरेव त्रिमुहूर्त्तव्यापिनी ,परेद्युरेव त्रिमुहूर्त्तव्यापिनी,उभयत्र साम्येन वैषम्येण वा त्रिमुहूर्त्तव्यापिनी,एकदेशव्यापिनी चेति ।प्रथमपक्षे नास्ति सन्देहः । द्वितीयपक्षे परेद्युरेव निर्णयः । तृतीयादिषु चतुर्षु पक्षेषु अस्तमयव्याप्तेः कमकालबाहुल्यस्य च लाभात् पूर्वेद्युरेवानुष्ठेयम् ।

स्वानुशीलनप्रश्नाः

१.दानव्रतादीनां कृते तिथिः कीदृशी ग्राह्या ?
-----------------

२. कर्मकालव्याप्तितिथेः किं स्वरूपम् ?
------------------

३. कीदृश्यां तिथौ दैवं कर्म प्रशस्तम्?
-----------------

४. तिथिवेधे न्यूनातिन्यूनतया कियान् दण्डोऽपेक्ष्यते ?
------------------

## IV.4 एकोद्दिष्टम्

पित्र्यं कर्म श्राद्धमित्युच्यते । श्राद्धं नाम अदनीयस्य द्रव्यस्य श्रद्धया पितृभ्यो दानम् । तच्च श्राद्धं द्विविधम् । एकोद्दिष्टं पार्वणञ्चेति । एकमुद्दिश्य क्रियमाणं श्राद्धमेकोद्दिष्टम् । तच्च प्रेतश्राद्धमित्युच्यते ।त्रीन् पुरुषानुद्दिश्य क्रियमाणं श्राद्धं पार्वणम् । अर्थात् त्रैपुरुषिकं वार्षिकं श्राद्धम् । अस्य स्वरूपविषये माधवाचार्येण कण्ववचनमुत्थाप्य प्रतिपादितं यत्-

एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्त्तितम् ।
त्रीनुद्दिश्य तु यतद्धि पार्वणं मुनयो विदुः ।। इति ।।

सर्वाणि मासिकश्राद्धानि एकोद्दिष्टविधिनैव क्रियन्ते । तदतिरिच्य ऊनमासिकं ऊनत्रैमासिकं ऊनषाण्मासिकं , ऊनाब्दिकञ्च एकोद्दिष्टविधिना भवन्ति ।एतेन ज्ञायते यत् सपिण्डीकरणश्राद्धात् प्राक् सर्वाणि षोडश श्राद्धानि एकोद्दिष्टविधानेनैव भवन्ति । प्रसङ्गेऽस्मिन् माधवाचार्य्येण पैठीनसिवचनमुत्थाप्य प्रतिपादितं यत् -

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा ।।
सपिण्डीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्य्याच्छ्राद्धानि तानि तु ।।इति ।।

एकोदिष्टश्राद्धस्य कः काल इति वीक्षायां सामान्येनास्तमयव्यापिनीतिथेः प्राशस्त्येऽपि तत्र मध्याह्नव्यापिनी तिथिरेव ग्राह्या । प्रसङ्गेऽस्मिन् माधवाचार्येण वृद्धगौतम- वचनमुत्थाप्य प्रतिपादितं यत् -

मध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत् ।
अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेत् ।। इति ।।

एवं व्यास-हारीत-शातातपादिभिरपि एकोद्दिष्टस्य मध्याह्न एव कर्मकाल इति प्रतिपादितम् । स च मध्याह्नः दिवसस्य सप्तमाष्टमनवममुहूर्त्तात्मकः । ते च मुहूर्त्ताः गान्धर्व- कुतपरोहिणसंज्ञकाः । तत्रापि कुतपस्य प्रथमभागे एकोद्दिष्टं प्रारभ्य रोहिणमुहूर्त्तं यावत् कुर्यात् । न तु रोहिणं कदाचित् लङ्घयेदिति श्लोकगौतमवचनमुत्थाप्य माधवेन प्रतिपादितम् । तद्यथा-

आरभ्य कुतपे श्राद्धं कुर्यादारोहिणं बुधः ।
विधिज्ञो विधिमास्थाय रोहिणन्तु न लङ्घयेत् ।। इति ।।

एतेन कुतपरोहिणयोर्मध्याह्नगतमध्यम-चरमभागयोः कर्मकालत्वेन व्यव- स्थितयोः सतोः तन्मुहूर्त्तव्यापिनी तिथिरेकोद्दिष्टे ग्रहीतव्या । अत्रापि एकभक्तवत् षोढा भेदा अवतारणीयाः । तत्र केवल-पूर्वेद्युर्मध्याह्नव्याप्ति-केवलपरेद्युर्मध्याह्नव्याप्तिपक्षयोर्नास्ति सन्देहः । उभयत्र तद्व्यापित्वे नोभयत्र तद्व्यापित्वे

च पूर्वदिनेऽपराह्ण-सायाह्णाऽस्तमयादिव्यापित्वात् सामान्यवचनानुसारेण पूर्वदिने एव एकोद्दिष्टमनुष्ठेयम् । उभयत्र साम्येनैकदेशव्याप्तौ खर्वादिवाक्यान्निर्णयः । वैषम्येण एकदेशव्याप्तौ तु यस्मिन् दिने महती व्याप्तिः तद्दिने श्राद्धं करणीयमिति सिद्धान्तः ।

स्वानुशीलनप्रश्नाः

१.एकोद्दिष्टस्य किं स्वरूपम् ?

----------------

२. कानि श्राद्धानि एकोद्दिष्टविधिना भवन्ति ?

-----------------

३. एकोद्दिष्टस्य कः कर्मकालः ?

----------------

४. कुतपः कतमो मुहूर्त्तः ?

-----------------

## IV.5 पार्वणम्

पर्वणि नाम अमावास्यायां विहितं यच्छ्राद्धं तत् पार्वणमित्युच्यते ।वस्तुतः त्रैपुरुषिकं श्राद्धं पार्वणमेव । अत एव अमावास्यातिरिक्तेऽपि काले यत्र यत्र त्रैपुरुषिकं श्राद्धमनुष्ठीयते तत्तत् सर्वं पार्वणमिति कथ्यते । अस्य पार्वणश्राद्धस्य किं स्वरूपं कश्च कर्मकाल इति जिज्ञासायां माधवाचार्य्येण प्रतिपादितं यत् -

दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत् प्रकीर्त्तितम् ।
अपराह्णे पितॄणान्तु तत्प्रदानं विशिष्यते ।। इति ।।

अपि च त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुः ।।इति ।।

सर्वाणि नित्यदर्शश्राद्धादीनि ,सर्वाणि नैमित्तिकानि वार्षिकश्राद्धानि सर्वविधानि काम्यश्राद्धानि च पार्वणविधिनाऽनुष्ठेयानि भवन्ति । अपरपक्षे सर्वासु तिथिषु विहितं श्राद्धं प्रत्येकं पार्वणविधिनैवानुष्ठीयते । कस्यां तिथौ श्राद्धदाने किं फलं तत् सर्वं याज्ञवल्क्यादिभिः प्रतिपादितम् । एतेनाऽपराह्ण एव पार्वणस्य मुख्यकर्मकालः । यदि तदा श्राद्धकरणे कश्चिद् विघ्नः स्यात् , तर्हि गौणकालत्वेन सायाह्नेऽपि सूर्यास्तात्प्राक् यथा कथञ्चित् श्राद्धं कर्त्तुं शक्यते न तु रात्रौ कदापि श्राद्धं कर्त्तव्यं तत्र तन्निषेधात् । प्रसङ्गेऽस्मिन् मनुवचनमुत्थाप्य माधवाचार्य्येण कालमाधवे सम्यक्तया प्रतिपादितं यत् -

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हि सा ।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाऽचिरोदिते ।। इति ।।

परन्तु केवलं चन्द्रसूर्ययोर्ग्रहणकाले संक्रान्तौ च रात्रौ श्राद्धं कर्त्तुं शक्यते नान्यदा । कदाचित् कार्यवशात् श्राद्धस्य सहसा करणीयत्वे सति कुतपादर्वाचीनो गान्धर्वोऽपि पार्वणोपक्रमकालत्वेनाऽभ्यनुज्ञायते । किन्तु कुतप एव मुख्यकर्मकाल इति निश्चीयते । स च कुतपमुहूर्त्त दिवसस्याष्टममुहूर्त्त एव यदा सूर्यस्य गतिर्मन्दा भवति । अर्थात् मध्याह्नसमयः । प्रसङ्गेऽस्मिन् नारदाऽपस्तम्बयोर्वचनोपस्थापनपूर्वकं माधवाचार्येण प्रतिपादितं यत् –

सन्त्यज्य सप्तमं भागम् अष्टमं क्रमते यदा ।
स कालः कुतपो ज्ञेयो मन्दीभूतस्य संज्ञया ।।
सप्तमात्परतो यस्तु नवमात्पूर्वतः स्थितः ।
उभयोरपि मध्यस्थः कुतपः स उदाहृतः ।। इति ।।

अपराह्णव्याप्तिः एकभक्तवत् षोढा भिद्यते । पूर्वद्युरेवापराह्णव्याप्तौ पूर्वदिने , परेद्युरेवापराह्णव्याप्तौ तु परदिने एव पार्वणमनुष्ठेयम् । उभयत्रापराह्णव्याप्तौ पूर्वदिने श्राद्धं करणीयं तत्र मुख्यगौणकालयोः सत्त्वात् । तद्वत् नोभयत्रापराह्णव्याप्तौ गुणाधिक्यात् पूर्वविद्धैव कार्य्या तद्दिने तिथिमूलस्य प्राशस्त्यात् ।पितृकार्य्यार्थं तिथिमूलस्य दैवकार्य्यार्थञ्च तिथिप्रान्तस्य प्रशंसा शिवरहस्य–सौरपुराणयोर्दृश्यते । तद्यथा –

प्रायः प्रान्त उपोष्या हि तिथिर्देवफलेप्सुभिः ।
मूलं हि पितृतृप्त्यर्थं पैत्र्यं चोक्तं मनीषिभिः ।। इति ।।

पुनश्च दिनद्वये वैषम्येणापराह्णस्यैकदेशव्याप्तौ यस्मिन् दिने महती तद्दिने श्राद्धं करणीयम् । प्रसङ्गेऽस्मिन् मरीचिवचनमुदाहृत्य माधवाचार्य्येण प्रतिपादितं यत्–

द्व्यपराह्णव्यापिनी चेदाब्दिकस्य यदा तिथिः ।
महती यत्र तद्दिवं प्रशंसन्ति महर्षयः ।। इति ।।

यदा साम्येनोभयत्रैकदेशव्याप्तिः तदा तत् तिथिगतैः वृद्धि–क्षयसाम्यैस्त्रिधा भिद्यते । तत्रोदाहरणं यथा–पूर्वेद्युरपराह्णस्य द्वितीयघटिकामारभ्य परेद्युरपराह्णस्य चरमघटिकां च विहायाऽवशिष्टासु पञ्चघटिकासु यदा तिथिः वर्त्तते तदा पूर्वापराह्णस्य प्रथमघटिकां द्वितीयापराह्णस्य चरमघटिकाञ्च विहायाऽवशिष्टासु पञ्चसु घटिकासु वर्त्तमानत्वात्साम्येनैकदेशव्याप्तिर्भवति । तदा तिथिः घटिका– चतुष्टयेन वर्द्धते । यदा पूर्वापराह्णस्य चरमघटिकायां द्वितीयापराह्णस्य प्रथमघटिकायाञ्च वर्त्तते तदापि साम्येनैकदेशव्याप्तिर्भवति ।तदा तिथिः घटिकाचतुष्टयेन क्षीयते । यदा पूर्वापराह्णस्य चरमघटिकात्रये द्वितीयापराह्णस्य चाद्यघटिकात्रये तिथिर्वर्त्तते तदापि साम्येनैकदेशव्याप्तिर्भवति । तदा तिथिः न वर्द्धते नापि क्षीयते किन्तु समैव भवति । ईदृशविषये खर्व–दर्पवाक्यान्निर्णयः । अर्थात् यदि तिथिः खर्वो दर्पो वा तर्हि परदिने , यदि तिथिः हिंस्रो भवति तर्हि पूर्वदिने पार्वणश्राद्धं करणीयम् । अत एव प्रतिपादितं माधवाचार्य्येण–

खर्वो दर्पस्तथा हिंस्रः त्रिविधं तिथिलक्षणम्।
खर्वदर्पौ परौ कार्य्यौ हिंस्रः स्यात्पूर्वकालिकः ।। इति ।।

एवं प्रकारेण प्रतिपदि कृतः पार्वणश्राद्धस्य निर्णयः सर्वास्वपि तिथिषु सञ्चरयितव्यः इति ।

स्वानुशीलनप्रश्नाः
१. पार्वणश्राद्धस्य किं स्वरूपम् ?
-----------------
२. पार्वणशब्दस्य कोऽर्थः ?
------------------
३. पार्वणश्राद्धस्य कः कर्मकालः ?
-----------------
४. द्व्यपराह्णतिथिव्याप्तौ कदा पार्वणं कार्य्यम् ?
------------------

## सारांशः

अस्मिन् खण्डे प्रतिपदि क्रियमाणानां दानव्रतादीनामनुष्ठेयकालः विचारितः। तदनन्तरम् एकोदिष्टपार्वणश्राद्धयोः स्वरूपनिर्णयपूर्वकं तयोः मुख्यगौणकालावपि विचारितौ। ततश्च कस्यां तिथौ श्राद्धकरणे किं फलं तदपि विचार्य्य , एकोद्दिष्टपावणश्राद्धयोर्मध्याह्ना-ऽराह्णव्याप्त्योः षोढाभेदप्रदर्शनपूर्वकं तत्र कस्मिन् दिने श्राद्धं कार्य्यं तदपि सप्रमाणं निरूपितम् ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| आमश्राद्धं - | आमान्नेन क्रियमाणं श्राद्धम् |
| कव्यं- | पितृभ्यो दीयमानं द्रव्यम् |
| कुतपः- | दिवसस्याष्टममुहूर्त्तः |
| गान्धारः- | दिवसस्य सप्तममुहूर्त्तः |
| दर्शः - | अमावास्या |
| पित्र्यं - | पितृश्राद्धम् |
| प्रहरः- | दिवसस्य चतुर्थो भागः |
| रोहिणः- | दिवसस्य नवममुहूर्त्तः |
| वर्द्धमानेन्दुपक्षः - | शुक्लपक्षः |

सपिण्डीकरणम् - प्रेतस्य पितृत्वप्राप्त्यर्थं क्रियमाणं श्राद्धम्

हव्यं- देवेभ्यो दीयमानं द्रव्यम्

---

## आदर्शप्रश्नाः

---

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) प्रतिपदि दानव्रतानामनुष्ठानकालं विवृणुत ।

२) दिवसभेदान् प्रतिपाद्याऽपराह्णस्य श्राद्धकालत्वे प्राशस्त्यं प्रतिपादयत ।

३) एकोद्दिष्टश्राद्धस्य स्वरूपं प्रतिपाद्य तस्य कालं निरूपयत ।

४) पार्वणश्राद्धस्य स्वरूपनिर्देशपूर्वकं तस्य कालं माधवोक्तदिशा प्रतिपादयत ।

५) खर्वादिवाक्यमुल्लिख्य,व्याख्याय,द्व्यपराह्णतिथिव्यापित्वे पार्वणश्राद्धं निरूपयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) दानव्रतादीनामनुष्ठानकालं निरूपयत

२) एकोद्दिष्टस्य कर्मकालं निरूपयत ।

३) पार्वणश्राद्धस्यानुष्ठानकालं निरूपयत ।

४) खर्वादिवाक्यमुल्लिख्य व्याख्यात ।

५) तिथिविशेषे श्राद्धविशेषस्य फलं प्रतिपादयत ।

### लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) खर्वादिवाक्यस्य स्वरूपं निरूपयत ।

२) पार्वणस्य स्वरूपं निर्णयत ।

३) एकाद्दिष्टस्य कर्मकालं विचारयत ।

४) अपराह्णतिथिव्याप्तेः षोढाभेदान् प्रदर्शयत ।

५) पार्वणश्राद्धस्य कर्मकालं प्रदर्शयत ।

### एकाङ्कप्रश्नाः (प्रत्येकं १अङ्कः )

१) द्वितीयायां श्राद्धकरणे को लाभः

२) पञ्चम्यां श्राद्धकरणे किं फलम् ?

३) एकोद्दिष्टस्य कः मुख्यकर्मकालः ?

४) पार्वणस्य को मुख्यकर्मकालः ?

५) कः खर्वतिथिः ?

६) को दर्पतिथिः ?

७) एकोद्दिष्टस्य कः गौणकर्मकालः ?
८) को हिंस्रतिथिः ?
९) पार्वणस्य को गौणकर्मकालः ?
१०)द्व्यपराह्णतिथिव्यापित्वे पार्वणं कदा भवति ?
११)साम्येन द्व्यपराह्णैकदेशव्याप्तिः कतिधा ?
१२)साम्येन द्व्यपराह्णैकदेशव्याप्तौ कथं निर्णयः ?
१३)दर्शशब्दस्य कोऽर्थः ?
१४)रोहिणः कतमो मुहूर्त्तः ?
१५)वर्द्धमानेन्दुपक्षः कः ?
१६)प्रहरस्य कियान् परिमाणः ?
१७)किं नाम कव्यम् ?
१८)दैवे कर्मणि कीदृशी तिथिः ग्राह्या ?
१९)पितृकर्मणि कीदृशी तिथिः ग्राह्या ?
२०)रात्रौ कीदृशं श्राद्धं करणीयम् ?

## एकाङ्कप्रश्नानामुत्तराणि

१) द्विपदलाभः २) श्रीः ३)मध्याह्नः
४) अपराह्णः ५) समतिथिः
६)षष्टिदण्डापेक्षयाऽधिका ७) अपराह्णसायाह्नौ ८)षष्टिदण्डापेक्षया न्यूना ९)सायाह्नः १०)पूर्वदिने
११) त्रिधा १२)खर्वादिवाक्यात् १३)अमावास्या
१४) नवमः १५)शुक्लपक्षः १६)दिवसस्य चतुर्थांशः १७) पितृभ्यो दीमानं द्रव्यं १८)पूर्वाह्णव्यापिनी
१९)अपराह्णव्यापिनी २०) ग्रहणश्राद्धम्

*******************

# (पञ्चमखण्डः) कालमाधवस्य चतुर्थप्रकरणादारभ्य अष्टमीतिथिनिर्णयान्तम्

संरचना


V.1.प्रस्तावना

V.2. उद्देश्यम्

V.3. द्वितीयातिथिनिर्णयः

V.4. तृतीयानिर्णयः

V.5. चतुर्थीनिर्णयः

V.6. पञ्चमीनिर्णयः

V.7. षष्ठीनिर्णयः

V.8. सप्तमीनिर्णयः

V.9. अष्टमीनिर्णयः


## V.1 प्रस्तावना

कालमाधवस्य चतुर्थप्रकरणे द्वितीयादिपञ्चदश्यन्ततिथयो निर्णीताः। किन्त्वस्मिन् पञ्चमखण्डे द्वितीयातिथेरारभ्य अष्टमीतिथिनिरूपणान्तं विचारो विहितः । तत्र द्वितीयायां कानि व्रतानि , सा कुत्र पूर्वविद्धा कुत्र च परविद्धेति निर्णीय तृतीयातिथेः पूर्वविद्धपरविद्धत्वविचारो विहितः ।तदनन्तरं चतुर्थ्यां विनायकव्रतविधिं प्रतिपाद्य तत्र वेधविचारञ्चोपस्थाप्य पञ्चम्यां व्रतान्यपि निरूपितानि । ततः षष्ठी-सप्तम्योरपि वेधविचारेण सह तत्रत्यव्रतानां विचारः तदनुष्ठानकालश्च प्रतिपादितः । तदनन्तरं जयन्ती-जन्माष्टम्योः स्वरूपं निर्णीय तयोर्व्रतयोरैक्यं भेदो वेति विचार्य्य तत्र ग्राह्यातिथिश्च निरूपिता । एवं प्रकारेण द्वितीयातः अष्टमीं यावत् विद्यमानानां व्रतानां स्वरूपं कर्मकालश्च विचारितौ ।

## V.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- द्वितीयातिथेः व्रतानां कर्मकालं निरूपयिष्यन्ति ।

- तृतीयातिथौ व्रतानां कर्मकालान् पर्य्यालोचयिष्यन्ति ।
- विनायकव्रतस्य स्वरूपं प्रदर्शयितुमर्हन्ति ।
- पञ्चमीतिथेर्व्रतानां स्वरूपं निरूपयितुमर्हन्ति ।
- षष्ठीतिथेर्व्रतानां स्वरूपं कर्मकालञ्च प्रतिपादयिष्यन्ति ।
- सप्तमीथिौ विद्यमानानां व्रतानां कर्मकालं प्रदर्शयितुमर्हन्ति ।
- अष्टमीतिथौ जयन्ती-जन्माष्टम्योः स्वरूपं निरूपयिष्यन्ति ।
- जयन्ती-जन्माष्टम्योरैक्यं भेदो वा तत् प्रदर्शयितुमर्हन्ति ।
- जन्माष्टम्यां ग्राह्यातिथिं निरूपयिष्यन्ति ।

## V.3 द्वितीयातिथिनिर्णयः

द्वितीया यदि शुद्धा स्यात् तर्हि तत्र न कश्चन सन्देहः ।यदि विद्धा भवति तर्हि पूर्वविद्धायाः पूज्यत्वमुत्तरविद्धाया वेति विचारोऽपेक्ष्यते । तत्र सूर्य्योदये त्रिमुहूर्त्ता ततोऽधिका वा प्रतिपत् तदनन्तरं द्वितीया चेत् सा पूर्वविद्धा द्वितीया । तथैव परदिने सूर्यास्तमयादर्वाक् त्रिमुहूर्त्ता ततोऽधिका वा तृतीया चेत् सा परविद्धाद्वितीयाभवति । एवं द्विविधयोः पूर्वविद्धोत्तरविद्धयोः द्वितीययोः कस्याः पूज्यत्वमिति शङ्कायामुत्तरविद्धा द्वितीयो- पोष्येति विभिन्नेभ्यो वचनेभ्यः प्रतिपादितम् । युग्मवचनेनापि तृतीयाविद्धाया द्वितीयायाः पूज्यत्वं प्रतिपादितम् । तेन युग्मवचनमुपवासपरकमिति बोध्यते । पुनश्च व्यासेन "तृतीयया युता कार्य्या द्वितीया न तु पूर्वयेति " प्रतिपादनात् पूर्वविद्धाया द्वितीयाया निषेधः कृतः। परन्तु " प्रतिपत् सद्वितीया स्याद् द्वितीया प्रतिपद्युता " इत्यापस्तम्बवचनाद् द्वितीया पूर्वविद्धा विधीयते। एतेन कृष्णद्वितीया परविद्धा चोपोष्येति प्रतीयते । अथवा शुक्लद्वितीया उपवासभिन्नविषये परविद्धाऽस्तु इत्यपि ज्ञायते । एवं प्रकारेण उपवासविषये शुक्लद्वितीया परविद्धा कृष्णद्वितीया च पूर्वविद्धेति मन्तव्यम् । उपवासभिन्नविषये च शुक्ला पूर्वा कृष्णा परेति निर्णयः । एतावता द्वितीयानिर्णयः व्यवस्थितः ।

## V.4 तृतीयानिर्णयः

तृतीयाविषये विभिन्नानि वचनानि दृश्यन्ते । कानिचिद्वचनानि तृतीयायाः पूर्व- विद्धत्वनिषेधकानि,कानिचित् पूर्वविद्धाविधायकानि ,कानिचिच्चो-त्तरविद्धाविधायकानि भवन्ति । तेषु युग्माग्नियुगभूतानामिति वचनात् तृतीया पूर्वविद्धा ग्राह्येति बोध्यते ।किन्तु तृतीया तु न कर्त्तव्या द्वितीयया युता विभो ! इत्यापस्तम्बवचनात्

तृतीया पूर्वविद्धा निषिद्धेति प्रतीयते । पुनश्च चतुर्थी-संयुता या च सा तृतीया फलप्रदा इति आपस्तम्बवचनाच्च तृतीया परविद्धा ग्राह्येति ज्ञायते । एतेन व्रतभेदेन व्यवस्था साधीयसी ।अतः ज्येष्ठशुक्लतृतीया रम्भातृतीया। सा च पूर्वविद्धा,अन्याः सर्वास्तृतीयाः परविद्धा इति । प्रसङ्गेऽस्मिन् ब्रह्मवैवर्त्तपुराणवचनमुत्थाप्य माधवाचार्य्येण कालमाधवे प्रतिपादितं यत् -

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम !
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ।।इति ।।

क्वचिदपि सर्वेषु व्रतेषु तृतीया पूर्वविद्धेति प्रतिपादितं ; तत् परदिनेऽत्यन्तासत्त्वे वेदितव्यम् । अत्रात्यन्तासत्वे नाम परदिने प्रातः तृतीयायाः मुख्यपक्षानुसारेण त्रिमुहूर्त्ताऽसत्त्वे गौणपक्षे च द्विमुहूर्त्ताऽसत्त्वे कालस्य कृते कर्मणो लोपो मा भूदिति धिया पूर्वविद्धायामपि तृतीयायां व्रतमनुष्ठेयम् । एतावता तृतीयानिर्णयः व्यवस्थापितः ।

स्वानुशीलनप्रश्नाः

१. शुक्लद्वितीया पूर्वविद्धा परविद्धा वा ?

-----------------

२. कृष्णद्वितीया पूर्वा परा वा ?

------------------

३. रम्भातृतीया पूर्वविद्धा परविद्धा वा ?

-----------------

४. कीदृशी तृतीया गणयुक्ता भवति ?

------------------

## V.5 चतुर्थीनिर्णयः

चतुर्थ्यां भिन्नदेवताविषयाणि बहूनि व्रतानि सन्ति । तत्र विष्णुदेवताकं चतुर्मूर्त्तिव्रतं ,भौमदेवताकमङ्गारकचतुर्थीव्रतं ,यमदेवताकं यमव्रतं , विनायकदेवताकं दूर्वागण- पत्यादिव्रतं ,शेषशङ्खपालादिसर्पदेवताकं नागचतुर्थीव्रतमित्यादीनि । तत्र विनायक-नागव्रता- तिरिक्तेषु व्रतेषु परविद्धायां चतुर्थ्यामुपवासः कार्यः । विनायकव्रते तु कर्मकालवचनानुसारेण तत्र मध्याह्नस्य कर्मकालत्वात् तत्कालव्यापिनी चतुर्थी पूर्वविद्धा परविद्ध वा ग्राह्या भवति । अस्मिन् क्षेत्रे युग्मवचनानि उदासीनानि भवन्ति तेभ्यः कर्मकालवचनस्य प्राबल्यात् । प्रसङ्गेऽस्मिन् स्कन्दपुराणवचनमुत्थाप्य माधवाचार्य्येण प्रतिपादितं यत् -

विनायकव्रते कार्या सर्वमासेषु षण्मुख !
चतुर्थी तु जयायुक्ता गणनाथसुतोषिणी ।। इति ।।

तत्र जयायुक्तापि चतुर्थी यदि मध्याह्नव्यापिनी न भवति तर्हि तद्दिने विनायकपूजां न कृत्वा परदिने पञ्चमीविद्धायां कर्त्तव्यम् । प्रसङ्गेऽस्मिन्नुक्तं कालमाधवे यत् –

मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके ।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ।।इति ।।

एतेन ज्ञायते यत् दिनद्वये मध्याह्नव्यापित्वे पूर्वदिने जयायोगस्य प्राशस्त्यात् पूर्वदिने एव व्रतं करणीयं न परदिने । यदि दिनद्वये मध्याह्नव्याप्तिर्नास्ति तर्हि जयायेगस्य प्राशस्त्यात् नागविद्धाया हेयत्वाच्च पूर्वदिने एव व्रतं करणीयम् ।

भाद्रशुक्लचतुर्थ्यां विनायकव्रतमिव श्रावणशुक्लचतुर्थ्यां नागव्रतमपि मध्याह्न- व्यापिन्यामनुष्ठीयते । प्रसङ्गेऽस्मिन् कूर्मपुराणवचनमुत्थाप्य माधवाचार्य्येण प्रतिपादितं यत् –

तिथौ युगाह्वयायाश्च समुपोष्य यथाविधि।
शङ्खपालादिनागानां शेषस्य च महात्मनः ।।
पूजा कार्या पुष्पगन्धक्षीराप्यायनपूर्वकम् ।
विषाणि तस्य नश्यन्ति न च तान् घ्नन्ति पन्नगाः ।। इति ।।

एतेन ज्ञायते यत् विनायकचतुर्थी–नागचतुर्थ्योरियान् विशेषो यत् परेद्युरेव मध्याह्न–व्याप्तौ विनायकचतुर्थी परा ।अन्येषु पञ्चसु भेदेषु जयायोगस्य प्रास्त्यात्पूर्वा । नागचतुर्थ्यां पूर्वेद्यु- रेव मध्याह्नव्याप्तौ नागचतुर्थी पूर्वा,अन्येषु पञ्चसु भेदेषु पञ्चमीयोगस्य प्राशस्त्यात्परेति सिद्धान्तः।

स्वानुशीलनप्रश्नाः

१. विनायकचतुर्थी पूर्वविद्धा परविद्धा वा ?

-----------------

२. नागचतुर्थी पूर्वा परा वा ?

------------------

३. विनायकव्रतं कदा पाल्यते ?

-----------------

## V.6 पञ्चमीनिर्णयः

युग्मवचनानुसारेण पञ्चमी शुक्ले कृष्णे च पूर्वविद्धा ग्राह्या । यद्यपि प्रायः प्रान्त उपोष्येति वचनात् पञ्चमी परविद्धा ग्राह्येति कथ्यते तथापि तस्य सामान्यवचनत्वात् विशेषवचनेन बाध्यते । आपस्तम्बेनापि पञ्चम्याः षष्ठीयुक्तत्वेन परविद्धाया विधानं कृतम् । एवं नानावचनेभ्यः पञ्चम्या द्विविधव्यवस्थादर्शनात् व्रतभेदेन य्ववस्था साधीयसी । तस्मात् स्कन्द- व्रते परविद्धा स्वीकृता ; अतो व्रतान्तरे पूर्वविद्धा

चेन्न काप्यापत्तिः । प्रसङ्गेऽस्मिन् ब्रह्मवैवर्त्त- पुराणवचनमुत्थाप्य माधवाचार्येण प्रत्यपादि यत् -"पञ्चमी तु प्रकर्त्तव्या षष्ठ्या युक्ता तु नारद " ।इति। एतेन स्कन्दपञ्चमी परविद्धा , अन्याः सर्वाः पूर्वविद्धा इति निर्णयः ।

## V.7 षष्ठीनिर्णयः

" षण्मुन्योर्वसुरन्ध्रयोरिति " युग्मवचनात् षष्ठ्याः सप्तमीविद्धत्वं प्रतीयते । "पञ्चमी तु प्रकर्त्तव्या षष्ठ्या युक्ता तु नारद "इत्यापस्तम्बोक्तयुग्मवाक्येन षष्ठी पञ्चमीविद्धा अर्थात् पूर्वविद्धेति बोध्यते । एतेन परस्परविरोधिद्विविधयोर्व्यवस्थयोः शुक्लकृष्णपक्षभेदेन व्यवस्था उत दैवपितृकर्मानुसारेणेति शङ्कायां नान्यतरया व्यवस्थयेति समाधानं कृतम् ; यतो हि नोभयमुपपद्यते । तस्मात् व्रतभेदेन व्यवस्था साधीयसी । अतः स्कन्दव्रते षष्ठी पूर्वविद्धा व्रतान्तरे अर्थात् रविषष्ठी, फलषष्ठी ,मन्दारषष्ठी तु परविद्धा ग्राह्या । इति षष्ठीनिर्णयः ।

## V.8 सप्तमीनिर्णयः

सप्तम्यां नानादेवताकानि नानाव्रतानि सन्ति ।यथा उमामहेश्वरदेवताकं मुक्ता- भरणसप्तमीव्रतं,सूर्यदेवताकं विजयसप्तमीव्रतम् आरोग्यसप्तमीव्रतञ्च,विष्णुदेवताकं माङ्गल्यव्रतम् इत्यादीनि । एतेषु व्रतेषु सप्तमी पूर्वविद्धा परविद्धा वेति वीक्षायां सप्तम्याः पूर्वविद्धानिन्दकस्य परविद्धाविधायकस्य कस्यापि वचनस्यादर्शनात् प्रत्युत तद्विपर्ययेण पूर्वविद्धाविधायकस्य परविद्धानिषेधकस्य च वचनस्य सर्वत्रोपलम्भात् सप्तमी सर्वेषु व्रतेषु षष्ठीविद्धैव ग्राह्येति विज्ञायते। प्रसङ्गेऽस्मिन् स्कन्दपुराण-भविष्यपुराणयोर्वचनानि समुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

कर्त्तव्या सप्तमी तत्र षष्ठी यत्र च सर्वदा ।
षष्ठी च सप्तमी यत्र तत्र सन्निहितो हरिः ।।
षष्ठी च सप्तमी तात अन्योन्यन्तु समाश्रिता ।
पूर्वविद्धा द्विजश्रेष्ठ कर्त्तव्या सप्तमी तिथिः ।।इति।।

अपिच सप्तम्याः परविद्धाया निषेधः स्कन्दपुराणे दृश्यते तद्यथा-

षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी ।
सप्तमी परविद्धा च नोपोष्यं तिथिपञ्चकम् ।।इति।।

एवञ्च स्थलविशेषे पूर्वविद्धायाः सप्तम्या अलाभात् परविद्धायाश्च निषेधात् कालस्य कृते कर्मणो लोपो मास्तु इति हेतोरनन्यगतिकत्वात् निषेधमुल्लङ्घ्य सप्तमी परविद्धाऽपि स्वीकर्त्तुं शक्यते । एतावता सप्तमीनिर्णयः सुस्थितः ।

स्वानुशीलनप्रश्नाः

१. नागपञ्चमी पूर्वविद्धा परविद्धा वा ?

-----------------

२. स्कन्दषष्ठी पूर्वा परा वा ?

------------------

३. सप्तमी पूर्वविद्धा परविद्धा वा ?

## V.9 अष्टमीनिर्णयः

"वसुरन्ध्रयोरिति" युग्मवचनानुसारेण शुक्ले कृष्णे चाष्टमी नवमीविद्धा ग्राह्येति आपाततः प्रतीयते । परन्तु "एकादश्यष्टमी षष्ठी शुक्लपक्षे चतुर्दशी ।
पूज्याः परेण संयुक्ता पराः पूर्वेण संयुता ।। "
इति शङ्करगीतावचनात् शुक्लपक्षे एव परविद्धा प्रतीयते । पुनश्च कृष्णपक्षेऽष्टमी पूर्वविद्धापि वचनाद् ज्ञायते । प्रसङ्गेऽस्मिन् निगमवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

कृष्णपक्षेऽष्टमी यत्र कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्त्तव्या परविद्धा न कर्हिचित् ।
उपवासादिकार्येषु ह्येष धर्मः सनातनः ।।इति ।।

एतेन सर्वेषु व्रतेषु शुक्लकृष्णपक्षभेदेन अष्टम्यी व्यवस्थाप्यते । परन्तु व्रतविशेषा- दष्टमीनिर्णयो द्विविधः।व्रतविशेषमात्रोपजीवनेनैकः नक्षत्रादियोगं व्रतविशेषञ्चोपजीव्य प्रवृत्तोऽपरः। व्रतविशेषे दूर्वाष्टम्यादीनां ग्रहणं भवति । नक्षत्रादियोगं व्रतविशेषञ्चोपजीव्य भाद्रशुक्लाष्टम्यां ज्येष्ठानक्षत्रयोगे यद् ज्येष्ठाव्रतं तदुदाहर्त्तुं शक्यते । एवं नक्षत्रयोगेन सह वारविशेषस्य योगोऽपि व्रतं प्रशस्ततरं करोति ।यथा श्रावणशुक्लाष्टमी ज्येष्ठानक्षत्रयुक्ता सती यदि रविवारे पतति , तर्हि तत् नीलज्येष्ठाष्टमीव्रतमित्युच्यते । एवं प्रकारेण अष्टमीविषये त्रेधा निर्णयोऽत्र दृश्यते । तद्यथा- १)शुक्लकृष्णभेदेन निर्णयः २) व्रतविशेषेण निर्णयः ३) योगविशेषेण निर्णयश्चेति । एतदनुसृत्य सम्प्रति जन्माष्टमीविचारः क्रियते ।

तत्र भाद्रकृष्णाष्टमी जन्माष्टमी । तद्व्रते सामान्यव्रतवदुदयास्तमयवेधो न स्वीक्रियते । अपि तु निशीथवेध एव । अर्थात् यस्मिन् भाद्रपदे कृष्णपक्षे मध्यरात्रे एवाष्टमीतिथिर्वर्त्तते तद्दिने जन्माष्टमी परिपाल्यते ।तत्रापि तेन सह यदि रोहिणीनक्षत्रस्य योगो गवति ,तर्हि तद्जयन्ती- व्रतमित्युच्यते ।वस्तुतः जन्माष्टमीजयन्तीव्रतयोरैक्यं भेदो वेति संशयो भवति । तत्र केचिदैक्य- मिति मतं समुपस्थापयन्ति । तेषां मते द्वयोरपि व्रतयोरेकस्वरूपत्वात् व्रतमेकमेवेति । यतो हि यथा जन्माष्टम्यामुपवासो ,जागरणं ,कृष्णपूजा, चन्द्रार्घ्यदानञ्च क्रियते , तथा जयन्त्यामपि । तस्मादुभयोर्व्रतयोर्मध्ये भेदो नास्तीति । परन्तु द्वयोर्व्रतयोर्नामभेदात् ,निमित्तभेदाद् ,रूपभेदात् , शुद्धमिश्रभेदात्

,निर्देशभेदाच्च भेदोऽवगन्तव्यः । एतयोर्भेदविषये यान्येतानि पञ्चनिमित्तानि तान्यत्र विचार्य्यन्ते ।

## नामभेदाद्व्रतभेदः -

एकस्य व्रतस्य जन्माष्टमीति नाम , अपरस्य तु जयन्तीति । एतेन नामभेदः सुतरा- मुपपद्यते । नामभेदाच्च कर्मभेदो मीमांसायां ज्योतिरधिकरणे प्रतिपादितम् । तत्र अथैष ज्योतिः अथैष विश्वज्योतिरित्यादौ ज्योतिसंज्ञकयागापेक्षया विश्वज्योतिसंज्ञकस्य ,सर्वज्योतिसंज्ञकस्य च यागस्य पृथक्संज्ञाश्रवणात् यथा यागभेदोऽङ्गीक्रियते , तथाऽत्रापि जन्माष्टमीजयन्त्योर्नाम- भेदाद् व्रतभेदः स्वीकरणीय एव ।

## ज्योतिरधिकरणम्

नामभेदात्कर्मभेदो ज्योतिरधिकरणे व्यवस्थितः । तस्य चाधिकरणस्य संग्राहकौ श्लोकौ जैमिनीयन्यायमालायां माधवाचार्येण प्रतिपादितौ । तौ यथा-

अथैष ज्योतिरित्यत्र गुणो वा कर्म वा पृथक् ।
गुणः सहस्रदानात्मा ज्योतिष्टोमे ह्यनूदिते ।।
अथेति प्रकृते च्छिन्न एतच्छब्दोऽग्रगे वदेत् ।
सङ्ख्ययैवान्य-कर्मत्वमुत्पत्तिगत-संज्ञया ।।इति ।।

अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत इति ब्राह्मण- वाक्यं श्रूयते । तत्रायं संशयो यत् किं प्रकृते एव ज्योतिष्टोमे सहस्रदक्षिणाख्यो गुणविधिः , उत यागान्तरविधिः ।एष ज्योतिरेतेनेति द्वाभ्यामेतच्छब्दाभ्यां प्रकृतं ज्योतिष्टोममनूद्य तत्र गुणविधि- रिति पूर्वपक्षः ।अर्थान्तरद्योतकेनाथशब्देन प्रकृतस्य ज्योतिष्टोमस्य विच्छेदः क्रियते । एतच्छब्द- श्चातीतप्रत्यासत्तिमागामिनीप्रत्यासत्तिश्च बोधयति । तत्राऽतीतायाः प्रत्यासत्तेर्विच्छेदे सति आगामिप्रत्यासत्तिपरत्वेन एतच्छब्दौ उपपन्नौ । तथापि एककर्मत्वं माभूत्,कर्मभेदे तु किं प्रमाण- मिति चेदुच्यते - अपूर्वसंज्ञेति । एष ज्योतिरित्यस्मिन्नुत्पत्तिवाक्ये पूर्वप्रकृतकर्मविषयाया ज्योतिष्टोमसंज्ञाया अन्या ज्योतिरिति संज्ञा श्रूयते । यथा पूर्वाधिकरणे उत्पत्तिवाक्यगतया संख्यया कर्मभेदो निरूपितः तथाऽत्रापि उत्पत्तिवाक्यगतया संज्ञया कर्मभेदोऽवगन्तव्यः । अनेन न्यायेन उत्पत्तिवाक्यगताभ्यां जन्माष्टमी-जयन्तीव्रतशब्दाभ्यां व्रतभेदः स्वीकर्त्तव्यः ।अयमेव ज्योतिरधिकरणावतरणस्याभिप्रायः ।

## निमित्तभेदाद् व्रतभेदः -

जन्माष्टमीव्रते तिथिरेव निमित्तं जयन्तीव्रते तु तिथिना सह रोहिणीनक्षत्रयोग एव निमित्तम् । यद्यपि जन्माष्टमीति व्यवहारे रोहिणीनक्षत्र-बुधवारादीनामपि बोधो भवति भगवतः कृष्णस्य तन्नक्षत्रवारादियोगे एव समुत्पत्तेः ; तथापि जन्माष्टमीव जन्मरोहिणी जन्मयोगो वेति व्यवहारो न दृश्यते । एतेनोभयोर्व्रतयोः निमित्तभेदाद् व्रतभेदोऽवगन्तव्यः ।

## रूपभेदाद् व्रतभेदः

रूपं नाम स्वरूपम् ।स्वरूपभेदात् कर्मभेदः मीमांसायां प्रतिपादितः। यागस्य द्रव्यं देवता च स्वरूपं भवति । तयोर्भेदाद् यथा यागभेदः तथा रूपभेदादपि व्रतभेदो भवितुमर्हति । जन्मा- ष्टमीव्रतस्य उपवासमात्रं स्वरूपं , जयन्त्यास्तु दानादिसहितोपवास एव स्वरूपं भवति । यद्यपि शिष्टा जन्माष्टम्यामपि जागरणदानादिकं कुर्वन्ति ,कुर्वन्तु नाम। अविरुद्धैः पुण्यविशेषैः व्रतस्यो- पोद्बलनसम्भवात् । शास्त्रेण तु तत्रोपवासमात्रं विहितम् । एवं निमित्तभेदाद् व्रतभेदोऽङ्गीकर्त्तव्यः ।

## आमिक्षाधिकरणम्

रूपभेदस्य कर्मभेदहेतुत्वमामिक्षाधिकरणे माधवाचार्येण जैमिनीयन्यायमालायां प्रपञ्चितम् । तस्य चाधिकरणस्य संग्राहकौ श्लोकौ यथा-

गुणः कर्मान्तरं वा स्याद् वाजिभ्यो वाजिनन्त्विति ।  
गुणो देवाननूद्योक्तः समुच्चयविकल्पतः ।।  
आमिक्षोत्पत्तिशिष्टत्वात् प्रबला तत्र वाजिनम् ।  
गुणोऽप्रविश्य कर्मान्यत् कल्पयेद्वाजिदेवकम् ।। इति ।।

तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतिवाक्यं श्रूयते । तत्र अम्लदधिसम्बन्धात् क्षीरनीरयोर्विभेदे सति यो घनीभूतः क्षीरांशः साऽऽमिक्षा। तस्याश्च विश्वेदेवा देवता । तत्र यत् पृथग्भूतं नीरं तद्वाजिनम् । तस्य च वाजिनो देवता । तस्याऽमिक्षा- न्तस्य वाक्यस्य प्रतिपाद्यमामिक्षाद्रव्यकं विश्वेदेवादेवताकमेकं कर्म ।तथा सति वाजिभ्यो वाजिनमित्यनेन वाक्येन पूर्वस्मिन्नेव कर्मणि वाजिनं गुणो विधीयते उत कर्मान्तरविधिरिति संशयः । तत्र वाजः अन्नं नाम आमिक्षा सा येषां विश्वेषां देवानामस्ति , ते वाजिन इति व्युत्पत्त्या प्रकृतान् देवाननूद्य वाजिनं गुणो विधीयते । सा चामिक्षया सह विकल्प्यते उत समुच्चीयते इति पूर्वपक्षः । तप्ते पयसि दध्यानयनेन आमिक्षोत्पद्यते , अतः आमिक्षाया उत्पत्तिशिष्टत्वम् । तत्र वाजिनस्य स्वत एवोत्पन्नत्वात् तस्योत्पन्नशिष्टत्वम् । उत्पत्तिशिष्टोत्पन्नशिष्टयोर्मध्ये उत्पत्तिशिष्टं प्रबलम् ।अतस्तेनोत्पन्नशिष्टं बाध्यते । तस्मादुत्पत्तिशिष्टामिक्षा गुणावरुद्धस्य कर्मणो गुणान्तरा- कांक्षाभावात् वाजिनस्य च तत्र दौर्बल्यात् प्रवेशाऽसम्भवे सति अन्यथाऽनुपपन्नो वाजिनगुणः वाजिशब्दार्थस्य प्रकृतदेवताव्यतिरिक्त देवत्वं कल्पयित्वा कर्मभेदे पर्यवसतीति सिद्धान्तः ।

अत्र यथा द्रव्यदेवतालक्षणस्य यागरूपस्य भिन्नत्वात् कर्मभेदः,तथा प्रकृतेऽपि जन्माष्टमी-जयन्तीति व्रतयोः रूपभेदाद् व्रतभेदोऽवगन्तव्यः । यतो हि उपवासमात्रं जन्माष्टम्याः स्वरूपं , मण्डपनिर्माण-जागरण-प्रतिमादानादिभिः सहोपवासश्च जयन्त्याः स्वरूपमिति ।

## शुद्धमिश्रभेदाद् व्रतभेदः

अकरणे प्रत्यवायस्मरणात् जन्माष्टमीव्रतं नित्यं ,अकरणे प्रत्यवायस्मरणात् करणे च फलविशेषश्रवणात् जयन्तीव्रतं नित्यं काम्यञ्च । जन्माष्टमीव्रतस्याकरणे प्रत्यवायविषये स्कन्दपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यथा–

ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम् ।
ते भवन्ति नराः प्राज्ञ! व्याला व्याघ्राश्च कानने ।। इत्यादि ।।

जयन्तीव्रतस्याकरणेऽपि प्रत्यवाय इति विषये स्कन्दपुराणाद् वचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यथा–

शूद्रान्नेन तु यत्पापं शवहस्तस्य भोजने ।
तत्पापं लभते कुन्ति जयन्तीविमुखस्य च ।।इत्यादि।। पुनश्च जयन्तीव्रतस्य करणे फलविशेषविषये नारदीयसंहितावचनमुत्थाप्य माधवेन प्रतिपादितं यत् –

उपोष्य जन्मचिह्नानि कुर्य्याज्जागरणं तु यः ।
अर्द्धरात्रयुताष्टम्यां सोऽश्वमेधफलं लभेत् ।। इत्यादि।।

एवं जन्माष्टमीव्रतस्य केवलं नित्यत्वात् तद्व्रतं शुद्धम् । जयन्त्या नित्यत्वात् काम्यत्वाच्च तद्व्रतं नित्यकाम्ययोः मिश्रणात् मिश्रम् ।अतः शुद्धमिश्रभेदाद्द्वयोर्व्रतयोर्भेदोऽङ्गीकर्त्तव्यः ।

## निर्देशभेदाद् व्रतभेदः

निर्देशभेदादपि व्रतभेदो भवति । माधवाचार्येण भृगुवाक्यमुद्धृत्य प्रतिपादितं यत् –

जन्माष्टमी जयन्ती च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्त्तव्या तिथिभान्ते च पारणम् ।। इति।।

अत्र जन्माष्टमी जयन्ती चेति द्वयोर्व्रतयोर्भेदेन निर्द्देशात् व्रतभेदोऽत्रावश्यमङ्गीकर्त्तव्यः। यदि जन्माष्टमीजयन्त्योरैक्यं स्यात्तर्हि निर्देशभेदो नोपपद्येत। अत उभयोर्व्रतयोर्मध्ये भेदोऽस्ति । तथापि व्रतयोरैक्यविषये केषाञ्चिद् भ्रमो भवति । तत्र गुणविकृतिराश्रयाश्रयिभावश्च कारणत्वेनोपन्यस्तुं शक्येते । तत्तु उभयोः सादृश्याद् भवति। स च भ्रमविशेषः मन्दबुद्धेर्जायते । अतः सर्वथा तयोर्व्रतयोर्भेदोऽवश्यमङ्गीकार्य्यः ।

स्वानुशीलनप्रश्नाः

१. जन्माष्टम्याः किं स्वरूपम् ?
----------------

२. जयन्तीव्रतस्य किं स्वरूपम् ?
-----------------

३. जन्माष्टमीजयन्तीव्रतयोरैक्यं भेदो वा ?
----------------

रा

४. ज्योतिरधिकरणस्य किं तात्पर्य्यम् ?
----------------

**5. आमिक्षाधिकरणस्य का प्रासङ्गिकता ?**
----------------

## जन्माष्टम्या ग्राह्यातिथिविचारः

जन्माष्टम्या जयन्त्याश्च रात्रिप्रधानत्वात् रात्रियोगोऽत्र ग्राह्यः न तु व्रतान्तरवदहर्वेधः इति । अतः निशीथेऽष्टमी यदि रोहिणीनक्षत्रयुक्ता भवति ,तर्हि तद्दिने जयन्तीव्रतं कार्य्यम् । यतो हि तत्काले भगवान् हरिः स्वयमेव जात आसीत् ।प्रसङ्गेऽस्मिन् वसिष्ठसंहितायामुक्तं यत् -

अष्टमी रोहिणीयुक्ता निशार्द्धे दृश्यते यदा ।
मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयम् ।।इति ।।

एवं निशीथे केवलाष्टमीयोगादपि तद्दिने जन्माष्टमीव्रतं पाल्यते न तत्राप्यहर्वेधो ग्राह्यः । अतः तिथिः निशीथव्यापिन्यत्र स्वीक्रियते । यदि निशीथयुक्ता नोपलभ्यते ,तर्हि केवलं रात्रियुक्ताऽपि प्रशस्यते । यदि पूर्वेद्युर्निशीथादूर्ध्वमारभ्य तिथिः प्रवृत्ता परेद्युर्निशीथादर्वाक् समाप्ता तर्हि तत्रोभयत्र रात्रिसम्बन्धित्वात् उभयत्र निशीथव्याप्त्यभावस्य समानत्वेऽपि परेद्युः प्रातः सङ्कल्पकालमारभ्य तिथेः वर्त्तमानतया प्राशस्त्यं द्रष्टव्यम् ।

सा चाष्टमी द्विविधा । रोहिणीरहिता रोहिणीसहिता च । रोहिणीरहिताप्यष्टमी द्विविधा । शुद्धा सप्तमीविद्धा चेति ।सूर्योदयमारभ्य प्रवृत्ता शुद्धा निशीथादर्वाक् सप्तम्या कियत्याऽपि युक्ता विद्धा ।शुद्धापि निशीथव्याप्त्यव्याप्तिभ्यां द्विविधा । सप्तमीविद्धापि त्रिविधा । पूर्वेद्युर्निशीथ- व्यापिनी,परेद्युर्निशीथव्यापिनी,उभयत्र तद्व्यापिनी च । प्रथमद्वितीयपक्षयोः निशीथव्याप्त्यनु- सारेण निर्णयः। तृतीयपक्षे रात्रियोगानुसारेण । रोहिणीसहिताऽष्टमी चतुर्विधा । शुद्धा , विद्धा , शुद्धाधिका,विद्धाधिका चेति । तत्र शुद्धायामपि सम्पूर्णयोगः निशीथयोगः यत्किञ्चिन्मुहूर्त्त- योगश्चेति त्रैविध्यं भवति । एवं विद्धायामपि त्रैविध्यं द्रष्टव्यम् । एतेषु षट्सु पक्षेषु दिनान्तरे योगाभावात्सन्देहो नास्ति । किन्तु केवलं योगतारतम्यात् प्राशस्त्यतारतम्यं भवति । योगमुप- जीव्योपवासविषये विष्णुरहस्यवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्त्तमपि लभ्येत सोपोष्या सुमहाफला ।।
मुहूर्त्तमप्यहोरात्रे यस्मिन् युक्तं हि दृश्यते ।
अष्टम्यां रोहिणीऋक्षं तां सुपुण्यामुपावसेत् ।। इति ।।

सूर्योदयमारभ्य प्रवृत्ता परेद्युः सूर्योदयमतिक्रम्य ईषद्वर्द्धते चेत् सा शुद्धाधिका । सा च त्रिविधा । पूवेद्युरेव रोहिणीयुक्ता,परेद्युरेव रोहिणीयुक्ता,दिनद्वये रोहिणीयुक्ता च ।आद्ययोः पक्षयो- रुपवासे सन्देहो नास्ति । तृतीयपक्षे गुणाधिक्यात्पूर्वा एवोपोष्या । निशीथादर्वाक् सप्तमीयुक्ता परेद्युर्विद्यमाना विद्धाधिका । अत्रापि पक्षत्रयम् ।आद्ययोः पक्षयोरुपवासे सन्देहो नास्ति ।तृतीय- पक्षे दिनद्वये राहिणीयुक्ता विद्धाधिका निशीथे जयन्तीयोगमपेक्ष्य चतुर्द्धा भिद्यते । पूर्वेद्युर्निशीथ- योगवती,परेद्युः तादृशी,उभयत्र तादृशी,उभयत्र निशीथयोगरहिता च ।

एतेषु पक्षेषु या पूर्वेद्युर्निशीथयोगवती सा पूर्वोपोष्या । अवशिष्टेषु त्रिषु पक्षेषु परदिने एवोपवासः । दिनद्वये निशीथ योगराहित्यं बहुधा जायते । यथा - पूवेद्युर्निशीथादूर्ध्वं तिथिनक्षत्रद्वयं प्रवृत्तं ,तच्च परेद्युर्निशीथादर्वाक् समाप्तम् । पुनश्च पूवेद्युर्निशीथादर्वाक् नक्षत्रं प्रवृत्तं अष्टमी तु निशीथादूर्ध्वं प्रवृत्ता । अपि च पूवेद्युर्निशीथादर्वाक् नक्षत्रं प्रवृत्तं परेद्युर्निशीथादर्वाक् नक्षत्रं निवृत्तमिति । एतेषु त्रिषु पक्षेषु परदिने एवोपवासः कार्यः । एवं जन्माष्टमीभेदा जयन्तीभेदाश्च निरूपिताः । यदि जन्माष्टमी राहिणीनक्षत्रयुक्तापि सोमवारे बुधवारे वा पतति , तर्हि तत्र फलाधिक्यं द्रष्टव्यम् ।

## पारणव्यवस्था

पारणं नाम व्रताङ्गभोजनम् । तेनोपवासस्य व्रतस्य च समाप्तिर्भवति । प्रसङ्गेऽस्मिन् माधवाचार्येणाऽऽदित्यपुराणवचनमुत्थाप्य प्रतिपादितं यत् -

पारणान्तं व्रतं ज्ञेयं व्रतान्ते तद्धि भोजनम् ।
असमाप्ते व्रते पूर्वे नैव कुर्य्याद् व्रतान्तरम् ।।इति ।।

सर्वेषूपवासेषु सामान्येन पूर्वाह्णे एव पारणं भवति । परन्तु तिथिनक्षत्रयोगे तयोरुभयोरन्ते पारणं कर्त्तव्यं तिथिभान्ते च पारणमिति वचनात् । यद्युभयान्तो नैव भवितुमर्हति तर्हि एकतरस्यान्ते पारणं कार्य्यम् । तिथिमध्ये पारणं यावद्दोषकरं नक्षत्रमध्ये तच्चतुर्गुणं भवति । यदि दिनमध्ये उभयान्तः एकतरान्तो वा तर्हि तदन्ते पारणम् । यदि रात्रौ एकतरान्त उभयान्तो वा तर्हि तत्र प्रतीक्षा न कार्या। यदि कश्चिदसमर्थः तर्हि स तिथिनक्षत्रयोर्वर्त्तमानयोरपि प्रातः देवपूजां कृत्वा पारणं कुर्वन् न दुष्यति " तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणमिति " वचनात् ।

स्वानुशीलनप्रश्नाः
१. जन्माष्टम्याः कः कर्मकालः ?
----------------
२. जयन्तीव्रते पारणं कदा कार्य्यम् ?
----------------
३. जन्माष्टमी-जयन्तयोः कीदृशो वेधो ग्राह्यः ?
----------------

## सारांशः

अस्मिन् खण्डे द्वितीयातिथेः व्रतानां कर्मकालं निरूप्य ततः तृतीयातिथौ व्रतानां कर्मकालाः पर्य्यालोचिताः । तदनन्तरं चतुर्थ्यां विनायकव्रतस्य स्वरूपं प्रदर्श्य पञ्चमीतिथेः षष्ठीतिथेश्च वर्त्तमानानां व्रतानां स्वरूपं कर्मकालञ्च निरूप्य ततः सप्तमीतिथौ विद्यमानानां व्रतानां स्वरूपेण सह कर्मकालो निरूपितः । ततश्चाष्टमीतिथौ जयन्ती-जन्माष्टम्योः स्वरूपं निरूप्य तत्र तयोः व्रतयोर्भेदञ्च प्रदर्श्य व्रतद्वये कीदृशी तिथिी ग्राह्या इत्यादिकं सर्वं सप्रमाणं निरूपितम् ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| अग्निहोत्रं- | सायं प्रातः क्रियमाणो होमविशेषः |
| अपवादः - | प्राप्तेः मानान्तरेण निषेधः |
| उत्पत्तिशिष्टं - | यस्य सृष्टिः कार्य्यते |
| उत्पन्नशिष्टं - | अन्यस्य सृष्टिकाले यत्स्वयं सृज्यते |
| उद्गाता - | सामवेदीय ऋत्विक् |
| उद्गीथः - | सामगानस्य भागविशेषः |
| काम्यं - | यस्य कर्मणःकरणे फलविशेषो लभ्यते |
| जन्माष्टमी- | श्रीकृष्णजन्मोत्सवव्रतविशेषः |
| जयन्ती - | रोहिणीनक्षत्रयुक्तजन्माष्टमीव्रतम् |
| जया - | प्रसङ्गादत्र अष्टमी |
| ज्योतिष्टोमः- | सोमयागविशेषः |
| नागविद्धा- | पञ्चमीविद्धा |
| नित्यं- | यस्य कर्मणोऽकरणे प्रत्यवायः |
| निशीथः- | मध्यरात्रः |
| पारणं- | व्रताङ्गभोजनम् |
| पौष्ठपदः- | भाद्रपदमासः |
| प्रकरणं - | अङ्गत्वबोधकप्रमाणेषु चतुर्थम् |
| प्रतिप्रसवः- | निषिद्धस्य पुनराचरणम् |
| प्रत्यवायः- | अनिष्टम् |

| | |
|---|---|
| प्राजापत्यर्क्षं- | रोहिणीनक्षत्रम् |
| बह्वृचाः- | ऋग्वेदीयाः |
| भद्रा- | प्रसङ्गादत्र सप्तमी |
| महाजनः- | शिष्टः |
| मातृविद्धा- | तृतीयाविद्धा |
| लिङ्गं - | सामर्थ्यम् अङ्गत्वबोधकं द्वितीयं प्रमाणम् |
| वाक्यशेषं - | सन्दिग्धे वाक्यशेषं प्रमाणं भवति |
| वाक्यं - | समभिव्याहारः |
| विद्धाधिका - | विद्धापि षष्टिदण्डापेक्षयाऽधिका |
| व्यतिरेकः - | तदभावे तदभावः |
| शुद्धाधिका- | शुद्धा सती याऽधिका |
| श्रुतिः - | निरपेक्ष्यरवः,अङ्गत्वबोधकप्रमाणेषु प्रथमं |
| समाख्या - | योगः |
| सान्नाय्यं- | दधिपयसी |
| साहचर्य्यं - | सन्निधिः,अङ्गत्वबोधकप्रमाणेषु पञ्चमं |
| स्थानं - | सन्निधिः |

## आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) विनायकव्रतस्य स्वरूपं प्रदश्र्य तस्य कर्मकालं निरूपयत ।
२) जन्माष्टम्याः स्वरूपं निर्दिश्य तत्र ग्राह्यातिथिं निरूपयत ।
३) जयन्तीव्रतस्य स्वरूपं प्रतिपाद्य तस्य कर्मकालं निरूपयत ।
४) जयन्तीजन्माष्टमीव्रतयोरैक्यं भेदो वेति माधवोक्तदिशा प्रतिपादयत ।
५) जयन्तीव्रतस्य नित्यत्वं काम्यत्वञ्च यथाग्रन्थं निरूपयत । ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) जन्माष्टमीजयन्त्योः भेदे निमित्तानि प्रदर्शयत ।
२) रोहिणीरहिता-रोहिणीसहिताऽष्टम्योः भेदान् निरूपयत ।
३) जयन्तीव्रतपारणे विशेषं निरूपयत ।
४) नामभेदाद् व्रतभेद इति सप्रमाणं प्रतिपादयत ।
५) जयन्तीजन्माष्टम्योरैक्ये भ्रमहेतून् निर्दिशत ।
६) ज्योतिरधिकरणस्य प्रासङ्गिकतां प्रतिपादयत ।
७) आमिक्षाधिकरणस्य तात्पर्यं विवृणुत।

## लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) रम्भातृतीयाव्रतस्य स्वरूपं निरूपयत ।
२) नागचतुर्थीव्रतस्य स्वरूपं निर्णयत ।
३) स्कन्दषष्ठीव्रतस्य कर्मकालं विचारयत ।
४) जयन्तीव्रतस्य स्वरूपं प्रदर्शयत
५) पारणस्य कर्मकालं निरूपयत ।
६) आश्रयाश्रयिभावं स्पष्टीकुरुत ।
७) सप्तमीतिथौ व्रतानि निर्दिशत ।

## एकाङ्कप्रश्नाः (प्रत्येकं१अङ्कः )

१) द्वितीया परविद्धा पूर्वविद्धा वा ?
२) रम्भातृतीया कीदृशी ग्राह्या ?
३) विनायकव्रते कः मुख्यकर्मकालः?
४) नागचतुर्थी परविद्धा पूर्वविद्धा वा ?
५) स्कन्दपञ्चमी पूर्वविद्धा परविद्धा वा ?
६) जन्माष्टमी कस्मिन् मासे पतति ?
७) जयन्तीव्रते किं नक्षत्रं निमित्तम् ?
८) जन्माष्टमीव्रते कीदृशो वेधो ग्राह्यः ?
९) जन्माष्टमीजयन्तीव्रतयोर्भेदोऽस्ति न वा ?
१०)विनायकव्रते कीदृशी तिथिः प्रशस्यते ?
११)नागचतुर्थीव्रतस्य कः कर्मकालः ?
१२)नागपञ्चम्यां कीदृशी तिथिः ग्राह्या ?
१३)जन्माष्टमीव्रतं नित्यं काम्यं वा ?
१४)पारणस्य कः कर्मकालः ?
१५)जयन्तीव्रते कदा पारणमिष्यते ?
१६)नीलज्येष्ठीव्रतं कदा पतति ?
१७)दूर्वाष्टमी पूर्वविद्धा परविद्धा वा ?
१८)दिनद्वये निशीथयोगे जयन्तीव्रतं कदा भवति ?

## एकाङ्कप्रश्नानामुत्तराणि

| | | |
|---|---|---|
| १) परविद्धा | २) पूर्वविद्धा | ३) मध्याह्नः |
| ४) परविद्धा | ५) परविद्धा | ६) भाद्रपदमासे |
| ७) रोहिणी | ८) निशीथवेधः | ९) अस्ति |
| १०) मातृविद्धा | ११) मध्याह्नः | १२)पूर्वविद्धा |
| १३) नित्यं | १४) पूर्वाह्णः | १५)तिथिनक्षत्रयोरन्ते |

१६) ज्येष्ठानक्षत्रयुक्ता श्रावणकृष्णाष्टमी १७)पूर्वविद्धा
१८) परदिने

**************

# द्वितीयग्रन्थिः(UNIT-VI to UNIT-X )

# षष्ठखण्डः – कालमाधवस्य नवमीतिथितः एकादशीतिथिनिर्णयान्तम्

## संरचना

VI.1.प्रस्तावना
VI.2. उद्देश्यम्
VI.3. नवमीतिथिनिर्णयः
VI.4. दशमीतिथिनिर्णयः
VI.5. एकादशीनिर्णयः

## VI.1 प्रस्तावना

कालमाधवस्य चतुर्थप्रकरणे द्वितीयादिपञ्चदश्यन्ततिथयो निर्णीताः। किन्त्वस्मिन् षष्ठे खण्डे नवमीतिथेरारभ्य एकादशीतिथिनिरूपणान्तं विचारो विहितः । तत्र नवम्यां कानि व्रतानि , सा कुत्र पूर्वविद्धा कुत्र च परविद्धेति निर्णीय दशम्याः तिथेः पूर्वविद्धत्वपरविद्धत्वविचारो विहितः । तदनन्तरं एकादश्युपवासस्य नित्यत्वं काम्यत्वञ्च विचार्य्य तत्र कीदृशश्च वेधो ग्राह्य इति प्रतिपाद्य स्मार्त्तवैष्णवभेदेन एकादश्युपवासः व्यवस्थापितः । वैष्णवाणां कृतेऽरुणोदय- वेधस्य निषेधं प्रतिपाद्य तत्रारुणोदयवेधस्य भेदा अपि प्रतिपादिताः। तदनन्तरमेकादश्युपवासेऽ- धिकारिणो निरूप्य तत्र प्रतिनिधिविचारोऽपि कृतः ।ततश्च एकादश्यां काम्योपवासक्रमं प्रतिपाद्य तद् व्रतानुष्ठानक्रमः प्रतिपादितः । तदनन्तरमेकादश्युपवासस्य महिमानं प्रतिपाद्य खण्डोऽयं परिसमापितः ।

## VI.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- नवमीतिथेः व्रतानां कर्मकालं निरूपयिष्यन्ति ।
- दशमीतिथौ व्रतानां कर्मकालान् पर्य्यालोचयिष्यन्ति ।
- एकादश्युपवासस्य नित्यत्वं काम्यत्वञ्च प्रदर्शयितुमर्हन्ति ।
- एकादश्यां कीदृशो वेधो ग्राह्यस्तत्स्वरूपं निरूपयितुमर्हन्ति ।
- स्मार्त्तानां वैष्णवाणाञ्च स्वरूपं प्रतिपादयिष्यन्ति ।
- स्मार्त्तवैष्णवभेदेन एकादश्युपवासं व्यवस्थापयितुमर्हन्ति ।

- अरुणोदयवेधस्य भेदान् निरूपयिष्यन्ति ।
- एकादश्याः अधिकारिणः निरूपयिष्यन्ति ।
- एकादश्याः प्रतिनिधीन् प्रदर्शयितुमर्हन्ति ।
- एकादश्याः काम्योपवासक्रमं निरूपयिष्यन्ति ।
- एकादश्याः महिमानं प्रदर्शयिष्यन्ति ।

## VI.3 नवमीतिथिनिर्णयः

नवमी " वसुरन्ध्रयोरिति " युग्मवाक्यात् पूर्वविद्धा ग्राह्या ।पुनश्च दशमी–विद्धाया नवम्याः साक्षान्निषेधात् परविद्धा नैव ग्राह्येत्यपि प्रतीयते । प्रसङ्गेऽस्मिन् पद्मपुराण– वचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् –

अष्टम्या नवमीविद्धा नवम्या चाष्टमीयुता ।
अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः।।इति।।

अतः शुक्लकृष्णपक्षयोरुभयोरपि नवमी पूर्वविद्धा ग्राह्या । चैत्रशुक्लनवम्यां रामनवमीव्रतं क्रियते । तद्व्रतस्य कर्मकालो मध्याह्नः ।तत्र मध्याह्ने नवमी यदि पुनर्वसुनक्षत्रयुक्ता भवति , तर्हि फलाधिक्यं कल्प्यते । यदि दैवात् नक्षत्रयोगो नास्ति , तथापि मध्याह्नव्यापिन्यां नवम्यामेव व्रतं करणीयम् । प्रसङ्गेऽस्मिन् कालमाधवे माधवाचार्येण प्रतिपादितं यत् –

चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ।।
चैत्रमासनवम्यान्तु जातो रामः स्वयं हरिः ।
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहात्मिका ।।इत्यादि ।।

## VI.4 दशमीतिथिनिर्णयः

दशमीविषये युग्मवचनमुदास्ते । सा चोभयविद्धा ग्राह्या यतः सर्वतोमुखी साप्युच्यते । प्रसङ्गेऽस्मिन्नुक्तमङ्गिरसा यत् –

सम्पूर्णा दशमी ग्राह्या परया पूर्वयाऽथवा ।
युक्ता न दूषिता यस्मात् तिथिः सा सर्वतोमुखी ।। इति ।।

अत्र सर्वतोमुखीकथनात् पूर्वविद्धा परविद्धा वेति पुरुषेच्छया नियम्यते ऽथवा तत्र शुक्लकृष्णपक्षभेदेन व्यवस्था ग्राह्या इति जिज्ञासायामुच्यते यत् –इच्छायां विकल्पस्वीकारात् विकल्पे चाष्टदोषदर्शनात् ,पूर्वविद्धाया ग्राह्यत्वं " दशमी चैव कर्त्तव्या सदुर्गा द्विजसत्तम ! " इति स्कन्दपुराणवचनमुत्थाप्य केचित् प्रतिपादयन्ति । केचिदपि परविद्धादशम्या निष्फलत्वं प्रदर्शयन्ति । एवभूतायां स्थितौ शुक्लकृष्णपक्षभेदेन

व्यवस्थाऽत्र समीचीना ।अर्थात् शुक्लपक्षे परविद्धा कृष्णपक्षे च पूर्वविद्धेति माधवाचार्यस्याभिप्रायः ।

स्वानुशीलनप्रश्नाः
१. नवमी पूर्वविद्धा परविद्धा वा ?
-----------------
२. दशमी पूर्वा परा वा ?
------------------
३. रामनवमी कदा भवति ?
-----------------

## VI.5 एकादशीनिर्णयः

एकादश्युपवासो नित्यः काम्यश्चेति द्विविधप्रमाणबलाद् ज्ञायते । उपवासविधिवाक्येषु नित्यत्वसाधकानां नित्यसदादिशब्दानां प्रयोगात् एकादशी नित्येति ज्ञायते । तानि च साधकानि यथा- नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।

इत्युक्त्वातिक्रमे दोष-श्रुतेरत्यागचोदनात् ।
फलाऽश्रुतेर्वीप्सया च तन्नित्यमिति कीर्त्तितम् ।।इति ।।

"उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि "इत्यत्र नित्यशब्दप्रयोगात् ," एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः"इति सदाशब्दप्रयोगात् ,"द्वादशी न प्रमोक्तव्या यावदायुः सुवृत्तिभिः"इति यावदायुः शब्दप्रयोगात्,"एकादश्यामुपावसेन्न कदाचिदतिक्रमेदिति "न कदाचिदतिक्रमेदित्यादि- शब्दप्रयोगात् ,अकरणे प्रत्यवायश्रवणाच्च एकादशीव्रतं नित्यमेवेति वक्तुं शक्यते ।

पुनश्च "यदीच्छेद् विष्णुसायुज्यं सुतान् सम्पदमात्मनः"इत्यादौ "यदीच्छेद् विपुलान् भोगान् " इत्यादौ च फलश्रवणादेकादशीव्रतं काम्यञ्च भवति । एतेनैकादशीव्रतस्य नित्यत्वे काम्यत्वे च द्वैरूप्यं स्वीक्रियते । नेदं द्वैरूप्यं दोषाय ,अपि तु गुणाय भवति । यतो हि निमन्त्रितेन ब्राह्मणेन क्रियमाणस्य भोजनस्य द्वे प्रयोजने ;अन्यकर्त्तृकश्राद्धनिष्पत्तिः स्वतृप्तिश्च । न च तत्र द्विर्भुज्यते ।तद्वत् सकृदेवोपवासं कुर्वतः काम्यप्रयोगो नित्यप्रयोगश्चेत्युभयं सिध्यति । अपि च सकृदनुष्ठानेनानेकार्थसिद्धिः प्रसङ्गवशाद्भवतीति स्मृतावपि प्रतिपादितम् । यथोक्तं कालमाधवे- काम्येऽपि नित्यसिद्धिः स्यात् प्रसङ्गेनोभयात्मकः इति। एतेन एकादश्युपवासस्य नित्यत्वं काम्यत्वञ्च युगपत्सिद्ध्यति ।

इयमेकादशी द्विविधा । दशमीविद्धा द्वादशीविद्धा चेति । तत्र दशमीवेधस्त्रिविधः। अरुणोदयवेधः ,सूर्य्योदयवेधः पञ्चदशनाडीवेधश्चेति ।

अरुणोदयविद्धैकादशी वैष्णवैस्त्याज्या । तस्य स्वरूपमुक्तं स्कन्दनारदाभ्यां यथा– उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदयः इति ।तत्रापि दशम्याः वेधतारतम्येनारुणोदयः चतुर्द्धा प्रदर्शितः । वेधः,अतिवेधः महावेधः योगश्चेति । तत्रा- रुणोदयस्य चतसृषु नाडिकासु यदि दशम्या केवलमर्द्धघटिका व्याप्ता , तर्हि स वेधः ,यदि घटिकाद्वयं दशम्या,घटिकाद्वयञ्चैकादश्या तर्हि सोऽतिवेधः , यदि सूर्यस्य दर्शनादर्शनसन्देहकालं यावद्दशम्या व्याप्तं तर्हि स महावेधः ,यदि सूर्योदयादनन्तरमेव एकादशी प्रारब्धा तर्हि स योग इति शब्देनोच्यते । सर्वप्रकारवेधोऽयमुपवासस्य दूषको भवति । तिथ्यन्तरवदत्र त्रिमुहूत्तवेधो न स्वीक्रियते ; किन्तूदयकाले दशम्या लवपरिमाणेन विद्धाप्येकादशी व्रष्णवैर्वर्जनीया भवति । प्रसङ्गेऽस्मिन् नारदीयपुराणवचनमुद्धृत्य माधवाचार्येण प्रतिपादितं यत् –

लववेधेऽपि विप्रेन्द्र दशम्येकादशीं त्यजेत् ।
सुराया विन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम् ।।इति ।।

वस्तुतः कोऽयं वैष्णव इति जिज्ञासायां स्कन्दपुराणे प्रतिपादितं यत् – वैखानसपञ्चरात्रादिवैष्णवागमोक्तदीक्षां प्राप्तो यः स वैष्णव इति । तस्य स्वरूपं तत्रैवोक्तं यथा–

परमापदमापन्ने हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी ।।
समात्मा सर्वजीवेषु निजाचारादविप्लुतः ।
विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते ।। इति ।।

एवं लक्षणलक्षितो यो वैष्णवः,तस्य कृते एकादशी द्विविधा ।अरुणोदयविद्धा शुद्धा चेति ।तत्र शुद्धैव ग्राह्या । सर्व्रप्रकाराऽरुणोदयविद्धा त्याज्या। शुद्धापि द्विविधा । आधिक्येन युक्ता तद्रहिता चेति । अधिक्यमपि त्रिविधम् । तद्यथा– एकादश्याधिक्यं, द्वादश्याधिक्यं उभयाधिक्यञ्चेति । त्रिष्वप्येतेषु पक्षेषु अरुणोदयमारभ्य प्रवृत्तामेकादशीं परित्यज्य परदिने उपवासं कृत्वा त्रयोदश्यां पारणं कुर्यात् । प्रसङ्गेस्मिन्नुक्तं माधवाचार्येण कालमाधवे यत् –

एकादशी यदा पूर्णा परतः पुनरेव सा ।
पुण्यं क्रतुशतस्योक्तं त्रयोदश्यान्तु पारणम् ।। इति ।।

यदा एकादशी लुप्ता परदिने द्वादशी चेत् तस्यां द्वादश्यामेवोपवासः कार्यः । एवं प्रकारेण एकादश्या आधिक्ये , द्वादश्याधिक्ये ,उभयाधिक्ये च द्वादश्यामेवोपवासः करणीयः ।एतेन वैष्णवाणामेकादश्युपवासव्यवस्था प्रतिपादिता ।

स्वानुशीलनप्रश्नाः
१. एकादश्या नित्यत्वे प्रमाणानि प्रदर्शयत ?
-----------------
२. एकादश्याः काम्यत्वे प्रमाणानि प्रदर्शयत ?
-----------------------------------
३. वैष्णवस्य स्वरूपं निरूपयत ?
---------------------------------
४. अरुणोदयस्य स्वरूपं भेदांश्च निरूपयत ?
-----------------
५. वैष्णवैः कीदृश्येकादशी उपोष्या तन्निरूपयत ?
---------------------------------

## यावज्जीवाधिकरणम्

नित्यैकादशी-काम्यैकादश्योः प्रयोगभेदाद् भेदः स्वीकरणीयः । तदर्थं यावज्जीवाधिकरणस्य प्रसङ्गोऽत्रोपस्थापितः । तस्याधिकरणस्य संग्राहकौ श्लोकौ जैमिनीय- न्यायमालायां माधवाचार्येण प्रतिपादितौ । तौ यथा -

यावज्जीवं जुहोतीति धर्मः कर्मणि पुंसि वा ।
कालत्वात्कर्मधर्मोऽतः काम्य एकः प्रयुज्यताम् ।।
न कालो जीवनं तेन निमित्तप्रविभागतः ।
काम्यप्रयोगो भिन्नः स्याद्यावज्जीवप्रयोगतः ।। इति ।।

यावज्जीवमग्निहोत्रं जुहोतीत्यत्र अग्निहोत्रस्य नित्यत्वं प्रतिपाद्यते । अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यत्राऽग्निहोत्रस्य काम्यत्वं विधीयते । तत्रायं संशयो यत् किं यावज्जीवमित्यनेन अधिकारान्तरं बोध्यते उत काम्याग्निहोत्रे गुणविधिरिति । तदर्थमन्यदपि विचार्य्यते यत् -किं वा यावज्जीव- मित्यस्य कर्मधर्म उत पुरुषधर्म इति ।तत्र यावज्जीवशब्देन पुरुषायुषपरिमितः कालोऽभिधीयते । काम्येन चाग्निहोत्रेण कालविशेष आकांक्षितो भवति ।तस्य च कालस्यानेन समर्पणादयं कर्मधर्मः। तस्मादत्र गुणविधिः ।अतः काम्यप्रयोग-नित्यप्रयोगयोरैक्यमिति पूर्वपक्षः । तत्रोच्यते यत् - यावज्जीवशब्दो न कालस्य वाचकः अपि तु लक्षकः। वाच्यार्थस्तु कृत्स्नं जीवनम् ।तच्च न कर्म- धर्मत्वेन विधातुं शक्यं तस्य प्राणधारणाभिधानात् पुरुषधर्मत्वात् न कालत्वम् । तेन स्वर्ग-कामनेव जीवनमपि किञ्चिन्निमित्तम् तस्मादधिकारान्तरं कल्पनीयम ।तथा सति जीवननिमित्तो नित्यप्रयोगः कामनानिमित्तश्च कादाचित्कप्रयोगः इत्युभयोः परस्परं भेदोऽ-ङ्गीकर्त्तव्यः ।तद्वदत्र नित्यैकादशी-काम्यैकादश्योर्मध्ये निमित्तभेदाद् प्रयोगभेदोऽङ्गीकर्त्तव्यः ।

## विविदिषाधिकरणम्

एकादश्या नित्यत्वे काम्यत्वे च स्वीकारे उभयोरेवोपवासयोरेकादश्यामेव प्राप्तत्वात् न तत्र कर्तृभेदः कल्पयितुं शक्यते । यद्यपि काम्यं परित्यज्य केवलं नित्यमनुष्ठातुं शक्यं तथापि काम्यमनुतिष्ठासुना नित्यस्य परित्यक्तुमशक्यत्वात् कर्त्रैक्यात् कालैक्याच्च नित्यकाम्यरूपयोर्द्वयोः प्रयोगयोः घटने दोषाभावं प्रतिपादयितुं विविदिषाधिकरणन्यायः उपस्थाप्यते । तेन न्यायेन सकृदेवानुष्ठानेन प्रयोगद्वयस्य सिद्धिः स्वीकृता । तस्य चाधिकरणस्य संग्राहकौ श्लोकौ जैमिनीयन्यायमालायां माधवाचार्येण प्रतिपादितौ । तौ यथा –

विद्यार्थमाश्रमार्थश्च द्विः प्रयोगोऽथवा सकृत् ।
प्रयोजनविभेदेन प्रयोगोऽपि विभिद्यते ।।
श्राद्धार्थभुक्त्या तृप्तिः स्याद्विद्यार्थेनाश्रमस्तथा ।
अनित्यनित्यसंयोग उक्तिभ्यां खादिरे मतः ।।इति ।।

अत्रायमभिप्रायो यत् – तमेतं वेदानुवचनेन ब्राह्मणा विवदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतिवाक्येन परमात्मविद्यायां यज्ञादयो विहिताः । यज्ञादीनां गृहस्थाद्याश्रम- धर्मत्वं सर्वश्रुतिस्मृतिषु प्रसिद्धम् ।तत्रायं संशयो यत् –किं यज्ञादीनां द्विः प्रयोगः उत सकृदिति । तत्र प्रयोजनभेदात् प्रयोगभेद इति पूर्वपक्षः । निमन्त्रितेन ब्राह्मणेन क्रियमाणस्य भोजनस्य द्वे प्रयोजने ; अन्यकर्तृकश्राद्धनिष्पत्तिः , स्वतृप्तिश्च । न च तत्र द्विर्भुज्यते । तद्वद् ब्रह्म विद्यार्थ- मनुष्ठितेन यज्ञादिकर्मणा प्रयोजनद्वयं सिद्ध्यति ।न च नित्यानित्यसंयोगविरोधः खादिरवद् वाक्यद्वयेन तदुपपत्तेः । तस्मात् सकृदेव प्रयोगः । एवमत्रापि सकृदेवोपवासेन काम्यप्रयोगो नित्यप्रयोगश्चेत्युभयमपि सिध्यति । अत्र तु काम्येऽपि प्रसङ्गान्नित्यसिद्धिः स्वीक्रियते ।अतः एकादश्युपवासस्य नित्यत्व-काम्यत्व-लक्षण-द्वैरूप्यविरोधो नास्तीति स्वीकार्यम् ।एतदर्थमेव विविदिषाधिकरणन्यायस्यावतरणं माधवाचार्येणात्र कृतम् ।

## स्मार्त्तानामेकादश्युपवासनिर्णयः

वैष्णवदीक्षारहिताः सर्वे स्मार्त्ता इत्युच्यन्ते । तेषां कृते वेधाऽतिवध-महावेधादयो दोषाय न भवन्ति । किन्तु सूर्योदयवेध एव केवलं वेधपदवाच्यो , स च दोषाय कल्प्यते ।अतः सूर्योदयकाले दशमी यदि एकादशीं विध्यति तर्हि सैकादशी दूषिता भवति नान्यथा । सा चोदयविद्धा एकादशी द्विधा । शुद्धा विद्धा चेति । शुद्धायां विद्धायाञ्च प्रत्येकं चत्वारो भेदा भवन्ति। ते यथा – एकादश्याधिक्यं , द्वादश्याधिक्यं , उभयाधिक्यं , अनुभयाधिक्यञ्चेति ।

तत्र शुद्धाधिकायामेकादश्यां पूर्वदिने गृही परदिने च यतिरुपवसेत् । एकादशी समा न्यूना अधिका वा भूत्वा द्वादश्या यदि आधिक्यं तर्हि शुद्धैकादश्युपोष्या।उभयाधिक्ये तु परेद्युरेवोपवासः ।अनुभयाधिक्ये तु सन्देहाभावात्पूर्वदिने एव । एवं विद्धाधिकायामेकादश्यामपि शुद्धाधिकायामिव पूर्वदिने गृही परदिने च यतिरुपवसेत् । विद्धैकादशी समा न्यूना अधिका वा सती द्वादश्या यदि आधिक्यं,तर्हि परदिने उपवासः कार्यः । उभयोराधिक्येऽपि परेद्युरेवोपवासः। अनुभयाधिक्ये तु विद्धायामेकादश्यामुपवासः कर्त्तव्यः ।

अयमेवात्र निष्कर्षो यत् शुद्धा-विद्धयोरुभयोः पक्षयोरेकादशी-द्वादश्योरुभयोरपि च वृद्धौ परदिने उपवासः।उभयोरप्यवृद्धौ पूर्वेद्युरुपवासः । एकादशीमात्रवृद्धौ पूर्वदिने गृही ,परदिने च यतिरुपवसेत् । द्वादशीमात्रवृद्धौ शुद्धायं सर्वेषां पूवेद्युः , विद्धायाञ्च परेद्युरिति निर्णयः ।

## एकादश्युपवासेऽधिकारिणः

अष्टवर्षवयस्काद् बालादारभ्य अशीतिवर्षवयस्कं वृद्धं यावत् सर्वेषामेकादश्युपवासे- ऽधिकारो विद्यते । प्रसङ्गेऽस्मिन्नारदवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

अष्टवर्षाब्दिको मर्त्यो ह्यपूर्णाशीतिहायनः ।

भुंक्ते यो मानवो मोहादेकादश्यां स पापकृत् ।। इति ।।

गृहस्थस्य कृते तु शुक्लायामेकादश्यां नित्योपवासः । उक्तं कूर्मपुराणे प्रसङ्गेऽस्मिन् यत्-

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।

ब्रह्मचारी च नारी च शुक्लामेव सदा गृही ।। इति ।।

नारी च विधवाऽत्र गृह्यते । तस्या यतिधर्मत्वमेव सर्वत्रोपदिष्टम् । यतो हि सधवाया धर्मे पृथगधिकारो नास्ति । सा पत्युरनुमत्यैव व्रतोपवासादिकं कुर्य्यात् ।शुक्लैकादशीमिव गृहस्थः शयनी-बोधनीमध्ये विद्यमाना या चतस्रः कृष्णैकादश्यः तासु तस्य नित्योपवासः । अन्यासु कृष्णैकादशीषु पुत्रवतो गृहस्थस्योपवासो निषिद्धः । उपवासनिषेधेऽपि तत्र किञ्चिद् फलमूलादिकं भक्षयेत् अथवा नक्तैकभक्तादिना दिनं नयदिति तात्पर्यम् । स्वयं कश्चिदुपवासं कत्तुमसमर्थश्चेत् स प्रतिनिधिना उपवासं कारयेत् ।भार्यापुत्रभ्रात्रादयः दौहित्रश्च प्रतिनिधयो भवितुमर्हन्ति ।परन्तु काम्यकर्मणि कदापि प्रतिनिधिः नैव स्वीकरणीयः। एकादश्युपवासस्य नित्यत्वेऽकरणे प्रत्यवायो भवति ,तदर्थञ्च प्रायश्चित्तमपि धर्मशास्त्रेषु विहितम् ।

स्वानुशीलनप्रश्नाः
१.के स्मार्त्ताः ? तेषामेकादश्युपवासव्यवस्थां प्रदर्शयत ?
----------------
२. एकादश्युपवासेऽधिकारिणो विचारयत ।
------------------
३. एकादश्यां तिथिवेधं निरूपयत ?
----------------
४. यावज्जीवाधिकरणस्य प्रासङ्गिकतां विचारयत ।
------------------
५. विविदिषाधिकरणस्य तात्पर्यमालोचयत ?
----------------

## काम्योपवासक्रमः

फलोद्देश्येन एकादश्युपवासं कुर्वतः केचन नियमाः सन्ति । स दशम्यां रात्रौ एकादश्यां सम्पूर्णे दिवसे द्वादश्याञ्च रात्रौ भोजनं वर्जयेत् ।अर्थात् तेन दशम्यां द्वादश्याञ्च मांसमैथुनादि- वर्जनपूर्वकमेकभक्तं कृत्वा एकादश्यां सम्पूर्णोपवासः कार्यः । तस्मिन् समये तेन तैलमामिषं मधु मसूरचणकादिकञ्च न भोक्तव्यम् ।पुनश्च कांस्यपात्रभोजनं दिवाशयनं ,अत्यम्बुपानं ,ताम्बूल- चर्वणं ,चण्डालादिभिः सह भाषणं ,दन्तकाष्ठचर्वणञ्च न कर्त्तव्यम् । प्रसङ्गेस्मिन् देवल-वसिष्ठादिवचनान्युत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः ।
एकादशीमुपवसेत् पक्षयोरुभयोरपि ।।
कांस्यं मासं मसूरांश्च चणकान् कोरदूषकान् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ।।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ।
असकृज्जलपानच्च दिवास्वापञ्च मैथुनम् ।।
ताम्बूलचर्वणं मांसं वर्जयेद् व्रतवासरे ।।इत्यादि ।।

एकादश्यां वार्षिकश्राद्धादिप्राप्तौ तत्रोपवास्य नित्यत्वात् पितृसेवितं पिण्डमाघ्रापयेत् ; तस्य भोजनकार्ये विधानात् । एवं काम्योपवासस्यायं क्रमः ।

## व्रतानुष्ठानक्रमः

व्रती दशम्यामेकभक्तं कृत्वा दन्तधावनं कुर्य्यात् ।ततः रात्रौ नियमं गृह्णीयात् । तत्पर- दिने प्रातरुत्थाय बाह्याभ्यन्तरशुचिं कृत्वा वारिपूर्णमुदुम्बरपात्रं गृहीत्वा

उदङ्मुखः सन् सङ्कल्पं गृह्णीयात् । सङ्कल्पप्रकारश्च विष्णुनोक्तः कालमाधवे प्रतिपादितो यथा -

एकादश्यां निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्यामि पुण्डरीकाक्ष ! शरणं मे भवाच्युत ।।इति ।।

एवं सङ्कल्पं कृत्वा विष्णवे पुष्पाञ्जलिं दत्त्वा अष्टाक्षरमन्त्रेणाभिमन्त्रितं पात्रगतं जलं पिबेत् । तदनन्तरं विष्णुं पुष्पधूपदीपनैवेद्यादिभिर्बहुभिरुपचारैः पूजयित्वा जपहोमप्रणिपाता- दिभिः रात्रौ जागरणं कुर्यात् । ततः द्वादश्यां स्नात्वा हरिं पूजयित्वा पूर्वाह्णे पारणं कुर्यात् । एकादश्यां सूतके मृतके वा सति हरिस्मरणपूर्वकमुपवासं कुर्यात् ,दानार्चनादिकञ्च सूतकान्ते कार्यम् । एवं स्त्रियां रजःस्वलायां सत्यामपि स्वयं केवलमुपवासादिकं कृत्वा शुद्ध्यनन्तरं दानार्चनादिकं कुर्यात् ;तथा सति तस्या व्रतलोपो न भवति ।एकादशी-द्वादश्योर्युगपदुपवासे प्राप्ते सति द्वादश्यां जलेन पारणां कृत्वा द्वादशीमुपवसेत् । तेन एकादशीपारणा द्वादश्यु- पवासश्चोभयमपि सिध्यति । प्रसङ्गेऽस्मिन् देवलवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् ।
अद्भिस्तु पारणं कुर्यात् पुनर्भुक्तं न दोषकृत् ।। इति ।।

## एकादशीमहिमा

एकादश्युपवासेन सर्वाणि पातकानि नश्यन्ति । सहस्राश्वमेधयागस्य फलमेकादश्युप- वासस्य षोडशांशेन सहापि तुल्यं न भवति। स्वर्गमोक्षराज्यपुत्रकलत्रारोग्यादिफलमेकादश्युप- वासेन लभ्यत इति तत्प्रशंसायामुक्तम् । समर्थः सम्पूर्णोपवासं कुर्यादसमर्थश्च नक्तैकभक्ता- याचितादिना एकादशीं यापयेत् । एवमेकादश्या निर्णयो विहितः ।

स्वानुशीलनप्रश्नाः

१.एकादश्यां काम्योपवासक्रमं प्रदर्शयत ?

----------------

२. एकादशीव्रतानुष्ठानक्रमं विचारयत ।

-----------------

३. एकादश्युपवासस्य महिमानं प्रदर्शयत ?

----------------

## सारांशः

अस्मिन् खण्डे नवम्याः तिथिं निरूप्य ततः दशमीतिथौ व्रतानां कर्मकालाः पर्य्या- लोचिताः ।तदनन्तरमेकादश्या नित्यत्वं काम्यत्वञ्च प्रदर्श्य तत्र कीदृशो वेधो ग्राह्यस्तदपि विचार्य स्मार्त्तानां वैष्णवाणाञ्च स्वरूपनिर्द्देशपुरःसरं स्मार्त्तवैष्णवभेदेन एकादश्युपवासो व्यवस्थापितः । पुनश्चारुणोदयस्य स्वरूपं निर्द्दिश्य तस्य भेदांश्च प्रतिपाद्य , एकादश्याः अधिकारिणः निरूपिताः ।तदनन्तरमेकादश्युपवासाऽसमर्थस्य कृते तत्प्रतिनिधीन् प्रदर्श्य,एकादश्याः काम्यो- पवासक्रमश्च निरूपितः । तत एकादशीव्रतानुष्ठानक्रममुपस्थाप्य एकादश्युपवासस्य महिमा प्रदर्शितः ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| अतिवेधः- | अरुणोदयप्रथममुहूर्त्ते दशमीव्याप्तिः |
| अरुणोदयः- | सूर्योदयात्प्राक् चतस्रघटिका |
| अश्वमेधः- | सोमयागविशेषः |
| अष्टाक्षरमन्त्रः- | ॐ नमो नारायणाय |
| ऐन्दवम् - | चान्द्रायणम्म् |
| कपालवेधः - | अर्द्धरात्रे दशम्या एकादशीवेधः |
| क्रत्वर्थः- | क्रत्वर्थमेवानुष्ठीयमानः |
| गृही - | गृहस्थः |
| चान्द्रायणम् - | मासात्मकप्रायश्चित्तविशेषः |
| तन्त्रं - | मिलितानुष्ठानम् |
| त्रिस्पृशा - | एकस्मिन् दिने तिथित्रयं स्पृशति या |
| दिनक्षयः - | यस्मिन् दिवसे द्वयोः तिथ्योरन्तः सः |
| नन्दा - | एकादशी |
| नष्टचन्द्रा - | अमावास्या |
| पञ्चगव्यम् - | गोमूत्रं ,गोमयं ,क्षीरं ,दधि सर्पिश्च |
| पुरुषार्थः - | पुरुषस्यैव प्रयोजनीयः द्रव्यविशेषः |
| बोधनी- | कार्त्तिकशुक्लैकादशी |
| महावेधः - | सूर्यमण्डलदर्शनसन्देहवेलायां दशमीवेधः |
| योगः- | सूर्योदयकाले दशमीवेधः |
| वाजपेयः- | सोमयागविशेषः |
| वेधः- | अरुणोदयप्रथमघटिकायां दशमीसद्भाव ः |
| वैष्णवः - | विष्ण्वर्पिताखिलाचारः |
| व्यतीपातः - | योगविशेषः |
| शयनी - | आषाढशुक्लैकादशी |
| सङ्कीर्णैकादशी - | महावेधयुक्तैक्रादशीं |
| सन्दिग्धैकादशी - | कृत्स्नघटिकावृत्तिदशमीयुक्तैकादशी |

| | |
|---|---|
| सम्पृक्तैकादशी- | प्रारम्भमात्रे दशमीयुक्तैकादशी |
| संयुक्तैकादशी - | अतिवेधयुक्तैकादशी |
| सूतकम् - | जननाशौचम् |
| स्मार्त्तः- | वैष्णवेतरः |

## आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) नवम्यास्तिथेर्व्रतानां स्वरूपं कर्मकालञ्च निरूपयत ।
२) दशम्याः पूर्वद्धित्वं परविद्धत्वं वेति विचार्य तत्र ग्राह्यातिथिं निरूपयत ।
३) एकादश्याः नित्यत्वं काम्यत्वञ्चप्रतिपादयत ।
४) स्मार्त्तवैष्णवभेदेनैकादश्युपवासं व्यवस्थापयत ।
५) एकादश्युपवासेऽधिकारिणः  निरूपयत ।
६) एकादशीव्रतानुष्ठानस्य क्रमं प्रतिपादयत।
७) एकादश्युपवासस्य महिमानं प्रदर्शयत।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) नवमी पूर्वविद्धा परविद्धा वेति प्रतिपाद्य रामनवम्याः कर्मकालं निरूपयत।
२) दशम्याः पूर्वविद्धत्वं परविद्धत्वं वेति सप्रमाणं प्रतिपादयत ।
३) एकादश्या नित्यत्वे प्रमाणानि प्रदर्शयत ।
४) एकादश्या काम्यत्वे प्रमाणानि प्रदर्शयत ।
५) वैष्णवमते एकादश्युपवासव्यवस्थां निर्द्दिशत ।
६) स्मार्त्तमते एकादश्युपवासं व्यवस्थापयत।
७) एकादश्युपवासस्य कृते दशम्यां कर्त्तव्यानि निर्द्दिशत ।
८) एकादश्युपवासेऽधिकारिणः प्रदर्शयत ।
९) विविदिषाधिकरणस्य प्रासङ्गिकतां प्रतिपादयत ।
१०) यावज्जीवाधिकरणस्य तात्पर्य्यं प्रदर्शयत ।

### लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) नवम्यां व्रतानि निरूपयत ।
२) दशम्या वेधव्यवस्थां निर्णयत ।
३) वैष्णवस्य स्वरूपं प्रदर्शयत ।
४) विद्धैकादशीभेदान् निर्द्दिशत ।
५) एकादश्यां  सङ्कल्पप्रकारं प्रदर्शयत।
६) एकादश्युपवासे प्रतिनिधीन्  स्पष्टीकुरुत ।

७) अरुणोदयस्य स्वरूपं प्रदर्शयत ।
८) विषमसङ्कटे पारणव्यवस्थां प्रदर्शयत ।
९) एकादश्यां वार्षिकश्राद्धप्राप्तौ व्यवस्थां प्रदर्शयत ।

## एकाङ्कप्रश्नाः (प्रत्येकं१अङ्कः )

१) नवमी परविद्धा पूर्वविद्धा वा ?
२) दशमी कीदृशी ग्राह्या ?
३) एकादश्यां कति नित्यत्वसाधकानि ?
४) अरुणोदयः कियत्कालात्मकः ?
५) अरुणोदयः कतिविधः ?
६) अरुणोदयप्रथममुहूर्ते दशमीव्याप्तौ को वेधः ?
७) कृत्स्नघटिकावृत्तिदशमीयुक्तैकादशी का ?
८) अर्द्धरात्रे दशम्या एकादशीवेधस्य का संज्ञा ?
९) एकस्मिन् दिने तिथित्रयं स्पृशति या सा कीदृश्येकादशी ?
१०) कः वैष्णवः ?
११) सूर्यमण्डलदर्शनसन्देहवेलायां यो दशमीवेधः तस्य का संज्ञा ?
१२) यस्मिन् दिवसे द्वयोः तिथ्योरन्तः सः क उच्यते ?
१३) महावेधयुत्तैकादश्याः का संज्ञा ?
१४) प्रारम्भमात्रे दशमीयुक्तैकादशी का?
१५) अतिवेधयुक्तैकादशी का?
१६) कः हरिवासरः
१७) का शयन्येकादशी ?
१८) का बोधन्येकादशी ?
१९) अरुणोदयस्य कः तुरीयो वेधः ?
२०) कः स्मार्त्तः ?

## एकाङ्कप्रश्नानामुत्तराणि

| | |
|---|---|
| १) पूर्वविद्धा | २) कृष्णे पूर्वा शुक्ले परा |
| ३) अष्टौ | ४) दण्डचतुष्टयात्मकः |
| ५) चतुर्विधः | ६) अतिवेधः |
| ७) सन्दिग्धैकादशी | ८) कपालवेधः |
| ९) त्रिस्पृशा | १०) विष्णवर्पिताखिलाचारः |
| ११) महावेधः | १२) दिनक्षयः |
| १३) सङ्कीर्णैकादशी | १४) संपृक्तैकादशी |
| १५) संयुक्तैकादशी | १६) एकादशी |

१७) आषाढशुक्लैकादशी
१८) कार्त्तिकशुक्लैकादशी
१९) योगः
२०)वैष्णवेतरः

************

# सप्तमखण्डः- कालमाधवस्य द्वादशीतिथिनिर्णयादारभ्य चतुर्दशीतितिथिनिर्णयान्तम्

संरचना

VII.1.प्रस्तावना
VII.2. उद्देश्यम्
VII.3. द्वादशीतिथिनिर्णयः
VII.4. त्रयोदशीतिथिनिर्णयः
VII.5. चतुर्दशीतिथिनिर्णयः
VII.6. शिवरात्रिव्रतम्

## VII.1 प्रस्तावना

कालमाधवस्य चतुर्थप्रकरणे द्वितीयादिपञ्चदश्यन्ततिथयो निर्णीताः। किन्त्वस्मिन् सप्तमे खण्डे द्वादशीतिथेरारभ्य चतुर्दशीतिथिनिरूपणान्तं विचारो विहितः । तत्र द्वादश्यां कानि व्रतानि,सा पूर्वद्धिा परविद्धा वेति निर्णीय त्रयोदश्याः तिथेः पूर्वविद्धपरविद्धत्वविचारो विहितः । तदनन्तरं चतुर्दश्याः सामान्यनिर्णयं कृत्वा शिवरात्रिशब्दस्य रूढत्वं, यौगिकत्वं ,लाक्षणिकत्वं, योगरूढत्वं वेति सयुक्तिकं मीमांसान्यायदृष्ट्या विचार्य्य ,शिवरात्रिव्रते निशीथवेधस्य प्राधान्यं प्रतिपाद्य ,तत्र च ग्राह्यातिथिर्निरूपिता । एवं खण्डोऽयं परिसमापितः ।

## VII.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- द्वादशीतिथेः व्रतानां कर्मकालं निरूपयिष्यन्ति ।
- त्रयोदशीतिथौ व्रतानां कर्मकालान् पर्य्यालोचयिष्यन्ति ।
- चतुर्दश्याः सामान्यतिथिनिर्णयं प्रदर्शयितुमर्हन्ति ।
- शिवरात्रिशब्दस्य व्युत्पत्तिं निरूपयितुमर्हन्ति ।

- शिवरात्रिव्रते तिथिवेधं प्रतिपादयिष्यन्ति ।
- शिवरात्रिव्रते ग्राह्यातिथिं व्यवस्थापयितुमर्हन्ति ।

---

## VII.3 द्वादशीतिथिनिर्णयः

युग्मवाक्याद् द्वादशी एकादशीविद्धा ग्राह्याः रुद्रेण द्वादशीयुक्तेति वचनात् । सा च त्रयोदशीविद्धा न ग्राह्या इत्यपि प्रतिपादितम् ।एवं सति सर्वदा एकादशी–द्वादश्युपवासयो–रेकस्मिन् दिने प्रप्तिर्भवति । तेन न कापि क्षतिः ,यतो हि उभयोर्दवता हरिरेव । तस्यां दशायां एकेनोपवासेन द्वयोरपि सिद्धिर्भवति । यदि उपवासद्वयं तिथिभेदेन पृथक् पतति ,तर्हि द्वादश्यां प्रातः जलेन पारणं कृत्वा द्वादश्याः कृते उपवासकरणेऽपि न कश्चन दोषः; आपोऽ- शितमनशितञ्चेति वचनात् । पुनश्चैकादशीद्वादश्योरेकदेवतात्वात् जलपारणं विनापि न कश्चिद्दोषः । प्रसङ्गेऽस्मिन् माधवाचार्येण प्रतिपादितं यत् –

एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।<br>न तत्र विधिलोपः स्यादुभयोर्दैवतं हरिः ।।इति ।।

एवञ्चोपवासद्वयाऽशक्तौ केवलं द्वादश्युपवासेनोभयोरपि फलं सिध्यतीति द्वादशीनिर्णयः ।

स्वानुशीलनप्रश्नाः

१.द्वादश्युपवासविधिं प्रदर्शयत ?

-----------------

२. एकादशीद्वादश्योर्युगपदुपवासप्राप्तौ पारणं विचारयत ।

------------------

३. द्वादश्यां किंदेवताकं व्रतं क्रियते ?

-----------------

---

## VII.4. त्रयोदशीतिथिनिर्णयः

शुक्लकृष्णभेदेन त्रयोदश्याः व्यवस्था । त्रयोदशीनिर्णये युग्मवचनमुदास्ते । अतः शुक्लत्रयोदशी परविद्धा कृष्णा च परविद्धेति । यदा कृष्णपक्षे पराऽपि नोपलभ्यते तदा तत्र पूर्वविद्धा ग्राह्या । प्रसङ्गेस्मिन् वसिष्ठवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् –

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।

पूर्वविद्धापि कर्त्तव्या यदि न स्यात्परेऽहनि ।। इति ।।

मार्गशीर्षशुक्लत्रयोदशी अनङ्गत्रयोदशी । तस्मिन् व्रते तिथिः पूर्वविद्धा ग्राह्या । अस्मिन् प्रसङ्गे संवर्त्तवचनमुद्धृत्य माधवाचार्येण प्रतिपादितं यत् -

कृष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी ।
अनङ्गत्रयोदशी रम्भा उपोष्याः पूर्वसंयुताः ।। इति ।।

एतेनानङ्गत्रयोदश्या सह सामान्यत्रयोदशीनिर्णयोऽपि व्यवस्थितः ।

स्वानुशीलनप्रश्नाः

१.त्रयोदश्याः पूर्वविद्धत्वं परविद्धत्वं वा प्रदर्शयत ?

-----------------

२. अनङ्गत्रयोदशीव्रतविधिं विचारयत ।

------------------

३. केन नियमेन त्रयोदशीनिर्णयः क्रियते तल्लिखत ।

-----------------

## VII.4.चतुर्दशीतिथिनिर्णयः

शुक्लचतुर्दशी परविद्धा ग्राह्या " चतुर्दश्या च पूर्णिमेति "युग्मवाक्यात्। यद्यपि भाद्रशुक्लचतुर्दश्यां यदनन्तव्रतं तत्र चतुर्दशी पूर्वविद्धा परविद्धा वा मध्याह्नव्यापिनी ग्राह्या , तस्य व्रतस्य मध्याह्न एव कर्मकालत्वादिति केचन वदन्ति । किन्तु तन्न समीचीनम् ; तत्र मध्याह्नकालविधायकवचनाभावात् । एतेन दैवे ह्यौदयिकी ग्राह्येति सामान्यवचनेन तत्रोदय- त्रिमुहूर्त्तव्यापिनी तिथिर्ग्राह्या । चैत्र-श्रावणशुक्लपक्षे चतुर्दश्यौ रात्रिव्यापिन्यौ ग्राह्ये । एतेन कृष्णचतुर्दशी पूर्वविद्धा ग्राह्येति प्रतीयते। प्रसङ्गेऽस्मिन्नापस्तम्बवचनमुत्थाप्य माधवाचार्येण कालमाधवे सम्यक्तया प्रतिपादितं यत् -

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्त्तव्या परविद्धा न कर्हिचित् ।। इति ।।

एवं सामान्येन शुक्लचतुर्दशी परा कृष्णचतुर्दशी च पूर्वा ग्राह्येति निर्णयः ।

## VII.4 शिवरात्रिव्रतम्

माघकृष्णचतुर्दश्यां शिवरात्रिव्रतं क्रियते । तत्र प्रथमं शङ्का भवति यत् शिवरात्रिशब्दोऽयं रूढो यौगिकौ लाक्षणिको योगरूढो वेति । तत्र तिथिविशेषे शिवरात्रिशब्दो रूढ इति केचिद्व- दन्ति । तेषामियं युक्तिर्यत् यथा अहीनशब्दः सोमयागविशेषे रूढस्तथायं शिवरात्रिशब्दः । अन्ये शिवस्य रात्रिः शिवरात्रिरिति

व्युत्पत्त्या शिवरात्रिशब्दोऽश्वकर्णशब्दवद् यौगिक इति प्रति- पादयन्ति ।यदि यौगिकत्वं स्वीक्रियेत ,तर्हि शिवसम्बन्धि सर्वं व्रतं यस्यां यस्यां रात्रावनुष्ठीयते सा सर्वापि शिवरात्रिः स्यात् । किन्तु रूढिपक्षे माघमासकृष्णपक्षस्य चतुर्दश्या एव तिथेः केवलं शिवरात्रित्वम्।अस्मादेतयोर्द्वयोर्मध्ये "योगाद्रूढिर्बलीयसीति", "रूढिर्योगापहारिणी" त्यादिना रूढिपक्ष एवाद्रियते ।अतोऽहीनशब्दवद् शिवरात्रिशब्दो रूढः इति प्रथमपक्षः ।

अन्ये तु प्रोक्षणीन्यायेन शिवसम्बन्धिनी रात्रिः शिवरात्रिरिति व्युत्पत्त्या शिवरात्रिशब्दो यौगिक इति वदन्ति । यथा उक्ष सेचने इत्यस्माद्धातोः करणे ल्युट्प्रत्ययेन शब्दं व्युत्पाद्य प्रकर्षेणोक्ष्यते अनेनेति योगेन सेचनसाधनमुदकादिकं सर्वं पोक्षणशब्दवाच्यं सम्पद्यते । पुनश्च तस्मिन् शब्दे ङीप् प्रत्यये कृते प्रोक्षणीरिति शब्दो निष्पद्यते । अतस्तेन न्यायेन प्रोक्षणीशब्दवत् शिवरात्रिशब्दोऽपि योगिक इति द्वितीयपक्षः।

अपरे तु शिवरात्रिशब्दो लाक्षणिक इति स्वीकुर्वन्ति । यतो हि तिथिवाचकेन तेन शब्देन तत्तिथौ क्रियमाणस्य व्रतविशेषस्य लक्ष्यमाणत्वात् । प्रसङ्गेऽस्मिन् माधवाचार्येण ईशानसंहितावचनमुत्थाप्य कालमाधवे प्रतिपादितं यत् –

शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ।।
अर्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी ।
तत्तिथावेव कुर्वीत शिवरात्रिर्वतं व्रती ।।इत्यादि ।।

अतः तिथिवाचकेन शब्देन व्रतविशेषस्य लक्षितत्वात् लाक्षणिकोऽयं शिवरात्रिशब्दः इति तृतीयपक्षः । एतान् पक्षान् निरस्य सिद्धान्तवादिना शिवरात्रिशब्दो निर्मन्थ्यन्यायेन नावनीतन्यायेन वा योगरूढ इति प्रतिपादितः ।यथा निर्मन्थ्यशब्दो यौगिकः सन्नपि अचिरनिर्मथितार्थे रूढः यथा च नावनीतशब्दः नूतनपुरातनयोः घृतयोः योगेन प्रतीयमानः सन्नपि नूतने एव घृते रूढः,तथा शिवरात्रिशब्दोऽयं शिवस्य रात्रिः शिवरात्रिरिति तत्पुरुषसमासेन योगेन प्रवर्त्तमानः सन्नपि रूढ्या माघकृष्णचतुर्दशीरूपे कालविशेषे नियम्यते । अतः शिवस्य रात्रि-र्यस्मिन् व्रते इति बहुव्रीहिसमासेन प्रवृत्तः शब्दः रूढ्या व्रतविशेषे नियम्यते ।अत एव शिवरात्रि- शब्दो न केवलयौगिकः ,न केवलरूढः ,न वा लाक्षणिकः ,अपि तु योगरूढ एवेति सिद्धान्तः ।

स्वानुशीलनप्रश्नाः

१.शुक्लचतुर्दशी पूर्वविद्धा परविद्धा वा ?

---------------

२. कृष्णचतुर्दशी पूर्वविद्धा परविद्धा वा ?

----------------

३. अनन्तव्रतं कदाऽनुष्ठीयते ?

---------------

४. शिवरात्रिशब्दः यौगिकः रूढो लाक्षणिकः योगरूढो वा ?

---------------

रा

तदेव शिवरात्रिव्रतमेकादशीजन्माष्टमीव्रतवत् संयोगपृथक्त्वन्यायेन नित्यं काम्यञ्चेति।तस्याऽकरणे प्रत्यवायश्रवणात् वीप्सा-नित्य-निश्चलादिशब्दैरवगमात् नित्यत्वं प्रतीयते। अस्मिन् प्रसङ्गे स्कन्दपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

परात्परतरं नास्ति शिवरात्रिः परात्परम् ।
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् ।
जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः ।।इत्यादि ।।

पुनश्च "वर्षे वर्षे महादेवीति" वीप्साश्रवणात् ," निश्चलं हि शिवव्रतम् " इति निश्चल- शब्दप्रयोगाच्च , शिवरात्रिव्रतं नित्यम् । अपि च तस्यैव व्रतस्य करणे फलश्रवणात् तत् काम्यमपि भवति । अस्मिन् प्रसङ्गे तदेव स्कन्दपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत्-

शिवञ्च पूजयित्वा यो जागर्त्ति च चतुर्दशीम् ।
मातुः पयोधररसं न पिबेत्स कदाचन ।।
यदीच्छेद् वाञ्छितान् भोगान् दिवि देवमनोरमान्।
आगमोक्तविधिं कृत्वा प्राप्नोति परमं पदम् ।।इत्यादि ।।

एवं व्रतस्यास्य नित्यत्वं काम्यत्वञ्च प्रतिपाद्य , तस्मिन् व्रते के तावदधिकारिण इति जिज्ञासायां प्रतिपादितं यत् व्रतेऽस्मिन् आचाण्डालमनुष्याणामधिकारो विद्यते । तस्यैव व्रतस्य स्वरूपं त्रिविधम् । उपवासो जागरणं पूजा चेति । कश्चिन्निषादः अजानन्नपि स्वयं लिङ्गमभ्यच्चर्य सोपवासः सजागरश्च भूत्वा शिवगणेऽपि स्थानमवाप्तवान्निति सह्यखण्डाद् ज्ञायते । केवलपूजया केवलजागरणेन , केवलोपवासेनापि कश्चित् रुद्रसमतां प्राप्नोतीति व्रतस्यास्य महती प्रशंसा श्रूयते । अत एतेषां त्रिविधानां व्रतस्वरूपाणां मध्येऽन्यतमस्य विकल्पेनानुष्ठानेन सर्वेषां वा समुच्चयेनानुष्ठानेन जनः फलविशेषं प्राप्नोतीत्यत्र नास्ति सन्देहः ।

## VII.5 शिवरात्रिव्रते तिथिनिर्णयः

सामान्येन माघकृष्णचतुर्दशी पूर्वेद्युः उदयव्यापिनी त्रयोदशीविद्धा परेद्युश्चाऽ- स्तमयव्यापिनी दर्शविद्धा भवति ।विशेषेण शिवरात्रिव्रते प्रदोषवेधः निशीथवेधश्च स्वीकरणीयः । प्रसङ्गेऽस्मिन् वायुपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु ।
भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत् ।।इति ।।

पुनश्च प्रदोषव्यापिनी ग्राह्या शिवरात्रि-चतुर्दशी ।
रात्रौ जागरणं यस्मात् तस्मात्तां समुपोषयत् ।। इति ।।

निशीथवेधविषये नारदीयसंहितायां प्रतिपादितं यत् -

अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ।। इति ।।

एवं प्रदोषनिशीथोभयव्यापिनी तिथिः शिवरात्रिव्रते ग्राह्या । अतः पूर्वेद्युः परेद्युर्वा यत्र निशीथप्रदोषोभयव्याप्तिः तत्र व्रतमाचरणीयम् । निशीथप्रदोषोभयव्याप्तिरपि दिनद्वये नैव सम्भा- व्यते यामद्वयवृद्धेरभावात् । दिनद्वये उभयव्याप्त्यभावोऽपि न सम्भाव्यते यामद्वयक्षयस्याभावात् । एकैकस्मिन् दिने एकैकमव्याप्तौ पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिश्च । तत्र एकैकव्याप्ते- र्दिनद्वये समानत्वेऽपि जयायोगस्य प्रशस्तत्वात् दर्शयोगस्य निन्दितत्वाच्च पूर्वेद्युरेवोपवासः । यदा चतुर्दशी पूर्वेद्युः निशीथादूर्ध्वं प्रवृत्ता,परेद्युः क्षयवशान्निशीथादर्वागेव समाप्ता,तदा पूर्वेद्युः प्रदोष-निशीथव्याप्त्योरुभयोरप्यसम्भवात् परेद्युः प्रदोषव्याप्तेरेकस्या एव सद्भावाच्च परविद्धैव ग्राह्या । प्रसङ्गेऽस्मिन् स्मर्यते यत् -

माघासिते भूतदिनं कदाचिदुपैति योगं यदि पञ्चदश्याः ।
जयाप्रयुक्तं न तु जातु कुर्यात् शिवस्य रात्रिं प्रियकृच्छिवस्य ।। इति ।।

यदा पूर्वेद्युः प्रदोषादूर्ध्वं प्रवृत्ता चतुर्दशी ,परेद्युः क्षयवशात् प्रदोषादर्वागेव समाप्ता, तदा परेद्युः व्याप्तिद्वयाभावात् पूर्वेद्युर्निशीथव्याप्तेः सद्भावाज्जयायोगाच्च पूर्वेद्युरेवोपवासः । अर्थात् दिनद्वये निशीथव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका । पुनश्च दिनद्वयेऽपि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामिका । एकैकस्मिन् दिने एकैकव्याप्तौ जयायोगान्निर्णय इति ।

सा च शिवचतुर्दशी त्रिधा भवति । एकतिथ्यात्मिका , तिथिद्वयात्मिका , तिथित्रया- त्मिका चेति । तत्र सूर्योदयमारभ्य प्रवृत्ता परदिनोदयपर्यन्तैकतिथ्यात्मिका । सा वेधदोषाभात् प्रशस्ता । तिथिद्वयात्मकत्वञ्च द्वेधा भवति ,जयायोगेन दर्शयोगेन च । तत्र योगद्वयमेकैकस्मिन् विषये प्रशस्तम् । तिथित्रयात्मकत्वञ्चातिप्रशस्तम् । सा च त्रिस्पृशेति पदेन व्यवह्रीयते । अतः प्रसङ्गेऽस्मिन्नुक्तं माधवाचार्येण कालमाधवे यत् -

त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी ।
अन्ते चैव सिनीवाली त्रिस्पृश्यां शिवमर्चयेत् ।।इति ।।

तस्यां त्रिस्पृश्यां यदि रविवारो भौमवारो वा शिवयोगेन सह पतति , तर्हि तद् व्रतमुत्तमोत्तमं भवति । एवं प्रकारेण पूर्वविद्धायां तिथावुपवासं कृत्वा परदिने तित्यन्ते

पारणं कार्यं तिथिमध्ये वेति संशये तिथ्यन्तपारणाऽसम्भवे तिथिमध्येऽपि पारणं कर्त्तुं शक्यते । प्रसङ्गेऽस्मिन् स्कन्दपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते वाऽथवा न वा ।।इति ।।

अत्रेदं तात्पर्यं यत् यदा यामत्रयादर्वागेव चतुर्दशी परिसमाप्यते , तदा तिथ्यन्ते पारणम् । यदा तु चतुर्दशी यामत्रयमतिक्रामति तदा चतुर्दशीमध्ये पूर्वाह्णे पारणं कर्त्तव्यम् ।

स्वानुशीलनप्रश्नाः

१.शिवरात्रिव्रतं नित्यं काम्यं वा ?

-----------------

२. शिवरात्रिव्रते केऽधिकारिणः ?

------------------

३. शिवरात्रिव्रते कीदृशो वेधो ग्राह्यः ?

-----------------

४.दिनद्वये प्रदोषव्याप्तौ शिवरात्रिव्रतं कदा भवति ?

-----------------

५. शिवरात्रिव्रते कीदृशी पारणव्यवस्था ?

-----------------

६.दिनद्वये निशीथव्याप्तौ शिवरात्रिव्रतं कदा भवति ?

## सारांशः

अस्मिन् खण्डे द्वादश्याः तिथिं निरूप्य ततः त्रयोदशीतिथौ व्रतानां कर्मकालाः पर्य्या- लोचिताः ।तदनन्तरं सामान्येन चतुर्दशीनिर्णयं कृत्वा शिवरात्रिशब्दस्य अहीनन्यायेन रूढत्वं , प्रोक्षणीन्यायेन यौगिकत्वं प्रतिपाद्य , तृतीयपक्षे लाक्षणिकत्वं च प्रतिपाद्य सयुक्तिकं तन्निरस्य निर्मन्थ्यन्यायेन शिवरात्रिशब्दस्य योगरूढत्वं माधवाचार्येण प्रतिपादितम् । तदनन्तरं शिवरात्रि- व्रतस्य नित्यत्वं काम्यत्वञ्च प्रदर्श्य , तत्र प्रदोषनिशीथवेधयोर्युगपद्व्याप्तौ एकैकव्याप्तौ च निर्णयः प्रतिपादितः । ततश्च शिवरात्रिव्रते तिथ्यन्ते तिथिमध्ये वा पारणं कार्य्यं तत् सम्यक्तया विचारितम् । एवं खण्डेऽस्मिन् विचारः प्रदर्शितः ।

## पारिभाषिकशब्दाः

अनुकल्पः - गौणकल्पः
अमलपक्षः - शुक्लपक्षः
अवयुत्यानुवादः - पृथक्कृत्य पुनर्विधानम्

| | |
|---|---|
| अहीनः – | सोमयागविशेषः |
| उपसत् – | होमविशेषः |
| कुहूः– | प्रतिपन्मिश्रिता पञ्चदशी |
| त्रिस्पृशा – | एकस्मिन् दिने तिथित्रयसमावेशः |
| प्रोक्षणी – | अभिमन्त्रणपात्रविशेषः |
| महानिशा – | निशीथः |
| यामः – | प्रहरः |
| योगः – | यौगिकः |
| योगरूढः– | यौगिकः सन्नपि रूढः |
| राका– | प्रतिपन्मिश्रिता पूर्णिमा |
| राद्धान्तः – | सिद्धान्तः |
| रूढिः – | प्रसिद्धिः |
| लाक्षणिकः– | लक्ष्यार्थबोधकशब्दः |
| सम्मुखी – | सायाह्नव्यापिनी |

## आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) द्वादश्याः तिथेः व्रतानि निरूपयत ।

२) त्रयोदश्या वेधविचारं कृत्वाऽनन्तत्रयोदशीव्रतं प्रतिपादयत ।

३) शिवरात्रिशब्दो रूढो यौगिकः लाक्षणिकः योगरूढो वेति सयुक्तिकं निरूपयत ।

४) शिवरात्रिव्रते ग्राह्यातिथिं विचारयत ।

५) शिवरात्रिव्रते पारणा तिथ्यन्ते तिथिमध्ये वेति निरूपयत । ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) शिवरात्रिशब्दस्य व्युत्पत्तिं निरूपयत ।

२) अहीनन्यायं सप्रसङ्गं प्रतिपादयत ।

३) प्रोक्षणीन्यायस्य तात्पर्यं सप्रसङ्गं स्पष्टयत ।

४) निर्मन्थ्यन्यायस्य प्रासङ्गिकतां यथाग्रन्थं प्रतिपादयत ।

५) शिवरात्रिव्रते पारणव्यवस्थां प्रदर्शयत ।

### लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) शिवरात्रिशब्दस्य रूढत्वं प्रदर्शयत ।

२) शिवरात्रिशब्दस्य यौगिकत्वं प्रतिपादयत ।

३) शिवरात्रिशब्दस्य योगरूढत्वं विचारयत ।

४) शिवरात्रिशब्दस्य लाक्षणिकत्वं प्रदर्शयत ।
५) पारणस्य कर्मकालं प्रदर्शयत ।
६) निशीथस्य स्वरूपं प्रदर्शयत ।

एकाङ्कप्रश्नाः (प्रत्येकं१अङ्कः )

१) अनङ्गत्रयोदशी कदा भवति ?
२) शिवरात्रिव्रतं कदा पाल्यते ?
३) प्रदोषस्य कः कालः ?
४) कः निशीथः ?
५) का सम्मुखीतिथिः ?
६) पारणशब्दस्य कोऽर्थः ?
७) का राका ?
८) कुहूशब्दस्य कोऽर्थः ?
९) त्रिस्पृशाशब्देन किं बोध्यते ?
१०)दिनद्वये निशीथ-प्रदोषयोर्व्याप्तिर्भवितुमर्हति न वा ?
११)शिवरात्रिव्रतस्य नित्यत्वं , काम्यत्वमुभयत्वं वा ?
१२)शुक्लचतुर्दशी पूर्वा परा वा ?
१३)नावनीतशब्दो यौगिको योगरूढो वा ?
१४)अहीनशब्दो रूढो लाक्षणिको यौगिको वा ?
१५)प्रोक्षणीशब्दः यौगिकः योगरूढो वा ?
१६)रूढियोगयोर्मध्ये कस्य प्राबल्यम् ?
१७)श्रावणशुक्लचतुर्दश्यां कीदृशी तिथिर्गाह्या ?
१८)कृष्णचतुर्दशी पूर्वविद्धा परविद्धा वा ?
१९)द्वादशी पूर्वविद्धा परविद्धा वा ?

## एकाङ्कप्रश्नानामुत्तराणि

१) मार्गशीर्षशुक्लपक्षे
२) माघकृष्णचतुर्दश्याम्
३) सूर्यास्तादनन्तरं घटिकात्रयम्
४) मध्यरात्रः
५) सायाह्नव्यापिनी
६) व्रताङ्गभोजनम्
७) प्रतिपन्मिश्रिता पूर्णिमा
८) प्रतिपन्मिश्रिताऽमावास्या
९) एकस्मिन् दिवसे तिथित्रयस्पर्शिनी
१०) नार्हति
११) उभयत्वम्
१२) परा
१३) योगरूढः
१४) रूढः
१५) यौगिकः
१६) रूढेः
१७) रात्रिव्यापिनी
१८) पूर्वविद्धा
१९) पूर्वविद्धा

*************

# अष्टमखण्डः- कालमाधवस्य पञ्चदशीतिथिनिर्णयादारभ्य इष्टिकालनिर्णयान्तम्

संरचना

VIII.1.प्रस्तावना
VIII.2. उद्देश्यम्
VIII.3. पञ्चदशीनिर्णयः
VIII.4. इष्टिकालनिर्णयः
VIII.5. विकृतीष्टिकालः
VIII.6. अमावास्यापूर्णिमयोः शब्दार्थविचारः

## VIII.1 प्रस्तावना

कालमाधवस्य चतुर्थप्रकरणे द्वितीयादिपञ्चदश्यन्ततिथयो निर्णीताः। किन्त्व-स्मिनष्टमे खण्डे पञ्चदशीतिथेरारभ्येष्टिकालनिर्णयं यावद् विचारो विहितः । तत्र पञ्चदश्यां पूर्णिमाऽमावास्ययोः स्वरूपं निर्णीय तस्याः पूर्वविद्धत्वं परविद्धत्वं वेति विचार्य तत्र व्रतोपवासा- दीनां कृते नियतकालो निरूपितः । तदनन्तमिष्टिकालनिर्णयप्रसङ्गेऽमावास्याशब्दस्य पूर्णिमा- शब्दस्य च व्युत्पत्तिं ,भेदांश्च निर्णीय शाखाभेदेन इष्टिकालस्य स्वरूपं विवेचितम् । तत्र सन्धि- कालमपेक्ष्य इष्टिकालो विचारितः ।अपि च प्रकृतिविकृतिभेदेनेष्टेर्द्विविधं प्रदर्श्य तत्र द्वयोरनुष्ठाने क्रमोऽपि विवेचितः । सर्वासामिष्टीनां प्रकृतिभूताया दर्शपूर्णमासेष्टेः विचारोऽत्र माधवाचार्येण खण्डेऽस्मिन् निर्णीतः ।

## तखखख.२.उद्देश्यम्

प्रियपाठकाः! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- पञ्चदशीतिथेः स्वरूपं निरूपयिष्यन्ति ।
- इष्टेः कालान् पर्य्यालोचयिष्यन्ति ।

- अमावास्या-पूर्णिमयोः स्वरूपं भेदांश्च प्रदर्शयितुमर्हन्ति ।
- अमावास्याशब्दस्य बहुधा व्युत्पत्तिं निरूपयितुमर्हन्ति ।
- प्रकृतिविकृतिभेदेनेष्टेः स्वरूपं प्रतिपादयिष्यन्ति ।

## VIII.3. पञ्चदशीनिर्णयः

पञ्चदशी द्विविधा । पूर्णिमा अमावास्या चेति । शुक्लपञ्चदशी पूर्णिमा कृष्ण- पञ्चदशी चाऽमावास्या । तत्र "चतुर्दश्या च पूर्णिमा "इति युग्मवचनानुसारेण पूर्णिमा पूर्वविद्धा ग्राह्या । पुनश्च ब्रह्मपुराणवचनमुत्थाप्य माधवाचार्येण पूर्णिमायाः परविद्धानिषेधत्वं पूर्वविद्धा विधायकत्वञ्च प्रतिपादितम् । तद्वचनं यथा-

षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाऽष्टमी ।
पूर्णिमा परविद्धा च नोपोष्यं तिथिपञ्चकम् ।। इति ।।

एवं परस्परविरोधिवचनद्वयलाभात् सा तिथिः व्रतविशेषे व्यवस्थिता । अतः सावित्रि- व्रते पञ्चदशीयं पूर्वविद्धा ; अन्यत्र च परविद्धेति । ज्येष्ठपूर्णिमायां महाराष्ट्रादिषु सावित्रिव्रतं पाल्यते । उत्कलवङ्गादिराज्येषु तु ज्येष्ठामावास्यायाम् । अतः पूर्णिमायां भवतु , अमायां वा तत्राऽनुष्ठीयमानं सावित्रीव्रतं पूर्वविद्धायामेव कार्यम् । व्रतान्तरे तु परविद्धा न पूर्वविद्धेति । यदा तु चतुर्दशी अष्टादशदण्डात्मिका तदा सावित्रीव्रतमपि पूर्वदिने न कृत्वा परदिने कुर्यात् । यतो हि अष्टादशदण्डात्मिका चतुर्दशी पञ्चदशीं विध्यति । स च वेधो दोषाय कल्प्यते " भूतोऽष्टा- दशनाडीभिर्दूषयत्युत्तरां तिथिमिति "वचनात् । प्रसङ्गेऽस्मिन् माधवाचार्येण स्कन्दपुराणवचन- मुदाहृत्य कालमाधवे सम्यक्तया प्रतिपादितं यत् -

भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ।
वर्जयित्वा तु सावित्रीव्रतन्तु शिखिवाहन ! ।। इति ।।

अमावास्यावत् पूर्णिमायामपि वार्षिकं पितृश्राद्धं भवति । तत्रापराह्ण एव कर्मकालः इति प्रतिपत्प्रकरणे प्रतिपादितम् । तत्रापराह्णव्याप्तिः द्वेधा भवति । एकदेशेन कात्स्न्र्येन चेति । एकदेशव्याप्तिरपि द्वेधा । साम्येन वैषम्येण चेति । वैषम्येणैकदेशव्याप्तौ महत्त्वेन निर्णयः ।अर्थाद् यस्मिन् दिनेऽधिकांशः तद्दिने श्राद्धं करणीयम् । साम्येनैकदेशव्याप्तौ खर्वादिवाक्यान्निर्णयः । साम्येनोभयत्रैकदेशव्याप्तिश्च तत्तिथिगतैर्वृद्धिक्षयसाम्यैः त्रिधा भिद्यते । तद्यथा- पूर्वेद्युरपराह्णस्य द्वितीयघटिकामारभ्य परेद्युरपराह्णस्य चरमघटिकां विहायाऽवशिष्टासु पञ्चघटिकासु यदा तिथिः वर्त्तते , तदा पूर्वापराह्णस्य प्रथमघटिकां द्वितीयापराह्णस्य चरम- घटिकाञ्च विहायाऽवशिष्टासु पञ्चसु घटिकासु वर्त्तमानत्वात्साम्येनैकदेशव्याप्तिर्भवति । तदा तिथिः घटिकाचतुष्ट्येन वर्द्धते । यदा पूर्वापराह्णस्य चरमघटिकायां द्वितीयापराह्णस्य प्रथम- घटिकायाञ्च वर्त्तते तदापि साम्येनैकदेशव्याप्तिर्भवति । तदा तिथिः घटिकाचतुष्टयेन क्षीयते । यदा पूर्वापराह्णस्य चरमघटिकात्रये द्वितीयापराह्णस्य चाद्यघटिकात्रये तिथिर्वर्त्तते तदापि साम्येनै-

कदेशव्याप्तिर्भवति ।तदा तिथिः न वर्द्धते नापि क्षीयते किन्तु समैव भवति । ईदृशविषये खर्व-दर्पवाक्यान्निर्णयः । तच्च खर्वादिवाक्यं सर्वतिथिसाधारण्येन प्रवृत्तत्वादमावास्यायामपि प्रवर्त्तते ।

पूर्वविद्धामावास्या सिनीवाली,परविद्धामावास्या च कुहूरिति कथ्यते। सिनीवाली दृष्टचन्द्रा कुहूश्च नष्टचन्द्राशब्देन च व्यवह्रीयते । दिनद्वयेऽपराह्णव्याप्तौ च साग्निकैः द्विजैः श्राद्धं पूर्वदिने अर्थात् सिनीवाल्यां निरग्निकैः स्त्रीशूद्रादिभिश्च श्राद्धं परदिने अर्थात् कुह्वां समनुष्ठेयम् । प्रसङ्गेऽस्मिन् जाबालिलौगाक्ष्योः वचनोद्धारपूर्वकं माधवाचार्येण प्रतिपादितं यत् –

स्वानुशीलनप्रश्नाः

१.अमावास्या पूर्वविद्धा परविद्ध वा ?

-----------------

२. सावित्रीव्रतं कदा भवति ?

------------------

३. सावित्रीव्रते तिथिः पूर्वविद्धा परविद्धा वा ?

-----------------

४. अमावास्याश्राद्धं द्विजैः कदा कार्यम् ?

----------------

अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ।।इति ।।
सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ।।इति ।।

एवं प्रकारेण सावित्रीव्रतस्य तिथिनिर्णयेन सह अमावास्यायां पूर्णिमायां च पार्वणविधिना क्रियमाणस्य श्राद्धस्य विधानं माधवोक्तदिशा प्रतिपादितम् । एकोद्दिष्टस्य कुतपप्राधान्यं प्रतिपत्प्रकरणे पूर्वं प्रतिपादितम् ।

## VIII.4. इष्टिकालनिर्णयः

ओषधिप्रधानयाग इष्टि । ओषध्यः फलपाकान्ता इति मनुवचनानुसारेण ओषधि- शब्देन ब्रीहियवादयो गृह्यन्ते । यवैर्ब्रीहिभिर्वा पुरोडाशादिकं निर्माय यत्राग्न्याद्युद्देश्येन दीयते तत्रेष्टिर्भवतीति कथ्यते । सर्वासामिष्टीनां प्रकृतिः दर्शपौर्णमासः ।अन्याः सर्वा विकृतय उच्यन्ते। सा चेष्टिः कदा कार्या इति वीक्षायामुच्यते यत् – पर्वप्रतिपदोः सन्धाविति । स च सन्धिकालः एतावान् सूक्ष्मः यश्चर्मचक्षुषा द्रष्टुं न शक्यते । तस्मात् सन्धेरुभयोः पार्श्वयोः यागः करणीयः । तत्र पर्वणोऽन्तिम एकचतुर्थांशः प्रतिपदश्चादिमः त्रिचतुर्थांशः यागकालत्वेनोपकल्पितः ।

पर्वशब्देनामावास्या पूर्णिमा चेति बोध्यते । अमावास्यापि द्विविधा पूर्वविद्धा परविद्धा च । पूर्वविद्धा सिनीवाली परविद्धा च कुहूरिति । तद्वत् पूर्णिमापि द्विविधा । पूर्वविद्धापूर्णिमा अनुमतिः परविद्धा पूर्णिमा च राकेति कथ्यते । एतेषु चतुर्षु पर्वसु कुहूव्यतिरिक्तानां त्रयाणां पर्वभेदानां लघ्वक्षरपरिमितः कालः सन्धिरित्युच्यते । कूह्वास्त्वक्षरद्वयपरिमितः कालः । प्रसङ्गेऽस्मिन् भग- वतीपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

अनुमत्याश्च राकायाः सिनीवाल्याःकुहूं विना ।
एतासां द्विलवः कालः कुहूमात्रा कुहूः स्मृता ।। इति ।।

तत्र कोकिलेन कुह्विति उक्ते यावान् कालोऽपेक्ष्यते स एव कुहूकालः । अयं सन्धिकालः पूर्वस्माद् द्विगुणः । एवं स्वल्पीयसि सन्धिकाले यागानुष्ठानाऽसम्भवात् लक्षणया पार्श्वद्वयं स्वीकृत्य, तस्मिन् काले यागः कर्त्तव्यः । अतोऽमावास्यायाः अन्तिमचतुर्थांशे यागमारभ्य प्रतिपदः तृतीयांशाभ्यन्तरे यागः समापनीयः इति नियमः । प्रतिपदः चतुर्थांशो यथा यागे निषिद्धः, तथा प्रतिपदः प्रारम्भात् प्राग् यदि यागः समाप्यते , तर्हि तत्रापि दोषः । प्रसङ्गेऽस्मिन् वृद्धशातातप-वचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः ।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः ।। इति ।।

एवं पर्वणि अन्वाधानदिकं प्रतिपदि चेष्टिः इति सन्धेः पार्श्वद्वये यागस्य प्रारम्भपरिसमाप्ती बोद्धव्ये । अत्रान्वाधानशब्देन उपवासः आयतनशोधनसमित्संग्रहादिकर्माणि बोध्यन्ते ।यदाऽमावास्या शुक्लप्रतिपच्च शुद्धे तिथी भवतः तदा न कश्चित् सन्देहः । परन्तु यदा तौ खण्डतिथी भवतः तदा कदेष्टिः कार्या इति विषये निर्णय आवश्यकः । तत्र पर्वप्रतिपदोः सन्धिकालमपेक्ष्य यागकालः निर्णीयते । प्रसङ्गेऽस्मिन्नुक्तं गोभिलेन यत् -

आवर्त्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत् ।
तदहर्याग इष्येत परतश्चेत्परेऽहनि ।।
पर्वप्रतिपदोः सन्धिरर्वागावर्त्तनाद्यदि ।
तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः ।।
आवर्त्तनात्परः सन्धिर्यदि तस्मिन्नुपक्रम ।
परेद्युरिष्टिरित्येष पर्वद्वयविनिश्चयः ।। इति ।।

अत्रावर्त्तनं नाम मध्याह्नः , अह्नो मध्यभागः । अत्रायमभिप्रायो यत् - यदि सन्धिः मध्याह्ने मध्याह्नात्प्राग् वा पतति तर्हि पूर्वदिनेऽन्वाधानं कृत्वा तद्दिने यागः करणीयः । यदि मध्याह्नात्परं सन्धिः तर्हि तत्सन्धिदिनेऽन्वाधानादिकं कृत्वा परदिने यागः कार्यः । उषःकाले सन्धौ प्रतिपदः प्रथमांशः यागकालः , निशीथे सन्धौ प्रतिपदः

द्वितीयांशः , रात्रिप्रारम्भे सन्धौ प्रतिपदः तृतीयांशः । अनेन न्यायेनाऽपराह्णे सन्धौ प्रतिपदः चतुर्थांशो यागकालत्वेन प्राप्यते । परन्तु तस्य निषेधात् याग एव लुप्येत इति हेतोः कालस्य कृते कर्मणो लोपो मास्तु इति नियमात् सद्यस्कालविधौ प्रतिपदश्चतुर्थांशे यागानुष्ठानेऽपि न दोष इति प्रतिपादितम् ।

तत्र शाखाभेदेनापि इष्ट्यनुष्ठाने भेदविशेषः परिलक्ष्यते। तेषु यागदिने सायं चन्द्रदर्शनं आश्वलायनापस्तम्बादीनां कृते दोषाय भवति । तस्मात्तत्र कात्यायनेन प्रायश्चित्तं विहितम् । यथा प्रतिपादितं माधवाचार्येण कालमाधवे –

यजनीयेऽह्नि सोमश्चेद् वारुण्यां दिशि दृश्यते ।
तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद् द्विजातये ।। इति ।।

परन्तु बौधायनादीनां कृते गुणाय भवति । अत तैः शाखाभेदेन दिनभेदेनानुष्ठानं क्रियते । यथा तैत्तिरीयाः अस्याः प्रशंसां कुर्वन्तः प्रतिपादयन्ति यत् – एषा वै सुमना नामेष्टिः यमभिर्यजमानं पश्चाच्चन्द्रमाऽभ्युदेति,अस्मिन्नेवाऽस्मै लोके समृद्धिर्भवति । इति। एवं प्रकृतीष्टेः कालो निरूपितः ।

## VIII.5.विकृतीष्टिकालः

सर्वासामिष्टीनां प्रकृतिर्दर्शपूर्णमासाविति पूर्वं प्रतिपादितम् ।अन्याः सर्वा इष्टयः विकृतीष्टिपदवाच्याः । प्रकृतिवद्विकृतिर्भाव्या इति न्यायेन प्रकृतौ निर्दिष्टाः सामान्य- नियमा विकृतावतिदेशेन प्राप्यन्ते ।तत्र केवलं विशेषनियमाः प्रतिपाद्यन्ते । आवर्त्तने तत्पूर्वं वा पर्वप्रतिपत्सन्धौ सति तस्मिन् सन्धिदिने प्रकृतीष्टिं कृत्वा पश्चाद् विकृतीष्टिः कार्या । यदि आवर्त्तनात्परं सन्धिः तदा केवलं विकृतियागः सन्धिदिने कर्त्तव्यः । प्रकृतियागस्तु सन्धिदिनात्परेद्युः कार्यः । एतेन ज्ञायते यत् – आवर्त्तने , ततः पूर्वं ततः परं वा सन्धिरिति त्रिष्वेतेषु पक्षेषु सन्धिदिने एव विकृतीष्टेरनुष्ठानम् । प्रकृतेस्तु पूर्वोक्तरीत्या सन्धिदिने परेद्युश्चानुष्ठानमिति । प्रसङ्गेऽस्मिन् कात्यायनवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् –

आवर्त्तनात्प्राग् यदि पर्वसन्धिः
कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः ।
तत्रैव यागः परतो यदि स्यात्
तस्मिन् विकृत्याः प्रकृतिं परेद्युः ।। इति ।।

विकृतीष्टिवत् विकृतिपशुयाग-विकृतिसोमयागयोरपि विधिरुन्नेयः । सर्वेषां पशुयागानां प्रकृतिः अग्निषोमीयपशुयागः ।अन्ये सर्वे वायव्यपशुयागा विकृतिभूताः ।तद्वत् सर्वेषां सोमयागानां प्रकृतिः अग्निष्टोमः। अत्यग्निष्टादयः सर्वे विकृतिभूता भवन्ति ।सर्वत्र विकृतियागानां पर्वैव कालः ।अत एवोक्त मापस्तम्बेन- यदीष्ट्या यदि पशुना यदि सोमेन यजेत ,सोऽमावास्यायां पौर्णमास्यां वा यजेत ।इति।

दर्शयाग-पौर्णमासयागयोर्मध्ये व्यवधानं पञ्चदशदिनानि स्युः । अर्थात् पूर्वप्रतिपद्दिनमारभय गणनायामागामिप्रतिपद्दिनं षोडशं भवति चेत् सा अभीष्टा । यदि व्यवधानं पञ्चदशदिनं भवति , तर्हि सा मध्यमा । यदि चतुर्दशदिनं भवति , तर्हि सा जघन्या । यदि सप्तदशदिनं भवति , तर्हि सा प्रतिषिद्धा भवति पापा सप्तदशेऽहनीति वचनात् ।

स्वानुशीलनप्रश्नाः

१.का नाम इष्टिः ?

----------------

२. सर्वासामिष्टीनां का प्रकृतिः ?

-----------------

३. इष्टिः कदा कार्या ?

----------------

४. किं नाम आवर्त्तनम् ?

----------------

५. विकृतीष्टिः सन्धिदिनात्परदिने भवति न वा ?

----------------

६. सर्वेषां पशुयागानां का प्रकृतिः ?

----------------

७. सर्वेषां सोमयागानां का प्रकृतिः ?

----------------

## VIII.6. अमावास्यापूर्णिमयोः शब्दार्थविचारः

अमावास्या इत्यत्र शब्दद्वयम् । अमा वसुश्चेति । अमाशब्दस्य चत्वारोऽर्थाः । सहभावः कन्या सूर्यरश्मिः चन्द्रकला चेति । वसुशब्दस्यापि चत्वारोऽर्थाः । इन्द्रश्चन्द्रः पितृ-विशेषः निवासश्चेति । तत्र सहभाववाचिनममाशब्दमिन्द्रवाचिनं वसुशब्दञ्चोररीकृत्य एवं निर्वचनं भवति यत् अमा वसुरस्यामिति अमावास्या । अर्थात् यस्मिन् दिने इन्द्रः वृत्रासुरं हत्वा समागत्य देवैः सह मिलितः ,तदा सर्वैः देवैरिन्द्रस्य सहभावः प्रापितः । अतस्तस्य दिनस्यामावास्यात्वम् । यदा वसुशब्दश्चन्द्रवाची तदा सहभाववाचिनममाशब्दमूररीकृत्य एवं वक्तव्यं यत् -पश्वौषधीभिः सह चन्द्रो वसति यस्यां रात्रौ साऽमावास्येति । पुनश्च यदा अमाशब्दः कन्यावाची वसुशब्दश्च पितृवाची तदा एवमर्थः कर्त्तव्यो यत् -अमां वसुर्नैच्छदस्यां रात्रौ साऽमावास्येति । अर्थात् अमानाम्नी काचित्कन्या तस्यां रात्रौ वसुनामानं पितरं वव्रे । स च पिता धर्मलोभाद्भीतः सन् तां कन्यां नैच्छत् । अतस्तद्दिनममावास्येत्युच्यते ।

अपि च यदा अमाशब्दः सूर्यरश्मिः , वसुशब्दश्च निवासवाची तदा निर्वचनमेवं कर्त्तव्यं यत्-सूर्यरश्मौ चन्द्रो वसति यस्मिन् दिने साऽमावास्येति । प्रसङ्गेऽस्मिन् स्कन्दपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् –

अमा नाम रवेः रश्मिः सहस्रप्रमुखः स्मृतः ।
यस्य वै तेजसा सूर्यः प्रोक्तस्त्रैलोक्यदीपकः ।
तस्मिन् वसति येनेन्दुरमावास्या ततः स्मृता ।। इति ।।

पुनश्च अमावसुशब्दयोः सहभावनिवासवाचित्वमाश्रित्य एवं निरुच्यते यत् – चन्द्रसूर्ययोरेकत्र सहवासः यस्यां रात्रौ साऽमावास्येति । प्रसङ्गेऽस्मिन् वायुपुराण-ब्रह्माण्ड- पुराणयोर्वचनमुत्थाप्य माधवाचार्येण कालमाधवे सम्यक्तया प्रतिपादितं यत् –

अमा वसेतामृक्षे तु यदा चन्द्रदिवाकरौ ।
एषा पञ्चदशी रात्रिरमावास्या ततः स्मृता ।।

अपि च अमाशब्दस्य चन्द्रकलावाचित्वं स्वीकृत्य भगवतीपुराणे प्रतिपादितं यत् –

कलाऽवशेषो निष्क्रान्तः प्रविष्टः सूर्यमण्डलम् ।
अमायां विशते यस्मादमावास्या ततः स्मृता ।। इति ।।

अमावास्याशब्दस्य पर्यायवाचिशब्दो दर्शः । सूर्याचन्द्रमसौ परस्परं पश्यतोऽत्रेति दर्शः । अर्थाद् यस्मिन् दिने सूर्यचन्द्रौ एकस्मिन् राशौ अधोऽधः स्थितौ परस्परं पश्यतः तद्दिनममावास्येति कथ्यते । अत एवोक्तं गोभिलेन प्रसङ्गेस्मिन् यत् यः परो विप्रकर्षः सूर्य्याचन्द्रमसोः सा पौर्णमासी ,यः परः सन्निकर्षः साऽमावास्येति । अमावास्या द्विविधा सिनीवाली कुहूश्चेति ।तद्वत् पौर्णमासी च द्विविधा । अनुमतिः राका चेति । कलोना अनुमतिः , सम्पूर्णचन्द्रा राका । दिवा दृष्टे चन्द्रे अनुमतिः चन्द्रे रात्रिदृष्टे च राकेति कथ्यते । उभयोः स्वरूपं मत्स्यब्रह्माण्डपुराणयोः संगृह्य माधवाचार्येण प्रतिपादितं यत् –

यस्मात्तामनुमन्यन्ते पितरौ दैवतैः सह ।
तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता ।।
अत्यर्थं राजते यस्यां पौर्णमास्यां निशाकरः ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयो विदुः ।। इति ।।

एवं प्रकारेणामावास्यापूर्णिमयोः स्वरूपं निर्वचनञ्च विचारितम् ।

स्वानुशीलनप्रश्नाः

१.अमाशब्दस्य केऽर्थाः ?

-----------------

२. वसुशब्दस्य केऽर्थाः ?

------------------

३. अमावास्या कतिविधा ?

-----------------

४. राकाशब्स्य का व्युत्पत्तिः ?

-----------------

५. अनुमतिशब्दस्य का निरुक्तिः ?

## सारांशः

अस्मिन् खण्डे पञ्चदशीं तिथिं निरूप्य ततः इष्टेः कालाः पर्य्यालोचिताः । तदनन्तरं प्रकृतिविकृतिभेदेनेष्टेः स्वरूपं प्रतिपाद्य सन्धिकालमनुसृत्य प्रकृतिविकृतीष्ट्योः कालः पृथक् पृथक् माधवाचार्येण प्रतिपादितः । तदनन्तरममाशब्दस्य वसुशब्दस्य च बहुधा व्युत्पत्तिं प्रदर्श्य तयोः स्वरूपं भेदाश्च निरूपिताः । तत्रापि सिनीवाली-कुहूसंज्ञकयोरमावास्ययोः, अनुमति- राकासंज्ञकयोर्द्वयोः पूर्णिमयोरपि स्वरूपं सप्रमाणं निरूपितम् । एवं खण्डेऽस्मिन् विचारः प्रदर्शितः ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| राका - | अत्यर्थं रञ्जनात् प्रतिपन्मिश्रिता पूर्णिमा |
| अनुमतिः- | चतुर्दशीमिश्रिता पूर्णिमा |
| अन्वाधानम् - | उपवासः |
| अन्वाहितिः - | उपवासः |
| अमा - | सूर्यरश्मिः , कन्या , चन्द्रकला |
| अमावास्या - | कृष्णपञ्चदशी |
| इष्टिः- | ओषधीप्रधानयागः |
| औपवसथ्यमहः - | इष्टेः पूर्वदिनम् |
| कुहूः- | प्रतिपन्मिश्रिताऽमावास्या |
| चरुः - | तिलतण्डुलश्रपणम् |
| दर्शः - | अमावास्या |
| पर्व - | अमावास्या पूर्णिमा च |
| पशुयागः- | पश्वङ्गभूतद्रव्यको यागः |
| प्रकृतीष्टिः- | सर्वासामिष्टीनां प्रकृतिः |
| प्रतिप्रसवः - | निषिद्धस्य पुनराचरणम् |
| विकृतीष्टिः- | काम्येष्टिप्रभृतयः |
| सिनीवाली - | चतुर्दशीमिश्रिताऽमावास्या |
| सोमयागः- | सोमरसेन क्रियमाणो यागः |

## आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) सामान्येन पञ्चदश्याः स्वरूपं विचारयत ।
२) अमावास्या-पूर्णिमयोः स्वरूपं भेदांश्च प्रतिपादयत ।
३) इष्टेः कालं निरूपयत ।
४) प्रकृतीष्टि-विकृतिष्ट्योः स्वरूपं कालञ्च विचारयत ।
५) शाखाभेदेनेष्टेः कालं निरूप्य पशु-सोमयागयोरपि कालान् निरूपयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) अमावास्याशब्दस्य व्युत्पत्तिं सप्रमाणं निरूपयत ।
२) प्रकृतीष्टेः कालं यथाग्रन्थं प्रतिपादयत ।
३) विकृतीष्टेः स्वरूपं कालञ्च स्पष्टयत ।
४) पञ्चदश्याः वेधं विचारयत ।
५) पूर्णिमायाः स्वरूपं भेदांश्च प्रदर्शयत ।

### लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) अमाशब्दस्यार्थान् प्रदर्शयत ।
२) वसुशब्दस्यार्थान् प्रतिपादयत ।
३) विकृतीष्टेः कालं प्रदर्शयत ।
४) पूर्णिमायाः भेदान् विचारयत ।
५) सोमयागस्य कालं प्रदर्शयत ।
६) पशुयागस्य कालं प्रतिपादयत ।

### एकाङ्कप्रश्नाः (प्रत्येकं१अङ्कः )

१) पञ्चदशी कतिविधा ?
२) अमाशब्दस्य कति अर्थाः ?
३) वसुशब्दस्य कति अर्थाः ?
४) दर्शशब्दस्य कोऽर्थः ?
५) का अनुमतिः ?
६) राकाशब्दस्य कोऽर्थः ?
७) का सिनीवाली ?
८) कुहूशब्दस्य कोऽर्थः ?
९) किं नामान्वाधानम् ?
१०)पर्वशब्दस्य कोऽर्थः ?

११)इष्टिः कदा क्रियते ?
१२)कीदृशो याग इष्टिः ?
१३)दर्शेष्टिपौर्णमासेष्ट्योः कियद् व्यवधानम् ?
१४)सन्धिकालः कियान् ?
१५)किं नाम आवर्त्तनम् ?

एकाङ्कप्रश्नानामुत्तराणि

१) द्विविधा
२) चत्वारः
३) चत्वारः
४) अमावास्या
५) पूर्वविद्धा पूर्णिमा
६) प्रतिपन्मिश्रिता पूर्णिमा
७) चतुर्दशीमिश्रिताऽमावास्या
८) प्रतिपन्मिश्रिताऽमावास्या
९) उपवासः
१०) अमावास्या पूर्णिमा च
११) पर्व-प्रतिपदोः सन्धौ
१२) ओषधीप्रधानयागः
१३) षोडश दिनानि
१४) द्विलवकालः
१५) मध्याह्नः

***************

# नवमखण्डः– कालमाधवस्य पञ्चमप्रकरणादारभ्य संक्रान्तिनिर्णयं यावत्

संरचना

IX.1.प्रस्तावना
IX.2. उद्देश्यम्
IX.3. नक्षत्रादिव्रतनिर्णयः
IX.4. संक्रान्तिनिर्णयः
IX.5. संक्रान्तिपुण्यकालेषु कर्त्तव्यानि

## IX.1 प्रस्तावना

कालमाधवस्य पञ्चमप्रकरणं प्रकीर्णाख्यं प्रकरणम् । अस्मिन् प्रकरणे नक्षत्र- योगादिकालविशेषाः,संक्रान्तयः सूर्यचन्द्रग्रहणयोर्विचाराश्च विहिताः। किन्त्वस्मिन् नवमे खण्डे सम्पूर्णनक्षत्राभावे खण्डनक्षत्रे नक्षत्रस्यादौ उपवासादिकं कर्त्तव्यमन्ते वेति विचारोऽत्र विहितः । निर्द्दिष्टतिथिवत् निर्द्दिष्टनक्षत्रे दानव्रतश्राद्धादीनामपि विचारः सम्यक्तया कृतः । तदनन्तरं वव- वालवादिकरणेषु कर्मविशेषानुष्ठाने सन्देहाभावात् भद्राकरणविषये विशेषचर्च्चा विहिता । ततश्च संक्रान्तेः स्वरूपं भेदाः , प्रति संक्रमणञ्च पुण्यकालस्य परिमाणः , तत्र च दान-स्नान-होमा- दीनां विधानं विशेषेण विहितम् । तदनन्तरं द्वादशसंक्रान्तीनां निर्द्दिष्टनक्षत्रे चलनात् मन्दा- मन्दाकिन्यादिसंज्ञादयोऽपि निरूपिताः । एवं प्रकारेण पञ्चमप्रकरणस्य संक्रान्त्यवधिविचारा अस्मिन्नवमे खण्डे विचारिताः।

## IX.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- नक्षत्रयोगादिकालविशेषाणां स्वरूपं निरूपयिष्यन्ति ।
- खण्डनक्षत्रे उपवासादिनिर्णयादिकमपि पर्य्यालोचयिष्यन्ति ।
- नक्षत्रे विहितश्राद्धदानव्रतादीनां चर्च्चां प्रदर्शयितुमर्हन्ति ।

- ववबालवादिकरणानां स्वरूपं निरूपयितुमर्हन्ति ।
- करणेषु भद्राया वैशिष्ट्यं प्रतिपादयिष्यन्ति ।
- संक्रान्तीनां स्वरूपं निरूपयितुमर्हन्ति ।
- संक्रान्तीषु पुण्यकालं स्नानदानश्राद्धादिकञ्च निरूपयिष्यन्ति ।
- संक्रान्तीनां मन्दादिसंज्ञां निरूपयिष्यन्ति ।

## IX.3 नक्षत्रादिव्रतनिर्णयः

निर्दिष्टतिथिवत् निर्दिष्टनक्षत्रेऽपि स्नानदानश्राद्धव्रतोपवासादीनां विधानं तत्र च फलश्रुतिः कालमाधवे माधवाचार्य्येण प्रतिपादिता । सम्पूर्णे नक्षत्रे कर्त्तव्यविशेषे सन्देहा- भावात् खण्डनक्षत्रे तद्विषयकविचारोऽपेक्ष्यते । तत्रोदयव्यापिनि नक्षत्रे उपवासादिकं कार्य्यम् अथ वाऽस्तमयव्यापिनि नक्षत्रे इति जिज्ञासायां विष्णुधर्मोत्तरपुराणवचनमुत्थाप्य माधवाचार्येण कालमाधवे सम्यक्तया प्रतिपादितं यत् -

उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः ।
युज्यते यत्र वा राम निशीथे शशिना सह ।। इति ।।

एतेनाऽस्तमययोगः निशीथयोगश्चेति द्वयमेव प्रयोजकं भवति । तयोरस्तमययोगः मुख्यः कल्पः,निशीथयोगश्चाऽनुकल्पः । योगद्वये लब्धेऽनुष्ठानमतिप्रशस्तम् ।यदा पूर्वेद्युः केवल-निशीथयोगः परेद्युश्च केवलास्तमययोगः तदा मुख्यकल्पानुसारेण परेद्युरेवोपवासः कार्य्यः। दिनद्वयेऽस्तमययोगाभावे निशीथयोगसद्भावात् पूर्वेद्युरेवोपवासः कर्त्तव्यः । नक्षत्रव्रतेषु नक्तैक-भक्तानामुपवासनक्षत्रे एव निर्णयः न तु तिथिवत् प्रदोष-मध्याह्नव्याप्तिभ्यां निर्णयः । प्रसङ्गेऽस्मिन् स्कन्दपुराण-विष्णुधर्मोत्तरपुराणवचनोत्थापनपूर्वकं माधवाचार्येण प्रतिपादितं यत्-

तत्र चोपवसेदृक्षे यन्निशीथादधो भवेत् ।
उपवासे तदृक्षं स्यात्तद्धि नक्तैकभक्तयोः ।।
सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ।। इति ।।

अत्रेदं भाव्यं यत् सूर्योदये नक्षत्रव्याप्त्या समग्रदिनस्य नाक्षत्रत्वं सम्पद्यते यदनुसारेण व्रतादिकमनुष्ठेयं भवति । सूर्यास्तमयकाले नक्षत्रव्याप्त्या समग्राहोरात्रस्य नाक्षत्रत्वं सम्पद्यते, यदनुसृत्योपवासादिकं निर्णीयते । तत्रोदयकाले नक्षत्रस्य सामान्येन मुहूर्त्तत्रयव्याप्तिः बोध्यते । पुनश्चोपवासविषये नक्षत्राणां पूर्वभागस्य पूज्यत्वं स्वीक्रियते ,तद्व्यतिरिक्ते व्रतादि- दैवकर्मणि नक्षत्राणामन्त्यभागस्य पूज्यत्वं गृह्यते ।

योगविषये सायंकालादिव्याप्तिः ग्राह्या । यदि योगः पूर्वेद्युः निशीथमात्रं व्याप्नोति तदा परेद्युरहनि पारणं कुर्यात् , रात्रौ पारणस्य निषिद्धत्वात् । अतो

विष्कम्भादियोगः उपवासादौ पूर्वविद्धो ग्रहीतव्यः । दानव्रतादौ योगः उदयव्यापी ग्राह्यः । श्राद्धादौ तु कर्मकालव्याप्तिरिति भिन्न-भिन्नप्रकारेण निर्णयः प्रतिपादितः ।

करणं तिथ्यर्द्धमिति वचनात् तिथ्यर्द्धपरिमितत्वेन दिनद्वयाऽव्यापित्वात् तत्र सन्देहो नास्ति ।अत उदयाऽस्तमये वा यस्मिन् दिने करणसद्भावः तद्दिने तत्करणसम्बन्ध्यनुष्ठानं कार्यम् । यदा सायमारभ्य प्रवृत्तं करणं परदिने सूर्योदयात् प्राक् समाप्यते , तदा भद्राकरणन्यायेन सर्वेषु करणे‍ु निर्णयः कर्त्तव्यः ।भद्राकरणस्य विष्टिकरणमिति संज्ञान्तरं विद्यते । तस्मिन्करणे को निर्णय इति जिज्ञासायामुच्यते यत् – उदयादारभ्याऽस्तं यावत् विष्टिसत्तायामुपवासे सन्देहो नास्ति । यदा दिवसे प्रथमप्रहरं विहायाऽवशिष्टेषु त्रिषु प्रहरेषु विष्टिर्वर्त्तते , तत्र समग्रदिवसव्याप्तिभद्रा- भावेऽपि तत्रैकदेशे भद्राव्याप्तेः सत्त्वात् तत्रोपवासोऽनुष्ठेयः ।

यश्च भद्राव्रतं स्वीकृत्य संकल्प्य चाहोरात्रमुपवासेन स्थातुं न पारयति , स केवलं भद्रायुक्तघटिकासु भोजनं त्यक्त्वा भद्रारहित- काले भुक्त्वाऽपि न दोषभाग्भवति । प्रसङ्गेऽस्मिन् भविष्यपुराणवचनमुट्टङ्क्य माधवाचार्येण प्रतिपादितं यत् –

स्नातः सम्पूज्य तामेव ब्राह्मणश्च स्वशक्तितः ।
ततो भुञ्जीत राजेन्द्र ! यावद्भद्रा न जायते ।।
अथ वान्तेऽपि भद्रायाः कामतो वाग्यतः शुचिः ।
न किञ्चिद्भक्षयेत् प्राज्ञो यावद्भद्रा प्रवर्त्तते ।। इति ।।

एवं प्रकारेण तिथिनिर्णयानन्तरं नक्षत्रयोगकरणेषु नित्तर्णयोऽपि प्रतिपादितः। वासरस्याऽहोरात्रपरिमितत्वेन तत्र सन्देहाभावात् तद्विषये निर्णयो नापेक्ष्यते । एतावता नक्षत्र- योग-करणानि निर्णीतानि ।

स्वानुशीलनप्रश्नाः

१.कीदृशे नक्षत्रे उपवासः कार्यः ?
----------------
२. कीदृशे नक्षत्रे व्रतादिकं कार्यम् ?
-----------------
३. कीदृशे योगे उपवासः कार्यः ?
----------------
४. करणस्य किं स्वरूपम् ?
----------------
५. भद्राकरणे का व्यवस्था ?
----------------

## IX.4 संक्रान्तिनिर्णयः

मेषादिषु द्वादशसु राशिषु क्रमेण सञ्चरतः सूर्यस्य पूर्वस्माद्राशेः राश्यन्तरसंक्रमणं संक्रान्तिः । यस्मिन् राशौ सूर्यस्य संक्रमणं भवति तद्राशिनामानुसारेण संक्रान्तीनां नामानि भवन्ति । राशयश्च मेष-वृष-मिथुन-कर्कट-सिंह-कन्या-तुला-वृश्चिक-धनुः-मकर-कुम्भ-मीनसंज्ञकाः प्रसिद्धाः । तेषु राशिषु मेष-कर्कट-तुला-मकरराशयः चर- संज्ञकाः । तेष्वपि मेषतुले विषुवसंज्ञके कर्कटमकरावयनसंज्ञकौ च भवन्ति । तत्र मेषसंक्रमणस्य महाविषुवसंक्रान्तिः तुलासंक्रमणस्य च जलविषुवसंक्रान्तिरिति नाम ।वृष-सिंह-वृश्चिक-कुम्भ-राशयः स्थिरसंज्ञकाः । तत्र प्रवृत्ताः संक्रान्तयो विष्णुपदसंज्ञका भवन्ति । अवशिष्टा मिथुन-कन्या-धनुर्मीनराशयो द्विस्वभावा भवन्ति । तत्र प्रवृत्ताः संक्रान्तयः षडशीतिसंज्ञका भवन्ति । प्रसङ्गेऽस्मिन् वृद्धवसिष्ठवचनमुट्टङ्क्य माधवाचार्येण प्रतिपादितं यत् -

अयने द्वे विषुवे द्वे चतस्रः षडशीतयः ।
चतस्रो विष्णुपद्यश्च संक्रान्त्यो द्वादश स्मृताः ।।
झष-कर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवे तु तुला-मेषौ गोलमध्ये ततोऽपराः ।।
कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः ।
षडशीतिमुखाः प्रोक्ताः षडशीतिगुणा फलैः ।।
वृष-वृश्चिक-सिंहेषु कुम्भे चैव रवेर्गतिः ।
एतद्विष्णुपदं नाम विषुवादधिकं फलम् ।।इति ।।

एतासु सूर्यसंक्रान्तिषु होमस्नानदानादीनि विहितानि । परन्त्वसौ संक्रान्तिकालः एतावान् सूक्ष्मः ,यश्चर्मचक्षुषा लक्ष्यीकर्त्तुं न शक्यते । तस्मात् तस्य कालस्याधः ऊर्ध्वञ्च मिलित्वा त्रिंशद्दण्डात्मकः कश्चन स्थूलकालः कल्प्यते यस्मिन् स्नानदानहोमादीनामनुष्ठानं कर्त्तुं शक्येत । प्रसङ्गेऽस्मिन् देवलवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः ।
तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः ।। इति ।।

एतेन संक्रान्तेः पूर्वोत्तरयोः कालयोरेकस्मिन् त्रिंशद्घटिकाः पुण्यकालत्वेनोक्ताः । विशेषेण तु नानासंक्रान्तीनां नानापुण्यकाला अपि प्रतिपादिताः । तद्यथा- मेषसंक्रमणे तुलासंक्रमणे च संक्रमणात्प्राक् परतश्च दशदण्डाः पुण्यकालाः । कर्कटसंक्रमणे पूर्ववर्त्ति- त्रिंशद्घटिकाः मकरसंक्रमणे च परवर्त्तिविंशतिघटिकाः पुण्या भवन्ति । विष्णुपदसंक्रमणेषु संक्रमणात् प्राक् पश्चाच्च षोडशदण्डाः षडशीतीषु च परवर्त्तिषष्टिदण्डाः पुण्यकालत्वेनोक्ताः । ताश्च संक्रान्तयः कदाचित् दिवसे कदाचिद्रात्रावपि पतन्ति । अतो तद्भेदेनाऽनुष्ठानभेदोऽपि दृश्यते । अर्थात् दिवसभागे सूर्यसंक्रमणे समग्रं दिनं पुण्यमुक्तम् । किन्तु रात्रौ संक्रमणे पूर्वोत्तरदिनयोः पुण्यकालताप्रतिपादनेन रात्रौ पुण्यकालो नास्तीति गम्यते ।

एवं सति कर्कटसंक्रमणं यदि प्रभाते स्यात्तर्हि तस्य पूर्ववर्त्तिपुण्यकालस्य रात्रौ पातात् तत्रत्यपुण्यकालं बाधित्वा तावानेव परवर्त्तिपुण्यकालः स्वीक्रियते । तद्वत् मकरसंक्रमणञ्च यदि सायं पतति ,तर्हि तस्य परवर्त्तिपुण्यकालस्य रात्रौ पाताच्च तत्रत्यपुण्यकालं बाधित्वा तावानेव तत्पूर्ववर्त्तिपुण्यकालः स्वीक्रियते । निशीथे संक्रमणे सति उभयत्र पुण्यकालस्य रात्रावेव पातात् तत्र चानुष्ठाननिषेधात् तत्पूर्वपरयोः निकटतमदिवसभागयोः पुण्यकालता प्रतिपादिता । प्रसङ्गेऽस्मिन् वृद्धवसिष्ठवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् –

अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् ।
रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः ।।
अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरि क्रिया ।
ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयम् ।।

स्वानुशीलनप्रश्नाः

1.**संक्रान्तेः किं स्वरूपम् ?**

-----------------

2. **संक्रान्तीनं के पुण्यकालाः ?**

------------------

3. **विष्णुपदसंक्रान्तयः काः ?**

-----------------

4. **काः षडशीतिमुखाः संक्रान्तयः ?**

-----------------

पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः ।
प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ ।। इति ।।

अत्रार्द्धरात्रशब्देन निशीथ एव बोध्यते । स च कालः रात्रेः द्वितीयप्रहरस्य चरमघयिका तृतीयप्रहरस्य च प्रथमघटिका मिलित्वा घटिकाद्वयात्मकः कालः कल्पितः । ततः पूर्वं संक्रमणे तद्दिनस्य मध्याह्नानन्तरं सूर्यास्तात् प्राक् पुण्यकालः कल्पितः । ततेऽनन्तरञ्च संक्रमणे पर– दिनस्य सूर्योदयादनन्तरं मध्याह्नात् प्राक्च पुण्यकालत्वेन कल्पितः । पुनश्च यदि निशीथमध्ये एव संक्रमणं तर्हि तत्र पूर्वदिनस्योत्तरार्द्धमुत्तरदिनस्य च पूर्वार्द्धमिति मध्याह्नानन्तरं दिनद्वये पुण्यकालः स्वीक्रियते । तत्रापि “ या याः सन्निहिता नाड्यस्ता स्ताः पुण्यतमाः स्मृताः ” इति देवलवचनात् दिनद्वये पञ्चदश–पञ्चदशदण्डात्मकेषु कालेषु ये निकटतमास्ते पुण्यतमाः , ये निकटतरास्ते पुण्यतराः ,ये निकटास्ते पुण्या इति भाव्यम् । अयञ्च यः रात्रौ पुण्यकालनिषेधः सामान्येन कृतः स मकर–कर्कटौ विहायाऽवशिष्टासु दशसु संक्रान्तिषु बोद्धव्यः ; तत्र रात्रा– वपि स्नानदानादिप्रसक्तेः । एवं रात्र्यनुष्ठानस्य विहितप्रतिषिद्धत्वेन विकल्पे प्राप्ते देशाचारानु–सारेण व्यवस्था द्रष्टव्येति माधवाचार्येष प्रतिपादितम् ।

एकस्मिन् राशावपि विभिन्ननक्षत्रेषु सूर्यस्य संक्रमणमुद्दिश्य संक्रान्तीनां संज्ञा भिन्ना भिन्ना दृश्यते । आहत्य द्वादशसंक्रान्तीनां पुनः सप्तसंज्ञा परिकल्पिताः । ताश्च मन्दा-मन्दाकनी-ध्वांक्षी-घोरा-महोदरी-राक्षसी-मिश्रितासंज्ञका भवन्ति । तत्र ध्रुवेषु नक्षत्रेषु प्रारब्धाः संक्रान्तयः मन्दासंज्ञकाः ,मृदुनक्षत्रेषु प्रारब्धा मन्दाकिन्यः, क्षिप्रेषु नक्षत्रेषु प्रारब्धा ध्वांक्षीसंज्ञकसंक्रान्तयः,उग्रेषु नक्षत्रेषु प्ररब्धा घोरासंक्रान्तयः ,चरेषु नक्षत्रेषु प्रारब्धा महोदरी- संक्रान्तयः,क्रूरेषु नक्षत्रेषु प्रारब्धा राक्षसीसंक्रान्तयः , मिश्रितनक्षत्रेषु प्रारब्धा मिश्रितसंक्रान्तयो भवन्ति । एतासां संक्रान्तीनां पुण्यकलाः क्रमेण द्वि-चतुः-पञ्च-सप्ता-ऽष्ट-नव-द्वादशघटिका भवन्ति । प्रसङ्गेऽस्मिन् देवीपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

द्वादशैव समाख्याताः समासंक्रान्तिकल्पनाः ।
सप्तधा तु प्रबोद्धव्या एकैकैव यथा शृणु ।।
मन्दा-मन्दाकिनी-ध्वांक्षी-घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा ध्रुवम् ।।
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वांक्षीं विजानीयादुग्रे घोरा प्रकीर्त्तिता ।।
चरे महोदरी ज्ञेया क्रूरैर्ऋक्षैस्तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रऋक्षैस्तु संक्रमे ।।
द्वि-चतुः-पञ्च-सप्ताष्ट-नव-द्वादश एव च ।
क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकम् ।। इति ।।

तत्र कानि कानि नक्षत्राणि ध्रुवादिसंज्ञकानीति जिज्ञासायामुक्तं यत् रोहिण्युत्तरात्रयञ्च चत्वारि ध्रुवनक्षत्राणि ,रेवती-चित्राऽ-नुराधा-मृगशीर्षाणि चत्वारि मृदुनक्षत्राणि भवन्ति । हस्ताऽश्विनी-पुष्याऽभिजिन्नक्षत्राणि चत्वारि क्षिप्राणि। भरणी-पूर्वात्रयं मघा चेति पञ्चोग्राणि । श्रवण-पुनर्वसु-शतभिषक्-धनिष्ठा-स्वात्याख्यानि पञ्च चरनक्षत्राणि। आश्लेषामूलार्द्राज्येष्ठानि चत्वारि क्रूराणि। कृत्तिका विशाखा-ऽश्विनाख्यानि मिश्रनक्षत्राणीति प्रसिद्धानि भवन्ति । प्रसङ्गेऽस्मिन् मुहूर्त्तविधानसारवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

क्षिप्रञ्च स्थिरमुग्रञ्च दारुणं चरमेव च ।
मृदु साधारणं ऋक्षं सप्त भेदाः प्रकीर्त्तिताः ।। इति ।।

कराश्विनीवाक्पतिभं तथाभिजिल्लघूनि पुण्ये गमने विभूषणे ।

हिरण्यगर्भाधिपमुत्तरात्रयं ध्रुवाख्यमेतद्धि तथाऽनुमानतः ।।

युतं भरण्या सह पूर्विकात्रयं मघा तथोग्राख्यमिदं भपञ्जकम् ।

भुजङ्गमं नैर्ऋत-मैन्द्रमार्द्रा भवन्ति तीक्ष्णानि हि तानिसर्वदा ।।

चराणि पञ्च श्रवणं पुनर्वसु-जलेशभं वासवमनिलं तथा ।

मृदूनि पौष्णं सुरवर्द्धकीश्वरं तथाऽनुराधाऽमृतरश्मिदैवतम् ।।

हुताशनर्क्षेण सह द्विदैव मुशन्ति साधारणसंज्ञमस्मिन् ।इति।

एवं प्रकारेण सप्तसु नक्षत्रे कल्पितासु मन्दादिसंक्रान्तिषु मन्दायां प्रत्यासन्नं घटिकाद्वयं, मन्दाकिन्यां घटिकाचतुष्टयं , ध्वांक्ष्यायां पञ्चकं ,घोरायां सप्तकं , महोदर्य्यांमष्टकं , राक्षस्यां नवकं , मिश्रितायां च द्वादशघटिकाः पुण्यकालत्वेन प्रतिपादिताः ।

स्वानुशीलनप्रश्नाः

१. विषुवायनसंक्रमणानां किं स्वरूपम् ?

-----------------

२. मन्दामन्दाकिनीसंक्रान्तीनां किं स्वरूपम् ?

-----------------

३. निशीथे संक्रमणे कदा पुण्यकालः ?

-----------------

## IX.5 संक्रान्तिपुण्यकालेषु कर्त्तव्यानि

संक्रान्तीनां पुण्यकालेषु स्नानदानहोमोपवासादीनि कर्त्तव्यत्वेन विहितानि ।एतानि कर्माणि अयनसंक्रमणयोः नित्यत्वेन अन्येषु च काम्यत्वेनोपदिष्टानि । पापक्षयायाऽपि एतानि कार्याणीति निर्द्देशादेषां नैमित्तिकत्वमपि वक्तुं शक्यते । प्रसङ्गेऽस्मिन् शातातपवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् –

अयनादौ सदा देयं द्रव्यं नित्यं गृहे च यत् ।<br>
षडशीतिमुखे चैव मोक्षे वै चन्द्रसूर्ययोः ।।<br>
कुर्यात्सदाऽयने मध्ये विष्णुपद्यां विषुवति ।<br>
षडशीत्यामन्तभागे स्नानादिविधिमादृतः ।। इति।।

एतेन ज्ञायते यत् – अयनादिषु संक्रान्तिषु यत्र यावान् पुण्यकालो निर्द्धारितः , तावन्तं कालं त्रेधा विभज्य तन्मध्यभागेऽयनसंक्रान्तिषु विषुवसंक्रान्तिषु विष्णुपदसंक्रान्तिषु च स्नानदानादिकं करणीयम् । परन्तु षडशीतिसंक्रान्तिषु निर्द्धारितपुण्यकालस्यान्तभागे एव स्नानदानादिकं कार्यम् इति विशेषः । संक्रान्तौ उपवासेन सूर्यपूजनेन च जनः पापमुक्तो भवतीति वसिष्ठवचनमुद्धृत्य माधवाचार्येण प्रतिपादितम् । तद्यथा–

उपोष्यैव तु संक्रान्तौ स्नातो योऽभ्यर्चयेद्रविम् ।<br>
प्रातः पञ्चोपचारेण स काम्यं फलमश्नुते ।।<br>
अयने विषुवे चैव चन्द्रसूर्यग्रहे तथा ।<br>
त्रिरात्रोपोषितो नरः सर्वपापैः प्रमुच्यते ।।

स्नात्वा यः पूजयेदीशं सर्वान् कामान् समश्नुते ।
सप्तोपोष्य रवेर्वारानादौ स्नात्वा तु संक्रमे ।
अर्कमभ्यर्चयेद्यस्तु सोऽदुःखी सुखमश्नुते ।। इति ।।

यथा मेषादिसंक्रमणेषु पुण्यकालः निर्द्धारितः तथा संक्रमणादेकादशदिनेभ्यः पूर्वं प्रवृत्तेषु मेषायनादिषु तावान् पुण्यकालोऽपि मन्तव्यः । तत्रेयान् भेदो यत् - मकरायने पूर्ववर्त्तिविंशतिदण्डाः पुण्यकालः मकरायणे च परवर्त्तिविंशतिदण्डा इति ।अन्यत्र सर्वं समानम् । माधवाचार्येण कालमाधवरचनाकालेऽयनांशः एकादशांश आसीदिति हेतोः मेषादिसंक्रमण- दिवसस्य एकादशदिनेभ्यः पूर्वं मेषायनादीनां प्रवृत्तेः तत्रापि तुल्यपुण्यकालः स्वीकृतः । अतस्तत्र संक्रमणवत् स्नानदानादिकमपि विहितम् । प्रसङ्गेऽस्मिन् जाबालिवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् -

संक्रान्तिषु यथाकालस्तदीयेऽप्ययने तथा ।
अयने विंशतिः पूर्वा मकरे विंशतिः परा ।। इति ।।

एवं यथा सूर्यस्य राशिनक्षत्रगमने पूर्वतः परतश्च पुण्यकालः कल्पितः ,तथा चन्द्रमङ्गलादीनां ग्रहाणामपि नक्षत्रराशिसंक्रमणे पुण्यकालो निर्द्धारितोऽस्ति । तद्यथा- चन्द्रस्य संक्रमणात् प्राक् परतश्च एकघटिका त्रयोदशपलानि पुण्यकालः । एवं मङ्गलस्य चतस्रो घटिकाः एकपलञ्च पुण्यकालः , बुधस्य तिस्रघटिका चतुर्दशपलानि पुण्यकालः, बृहस्पतेः सार्द्धचतस्रघटिकाः सप्तपलानि पुण्यकालः , शुक्रस्य चतस्रो घटिकाः एकपलञ्च पुण्यकालः , शनैश्चरस्य च द्व्यशीतिघटिकाः सप्तपलानि पुण्यकालः परिकल्पितः । प्रसङ्गेऽस्मिन् प्रमाणिकं ज्योतिःशास्त्रवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् -

नक्षत्रराश्यो रविसंक्रमे स्युरर्वाक् परस्ताद्रसचन्द्रनाड्यः ।
पुण्यास्तथेन्दोस्त्रिधरापलैर्युगेकैव नाडी मुनिभिः शुभोक्ता ।।
नाड्यश्चतस्रः सपला कुजस्य बुधस्य तिस्रः पलविश्वयुक्ता ।
सार्द्धाश्चतस्रो घटिकाः पलानि गुरोस्तु सप्तैव भृगोश्चतस्रः ।।
नाड्यः पलैकं घटिकाद्व्यशीतिः पलानि सप्तैव शनैश्चरस्य ।
आद्यन्तमध्ये जपहोमदानं कुर्वनवाप्नोति सुरेन्द्रधाम ।।इति ।।

एवं सूर्यादीनां शनैश्चरान्तानां समेषां ग्रहाणां पुण्यकालो विचारितः ।

स्वानुशीलनप्रश्नाः

१.संक्रान्तिपुण्यकालेषु कानि कर्माणि कार्याणि ?

-----------------

२. मकरायन-मकरसंक्रमणयोः को विशेषः ?

------------------

३. चन्द्रसंक्रमणे कियान् पुण्यकालः ?

-----------------

४. मङ्गलादिग्रहाणां संक्रमणे के पुण्यकालाः ?

-----------------

## सारांशः

अस्मिन् खण्डे नक्षत्रयोगादिकालविशेषाणां स्वरूपं विचार्य ततः खण्डनक्षत्रे उपवासादिनिर्णयादिविषये पर्य्यालोचनं कृतम् । तदनन्तरं नक्षत्रे विहितश्राद्धदानव्रतादीनां चर्च्चां प्रदर्श्य ववबालवादिकरणानां स्वरूपं प्रतिपादितम् । ततः करणेषु भद्राया वैशिष्ट्यं प्रतिपाद्य संक्रान्तीनां स्वरूपं निर्णीतम् । तदनन्तरं संक्रान्तीनां भेदाः प्रति संक्रमणञ्च पुण्यकालः सम्यक्तया प्रतिपादितः । ततश्च संक्रान्तिपुण्यकालेषु स्नानदानोपवासश्राद्धादिकञ्च निरूप्य संक्रान्तीनां मन्दादिसंज्ञा निरूपिताः । तदनन्तरं सूर्यसंक्रान्तिवत् चन्द्रमङ्गलबुधबृहस्पतिशुक्र-शनैश्चरप्रभृतीनां ग्रहाणां राशिनक्षत्रसंक्रमणेऽपि पुण्यकालो विचारितः । एवं खण्डेऽस्मिन् विचारः प्रदर्शितः ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| अयनम् - | उत्तरायणं दक्षिणायनञ्च |
| उग्रनक्षत्राणि- | भरणी-पूर्वात्रय-मघानक्षत्राणि |
| उदगयनं - | उत्तरायणम् |
| करणम् - | तिथ्यर्द्धपरिमितः कालः |
| क्रूरनक्षत्राणि- | आश्लेषामूलार्द्राज्येष्ठानि |
| क्षिप्रनक्षत्राणि- | हस्ताऽश्विनी- पुष्याऽभिजिन्नक्षत्राणि |
| घोरा - | उग्रनक्षत्रेषु सम्पन्ना संक्रान्तिः |
| चरनक्षत्राणि- | श्रवणपुनर्वसुशतभिषग्धनिष्ठास्वाती |
| चरराशिः - | मेषकर्कटतुलामकरराशयः |
| दक्षिणायनम्- | कर्कटसंक्रमणम् |
| द्विस्वभावराशिः- | मिथुनकन्याधनुर्मीनराशयः |
| ध्वांक्षी- | क्षिप्रनक्षत्रेषु सम्पन्ना संक्रान्तिः |
| ध्रुवनक्षत्राणि- | रोहिण्युत्तरात्रयश्चेति |
| भद्रा - | करणविशेषः |
| मकरायणम्- | मकरसंक्रमणादेकादशदिनेभ्यः पूर्वं घटते |

| | |
|---|---|
| मन्दा - | ध्रुवनक्षत्रेषु सम्पन्ना संक्रान्तिः |
| मन्दाकिनी- | मृदुनक्षत्रेषु सम्पन्ना संक्रान्तिः |
| महोदरी - | चरनक्षत्रेषु सम्पन्ना संक्रान्तिः |
| मिश्रनक्षत्राणि- | कृत्तिकाविशाखा-ऽश्विनाख्यानि |
| मिश्रिता- | मिश्रनक्षत्रेषु सम्पन्ना संक्रान्तिः |
| मृदुनक्षत्राणि- | रेवती-चित्राऽ-नुराधा-मृगशीर्षाणि |
| राशिः- | मेषादिः |
| राक्षसी - | क्रूरनक्षत्रेषु सम्पन्ना संक्रान्तिः |
| विषुवे - | मेष-तुलासंक्रमणे |
| विष्णुपद्यः- | वृषसिंहवृश्चिककुम्भसंक्रान्तयः |
| विष्टिः- | भद्राकरणम् |
| षडशीतयः- | मिथुनकन्याधनुर्मीनसंक्रान्तयः |
| स्थिरराशिः - | वृषसिंहवृश्चिककुम्भराशयः |

---

## आदर्शप्रश्नाः

---

### निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) नक्षत्रेषूपवासविधिं विचार्य योगकरणेष्वपि व्रतोपवासादिकं निर्णयत ।
२) संक्रान्तीनां स्वरूपं भेदांश्च प्रतिपादयत ।
३) संक्रान्तीषु पुण्यकालान् निरूपयत ।
४) मन्दादिसंक्रान्तीनां स्वरूपं माधवोक्तदिशा निरूपयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) नक्षत्रयोगकरणानामुपयोगं व्रतेपवासादिषु प्रदर्शयत ।
२) द्वादशसंक्रान्तीनां स्वरूपं यथाग्रन्थं निरूपयत ।
३) संक्रान्तिपुण्यकालेषु कर्त्तव्यानि प्रतिपादयत।
४) चन्द्रमङ्गलादीनां ग्रहाणां पुण्यकालं विचारयत ।
५) केषु केषु नक्षत्रेषु मन्दादिसंक्रान्तयः प्रवर्त्तन्ते तानि निर्द्दिशत ।
६) भद्राकरणस्य वैशिष्ट्यं प्रतिपादयत ।

### लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) करणानि निर्द्दिशत ।
२) विष्कुम्भादियोगान् यथाग्रन्थं प्रदर्शयत ।
३) विष्णुपदसंक्रमणानां पुण्यकालान् विचारयत ।
४) विषुवायनसंक्रमणानां स्वरूपं पुण्यकालञ्च प्रदर्शयत ।

५) षडशीतिसंक्रमणानां पुण्यकालं  निरूपयत ।
६) मन्दादिसप्तसंक्रान्तिभेदान् नामतो निर्द्दिशत ।
७) निशीथमध्ये संक्रमणे पुण्यकालं निर्द्दिशत।

एकाङ्कप्रश्नाः  (प्रत्येकं१अङ्कः )

१)  कति योगाः  ?
२)  कति नक्षत्राणि  ?
३)  कति करणानि ?
४)  कति संक्रान्तयः  ?
५)  कति षडशीतयः  ?
६)  कति विष्णुपदसंक्रान्तयः  ?
७)  का महाविषुवसंक्रान्तिः   ?
८)  जलविषुवसंक्रान्तिः का  ?
९)  कस्मिन् संक्रमणे सूर्यस्योणरायणं भवति  ?
१०) कस्मिन् संक्रमणे सूर्यस्य दक्षिणायनं भवति  ?
११) मेषसंक्रमणे कदा पुण्यकालः  ?
१२) विषुवसंक्रमणे कदा पुण्यकालः  ?
१३) षडशीतिसंक्रमणे कदा पुण्यकालः  ?
१४) विष्णुपदसंक्रमणे कदा पुण्यकालः ?
१५) कर्कटसंक्रमणे कदा पुण्यकलः  ?
१६) मकरसंक्रमणे कदा पुण्यकालः  ?
१७) रात्रौ संक्रमणे कदा पुण्यकालः   ?
१८) निशीथे  संक्रमणे  कदा पुण्यकालः  ?
१९) कानि क्षिप्रनक्षत्राणि  ?
२०) कानि उग्रनक्षत्राणि   ?
२१) कानि ध्रुवनक्षत्राणि  ?
२२) कानि मिश्रनक्षत्राणि    ?
२३) कानि क्रूरनक्षत्राणि  ?
२४) कानि मृदुनक्षत्राणि  ?
२५) कानि चरनक्षत्राणि    ?
२६) चन्द्रसंक्रमणे कियान् पुण्यकालः   ?
२७) मङ्गलसंक्रमणे कियान् पुण्यकालः   ?
२८) बुधसंक्रमणे कियान् पुण्यकालः     ?

२९) बृहस्पतिसंक्रमणे कियान् पुण्यकालः ?
३०) शुक्रसंक्रमणे कियान् पुण्यकालः ?
३१) शनैश्चरसंक्रमणे कियान् पुण्यकालः ?
३२) संक्रमणस्य कियद्दिनात् पूर्वमयनं प्रवर्त्तते ?

एकाङ्कप्रश्नानामुत्तराणि

१) अष्टाविंशतिः
२) सप्तविंशतिः
३) त्रयोदश
४) द्वादश
५) चतस्रः
६) चतस्रः
७) मेषसंक्रान्तिः
८) तुलासंक्रान्तिः
९) मकरे
१०) कर्कटे
११)प्रागूर्ध्वा दशदण्डाः
१२) प्रागूर्ध्वा दशदण्डाः
१३)पश्चात् त्रिंशद्दण्डाः
१४) पूर्वषोडशदण्डाः
१५)पूर्वतः त्रिंशद्दण्डाः
१६) पूर्वविंशतिदण्डाः
१७)आसन्नदिवसस्य यामद्वयम्
१८) पूर्वदिनस्योत्तरार्द्धंमुत्तरदिनस्य च पूर्वार्द्धं पुण्यकालः
१९) हस्ताऽश्विनी-पुष्याऽभिजिन्नक्षत्राणि
२०) भरणी-पूर्वात्रय-मघानक्षत्राणि
२१) रोहिण्युत्तरात्रयश्चेति
२२) कृत्तिकाविशाखा-ऽश्विनाख्यानि
२३) आश्लेषामूलार्द्राज्येष्ठानि
२४) रेवती-चित्राऽ-नुराधा-मृगशीर्षाणि
२५) श्रवणपुनर्वसुशतभिषग्धनिष्ठास्वाती
२६) प्राक् परतश्च एकघटिका त्रयोदशपलानि
२७) चतस्रो घटिकाः एकपलश्च पुण्यकालः
२८) तिस्रघटिका चतुर्दशपलानि पुण्यकालः,
२९) सार्द्धचतस्रघटिकाः सप्तपलानि
३०) चतस्रो घटिकाः एकपलश्च पुण्यकालः
३१) द्व्यशीतिघटिकाः सप्तपलानि
३२) एकादश

*********

# दशमखण्डः- कालमाधवस्य ग्रहणनिर्णयः

संरचना

X.1.प्रस्तावना
X.2. उद्देश्यम्
X.3. ग्रहणस्य स्वरूपनिर्णयः
X.4.ग्रहणे स्नानविचारः.
X.5. ग्रहणे श्राद्धविचारः
X.6. ग्रहणे भोजनव्यवस्था

## X.1 प्रस्तावना

कालमाधवस्य पञ्चमप्रकरणे नक्षत्रयोगकरणादिविचारादारभ्य ग्रहणनिरूपणान्तं विचारा उपनिक्षिप्ताः । किन्त्वस्मिन् दशमे खण्डे केवलं ग्रहणनिर्णयोऽवशिष्यते । ग्रहणस्य किं स्वरूपं तस्य कः कालः कथं च ग्रहणं भवति, ग्रहणे कानि कार्याणि ,कानि वर्ज्यानि, ग्रहण- कालश्च कियानिति विचारोऽत्र विहितः । चन्द्रग्रहणे सूर्यग्रहणे च कीदृशी भोजननिषेधव्यवस्था , दानं कथं कार्यम् ,श्राद्धं कथं केन द्रव्येण च करणीयम् ,कदा स्नानं कार्यमित्यादिकं सर्वमत्र विचारितम् । पुनश्च बालवृद्धातुराणां कृते भोजननिषेधव्यवस्था कीदृशी तदपि स्पष्टरूपेणात्र विवेचितम् । एवं प्रकारेण खण्डेऽस्मिन् ग्रन्थोऽयं परिसमापितः ।

## X.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- ग्रहणस्य स्वरूपं निरूपयिष्यन्ति ।
- ग्रहणस्य कालं पर्य्यालोचयिष्यन्ति ।

- ग्रहणे स्नादानादिव्यवस्थां प्रदर्शयितुमर्हन्ति ।
- ग्रहणे भोजननिषेधव्यवस्थां प्रतिपादयितुमर्हन्ति ।
- ग्रहणे श्राद्धव्यवस्थां प्रतिपादयिष्यन्ति ।
- बालवृद्धातुराणां कृते ग्रहणे विशेषव्यवस्थां प्रदर्शयितुमर्हन्ति ।
- चूडामणियोगं निरूपयिष्यन्ति ।

## X.3 ग्रहणस्य स्वरूपनिर्णयः

यदा राहुः सूर्यं चन्द्रमसं वा गृह्णाति तदा ग्रहणं भवतीति कथ्यते । पर्वप्रतिपदोः सन्धौ ग्रहणं भवति । अर्थात् पूर्णिमा-कृष्णप्रतिपत्सन्धौ राहुः चन्द्रं , अमावास्या-शुक्लप्रतिपत्सन्धौ च स एव राहुः सूर्यं गृह्णाति । प्रसङ्गेऽस्मिन् वृद्धगार्ग्यवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् -

पूर्णिमा-प्रतिपत्सन्धौ राहुः सम्पूर्णमण्डलम् ।
ग्रसते चन्द्रमर्कञ्च दर्शप्रतिपदन्तरे ।। इति ।।

पर्वणोऽन्तभागे राहुः सूर्यं चन्द्रमसं वा ग्रस्तुमारभते , ततःकियत्कालानन्तरं प्रतिपदश्चाद्यभागे मुक्त्वा गच्छति । स च कालः कियानिति वीक्षायामुच्यते यत् - यावान् कालः पर्वणोऽन्तिमे भागे तावानेव कालः प्रतिपदश्चादिमभागे इति । अर्थात् सम्पूर्णग्रहणकालस्या-र्द्धांशः पर्वणि , अपरार्द्धांशश्च प्रतिपदि वर्त्तते । उभयोर्मिश्रणात् सम्पूर्णग्रहणकालोऽवधार्यते । प्रसङ्गेऽस्मिन् ब्रह्मसिद्धान्तवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् -

यावान् कालः पर्वणोऽन्ते तावान्प्रतिपदादिभिः ।
रवीन्दुग्रहणानेहा स पुण्यो मिश्रणाद्भवेत् ।। इति ।।

स्वानुशीलनप्रश्नाः

१.कदा चन्द्रग्रहणं भवति ?

----------------

२. सूर्यग्रहणं कदा भवति ?

-----------------

३. ग्रहणस्य किं स्वरूपम् ?

----------------

४. रविं चन्द्रञ्च को गृह्णाति ?

## X.4 ग्रहणे स्नानविचारः

चन्द्रसूर्ययोर्ग्रहणकाले गङ्गादिपुण्यतोयासु स्नानं ,तीर्थेषु होमः, जपः, दानं दीक्षाग्रहणप्रभृतिकर्माणि कार्याणि। तत्रादौ स्नानं विचार्यते । ग्रहणे आद्यन्तयोः स्नानं विहितम् । प्रसङ्गेऽस्मिन् स्मृतिवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् -

ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ।। इति ।।

स्नानमत्राऽवगाहनमेव बोध्यते ।तच्च गङ्गादिमहानदीषु कार्यम् । तत्रापि गङ्गायाः प्राथम्यं द्रष्टव्यम् । प्रसङ्गेऽस्मिन् महाभारतवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् - गङ्गास्नानं प्रकुर्वीत ग्रहणे चन्द्रसूर्ययोः।
महानदीषु वान्यासु स्नानं कुर्याद्यथाविधि।। इति ।।

चन्द्रसूर्ययोर्ग्रहणे सामान्यनदीस्नानापेक्षया गङ्गानदीस्नानेन पुण्यातिशयःस्मर्य्यते। प्रसङ्गेऽस्मिन् वृद्धवसिष्ठव्यासयोर्वचनान्युत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

गङ्गातोये तु सम्प्राप्ते इन्दोः कोटी रवेर्दश ।
गवां कोटिप्रदानेन सम्यग्दत्तेन यत् फलम् ।।
गङ्गास्नाने तत्फलं स्याद्राहुग्रस्ते निशाकरे ।
दिवाकरे पुनस्तत्र दशसंख्यमुदाहृतम् ।। इति ।।

अपि च
इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः ।
गङ्गातोये तु सम्प्राप्ते इन्दोः कोटी रवेर्दश ।।
गवां कोटिप्रदानस्य यत् फलं लभते नरः ।
तत्फलं जाह्नवीस्नाने राहुग्रस्ते निशाकरे ।।
दिवाकरे तु स्नातस्य दशसंख्यमुदाहृतम् ।
चन्द्रसूर्यग्रहे चैव योऽवगाहेत जाह्नवीम् ।।
स स्नातः सर्वतीर्थेषु किमर्थमटते महीम् ।।इति ।।

गङ्गानदीस्नानाभावे महानदीषु स्नानं सर्वत्र विहितम् । तत्र कास्ता महानद्य इति जिज्ञासायां ब्रह्मपुराणवचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

तिस्रो नद्यो महापुण्याः वेणी गोदा च जाह्नवी ।
गां हरीशाङ्किकात् प्राप्ता गङ्गा इतीह कीर्त्तिता ।।
गोदावरी भीमरथी तुङ्गभद्रा च वेणिका।
तापी पयोष्णी बिन्ध्यस्य दक्षिणे तु प्रकीर्त्तिताः ।।
भागीरथी नर्मदा च यमुना च सरस्वती।
विशोका च वितस्ता च बिन्ध्यस्योत्तरतस्तथा ।। इति ।।

एतासां महानदीनामभावेऽगत्या सामान्यजलाशयेष्वपि ग्रहणे स्नानं विहितम्। अतः कूप-वापी-तडाग-प्रस्रवण-नदी-ह्रद-देवखात-पुष्करिणीप्रभृतिष्वपि ग्रहणे स्नानं विहितम् । प्रसङ्गेऽस्मिन् शङ्खवचनान्युत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

वापीकूपतडागेषु गिरिप्रस्रवणेषु च ।
नद्यां नदे देवखाते सरसीषूद्धृताम्बुनि ।।
उष्णोदकेन वा स्नायाद्ग्रहणे चन्द्रसूर्ययोः ।।इति ।।

आतुरस्य कृते एवोष्णोदकेन स्नानमुपदिष्टम् ,न तु समेषां कृते । उष्णोदकादारभ्य समुद्रजलं यावत् स्नानमुत्तरोत्तरं प्रशस्तं प्रतिपादितम् । अर्थात् उष्णोदकस्नानापेक्षया शीतोदकस्नानं प्रशस्तं भवति । परोदकस्नानापेक्षया स्वोदकस्नानमपि प्रशस्तमधिकपुण्य- दायकञ्च । ततोऽपि पुण्यतरं प्रस्रवण-सारस-नदी-महानदी-गङ्गा-समुद्रजलं च क्रमेणेति मार्कण्डेयवचनमुत्थाप्य माधवाचार्येण प्रतिपादितम् । तद्यथा-

शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् ।
भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ।।
ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् ।
तीर्थतोयं ततः पुण्यं महानद्यम्बुपावनम् ।।
ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यस्ततोऽम्बुधिः ।।इति ।।

चन्द्रसूर्ययोर्ग्रहणकाले मासविशेषे नदीविशेषजलस्नानेन पुण्यविशेषो लभ्यत इति देवीपुराणवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितम् । तद्यथा -

कार्त्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने !
पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा ।।
फाल्गुने वरणा पुण्या चैत्रे पुण्या सरस्वती ।।
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा ।
ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी ।
श्रावणे सिन्धुनामा तु तथा भाद्रे तु गण्डकी ।।
आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदा ।।
गोदावरी महापुण्या चन्द्रे राहुसमन्विते ।
सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने !
नर्मदातोयसंस्पर्शे कृत्यकृत्या भवन्ति हि ।। इति ।।

महानद्यादिषु स्नानाऽसम्भवे तासां स्मरणमपि पुण्यदायकं भवति । स्नानापेक्षया तज्जल-पानमपि ततोऽधिकपुण्यदायकं भवति । प्रसङ्गेऽस्मिन् माधवाचार्येण प्रतिपादितं यत् -

स्मृत्वा शतक्रतुफलं दृष्ट्वाऽग्निष्टोमजं फलम् ।
स्पृष्ट्वा गोमेधपुण्यन्तु पीत्वा सौत्रामणेर्लभेत् ।।
स्नात्वा वाजिमखं पुण्यं प्राप्नुयादविचारतः ।
रविचन्द्रोपरागे च अयने चोत्तरे तथा ।।इति ।।

स्वानुशीलनप्रश्नाः

१.ग्रहणे कदा स्नानं कार्यम् ?

-----------------

२. का महानद्यः ?

------------------

३. ग्रहणे स्नानार्थं कुत्र कस्य मासस्य प्राशस्त्यम् ?

-----------------

४. स्नानार्थं गङ्गादिपुण्यतोयानामभावे किं कार्यम् ?

-----------------

५. ग्रहणे पुण्यतोयानां स्मरणे किं फलम् ?

-----------------

## X.5 ग्रहणे श्राद्धविचारः

चन्द्रसूर्ययोर्ग्रहणे स्नानदानादिव्यवस्थावत् श्राद्धस्यापि व्यवस्था विद्यते । तत्र पित्रुद्देश्येन दत्तमक्षयपुण्यदायकं महाफलदायकं भवति । ग्रहणे श्राद्धमकुर्वतः महान् प्रत्यवायोऽपि श्रूयते । तस्मात्तत्र श्राद्धमवश्यमेव कर्त्तव्यमिति । चन्द्रग्रहणसमये रात्रावपि श्राद्धं भवति । प्रसङ्गेऽस्मिन् देवलशातातपादीनां वचनमुत्थाप्य माधवाचार्येण प्रतिपादितं यत् -

स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेत् ।।
यथा स्नानञ्च दानञ्च सूर्यस्य ग्रहणे दिवा ।
सोमस्यापि तथा रात्रौ स्नानं दानं विशिष्यते ।।इति ।।

एतेन काम्यश्राद्धानामनुष्ठानं ग्रहणे प्रशस्यत इति प्रतिपादितम् । तत्र श्राद्धं नान्नेन कर्त्तव्यमपि तु आमान्नेन हेम्ना वेति बौधायनशातातपादिभिः प्रतिपादितम् । यथोक्तं ताभ्याम् -

अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।
हेमश्राद्धं सग्रहे च कुर्याच्छूद्रः सदैव हि ।।
दर्शे रविग्रहे पित्रोः प्रत्याब्दिके उपस्थिते ।
अन्नेनाऽसम्भवे कुर्याद्धेम्ना वाऽऽमेन वा पुनः ।। इति ।।

अपि च
आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा ।
आमश्राद्धं द्विजो दद्यात् शूद्रो दद्यात्सदैव हि ।। इति ।।

ग्रहणश्राद्धमशौचेऽपि कार्यम् । यद्यप्यशौचे सर्वाणि स्मार्त्तकर्माणि निषिद्धानि तथापि ग्रहणश्राद्धं न निषिद्धम् । अथ सत्यप्यशौचे तत्र स्नानानन्तरं श्राद्धं कर्त्तुमिष्यते । ग्रहणकाले दानं यथा फलातिशयाय कल्प्यते , तथा स्नानहोमसुरार्च्चनादिकम् । तत्र ग्रहणमोक्षस्नानं सचेलमेव कर्त्तव्यम् ।ग्रहणकाले पक्वमन्नं सर्वथा वर्जनीयम् । यदि सूर्यग्रहणं रात्रौ चन्द्रग्रहणञ्च दिवा भवति , तर्हि तस्य दर्शनाभावात् तन्न पालनीयं भवति । प्रसङ्गेऽस्मिन् निगमवचनं यथा-

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् ।। इति ।।

पुनश्च रविवारे सूर्यग्रहणं सोमवारे च चन्द्रग्रहणं चेत् स योगः चूडामणियोग इति कथ्यते ।सामान्यग्रहणापेक्षया चूडामणियोगे फलं कोटिगुणितं भवति । अतस्तदवश्यमेव पालनीयम् । प्रसङ्गेऽस्मिन् व्यासवचनमुत्थाप्य माधवाचार्येणोक्तं यत् -

रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तदाऽनन्तफलं भवेत् ।।
वारेष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः ।
तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतम् ।।इति ।।

स्वानुशीलनप्रश्नाः

१.ग्रहणे श्राद्धं केन द्रव्येण क्रियते ?
----------------
२. चन्द्रग्रहणे रात्रौ स्नानदानादिकं भवति न वा ?
-----------------
३. किं नाम राहुसूतकम् ?
----------------
४. कः चूडामणियोगः ?
----------------

## X.6 ग्रहणे भोजनव्यवस्था

चन्द्रसूर्ययोर्ग्रहणकाले अर्थात् स्पर्शमारभ्य मोक्षपर्यन्तं भोजनं न कर्त्तव्यम् । राहुणा तयोः चन्द्रसूर्ययोर्मुक्तयोः सतोः स्नात्वा भोक्तव्यमिति तात्पर्यम् । प्रसङ्गेऽस्मिन् मनुवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् –

चन्द्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः ।
अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेऽहनि ।। इति ।।

न केवलं ग्रहणकाले भोजननिषेधः , अपि तु ततः पूर्वमपि । एतादृशपूर्वकालभोजन– निषेधव्यवस्थाप्रसङ्गे वृद्धवसिष्ठवचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् –

ग्रहणन्तु भवेदिन्दोः प्रथमादधियामतः ।
भुञ्जीतावर्त्तनात्पूर्वं पश्चिमे प्रथमादधः ।।
रवेस्त्वावर्त्तनादूर्ध्वं अर्वागेव निशीथतः ।
चतुर्थप्रहरे चेत्स्यात् चतुर्थप्रहरादधः ।।इति ।।

अर्थात् रात्रौ प्रथमप्रहरादूर्ध्वं चन्द्रग्रहणे तद्दिने मध्याह्नात्पूर्वं भुञ्जीत । रात्रेरन्तिमप्रहरे चन्द्रग्रहणं चेत् रात्रिप्रथमप्रहरात्प्राक् भुञ्जीत । दिवसस्य तृतीयप्रहरे सूर्यग्रहणं चेत् तर्हि पूर्वदिनस्यार्द्धरात्रात् प्राग् भुञ्जीत ।दिवसस्य चतुर्थप्रहरे सूर्यग्रहणं चेत् तर्हि रात्रेश्चतुर्थप्रहरादधः भोजनं कार्यम् । एतेन स्पष्टीभवति यत् चन्द्रग्रहणे ग्रहणस्पर्शतः प्रहरत्रयात्पूर्वं भुञ्जीत , सूर्यग्रहणे च प्रहरचतुष्टयात्पूर्वमिति तात्पर्यम् ।प्रसङ्गेऽस्मिन् वृद्धगौतमवचनमुत्थाप्य माधवा– चार्येण कालमाधवे प्रतिपादितं यत् –

सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना ।।इति ।।

बालवृद्धातुराणां कृते च शास्त्रेषु पृथग्व्यवस्था दृश्यते । तद्यथा–

सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनम् ।
अपराह्णे न मध्याह्ने मध्याह्ने न तु सङ्गवे ।।
भुञ्जीत सङ्गवे चेत् स्यान्न पूर्वं भुजिमाचरेत् ।।इति ।।

यदि कश्चन समर्थः सन् आतुर इव चन्द्रसूर्ययोर्ग्रहणे भुंक्ते तस्य कृते प्राजापत्यव्रतं प्रायश्चित्तरूपेण विहितं वर्त्तते । स यदि ग्रहणातिरिक्तकालेऽपि यदा कदाचित् तस्मिन्नेव दिने भुंक्ते तर्हि त्रिरात्रेण शुध्यतीति कात्यायनवचनमुत्थाप्य माधवाचार्येण प्रतिपादितम् । तद्यथा–

चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति ।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यति ।। इति ।।

यदि चन्द्रः ग्रस्तः सन्नेवोदेति , तर्हि तस्मिन्नेव दिने न भोक्तव्यम् । यदि च ग्रस्तः सन्नस्तमेति , तर्हि परदिने उदये स्नात्वा शुद्धो भूत्वा भुञ्जीत । प्रसङ्गेऽस्मिन् वृद्धवसिष्ठभृग्वोर्वचनमुत्थाप्य माधवाचार्येण कालमाधवे प्रतिपादितं यत् -

ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् ।
ग्रस्तावेवास्तमानन्तु रवीन्दू प्राप्नुतो यदि ।
परेद्युरुदये स्नात्वा शुद्धोऽभ्यवहरेन्नरः ।। इति ।।

चन्द्रसूर्ययोर्ग्रस्तास्तग्रहणे सम्पूर्णमहोरात्रमुपवासेन स्थित्वा तत्परदिने मुक्तिं दृष्ट्वा भुञ्जीतेति विष्णुधर्मोत्तरपुराणे यदुक्तं तत्र दर्शनशब्देन शास्त्रीयज्ञानमेवापेक्षितम् ।यतो हि रोहोर्विमुक्तिं विज्ञाय इत्यादि वृद्धगौतमवचनानुसारेणात्र ज्ञानपदस्य प्रयोगात् दृष्ट्वा इत्यत्र ज्ञात्वेति अर्थः कर्त्तव्यः । अन्यथा मेघाच्छादनादिना चाक्षुषज्ञानाऽसम्भवात् अन्धादीनां वा शास्त्रीयज्ञानस्याग्रहणात् तत्र स्नानमेव न प्राप्नुयात्। अतः ग्रस्तास्तग्रहणादिषु चन्द्रसूर्ययोः राहोर्विमुक्तिं विज्ञाय स्नात्वा भुञ्जीतेति तात्पर्यम् । प्रसङ्गेऽस्मिन् वृद्धगौतमवचनं यथा-

चन्द्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः ।
राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनम् ।। इति ।।

यः कश्चित् पापक्षयकामोऽपि ग्रहणदिनमुपवसेत् । तेन तस्य पापानि क्षीयन्ते । परन्तु ग्रस्तास्तग्रहणं विहाय पुत्रवतो नास्त्युपवासः । प्रसङ्गेऽस्मिन् दक्षनारदयोर्वचनोत्थापनपूर्वकं माधवाचार्येण सम्यक्तया कालमाधवे प्रतिपादितं

यत् -

अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
अहोरात्रोषितः स्नातः सर्वपापैः प्रमुच्यते ।।

परन्तु संक्रान्त्यामुपवासश्च कृष्णैकादशीवासरे ।
चन्द्रसूर्यग्रहे चैव न कुर्यात् पुत्रवान् गृही ।। इति ।।

एवं प्रकारेण ग्रहणनिर्णयः सम्पन्नः ।

स्वानुशीलनप्रश्नाः

१.सूर्यग्रहणात् कियत्कालात्पूर्वं भुञ्जीत ?

-----------------

२. चन्द्रग्रहणात् कियत्कालात्पूर्वं भुञ्जीत ?

-----------------

३. बालवृद्धातुराणां कृते का व्यवस्था ?

-----------------

४. ग्रस्तोदये ग्रस्तास्ते च को विशेषः ?

-----------------

## सारांशः

अस्मिन् खण्डे चन्द्रसूर्ययोर्ग्रहणं निरूपितम् । तत्र ग्रहणस्य किं स्वरूपं ,तत् कदा भवति , ग्रहणे स्नादानादिव्यवस्था कीदृशी ,कस्मिन् ग्रहणे कियत्कालात् प्राग् भुञ्जीत , इत्यादिकं सर्वमत्र विचारितम् । पुनश्च ग्रहणे श्राद्धव्यवस्था कीदृश्यस्ति , बहुकालं यावदुपवासेन स्थातुमसमर्थानां बालवृद्धातुराणां कृते का व्यवस्था ,कस्तावत् चूडामणियोगः इत्यादिविषये विचारं कृत्वा, पुत्रवन्तं गृहस्थं विहायाऽन्येषां पापक्षयकामिनां कृते ग्रहणे उपवासव्यवस्थापि विहिता । एवं प्रकारेण ग्रहणविचारः सम्पन्नः । एतावता माधवाचार्यप्रणीतः कालमाधवग्रन्थोऽपि सम्पूर्णः ।

## पारिभाषिकशब्दाः

| | |
|---|---|
| अग्निष्टोमः – | प्रकृतिभूतः सोमयागः |
| अनेहा – | कालः |
| अश्वमेधः– | सोमयागविशेषः |
| आमश्राद्धम् – | आमन्नेन क्रियमाणं श्राद्धम् |
| उपरागः – | ग्रहणम् |
| क्रतुः– | सोमयागः |
| गजच्छाया – | योगविशेषः |
| गोमेधः – | सोमयागविशेषः |
| ग्रहः – | ग्रहणम् |
| चूडामणिः – | योगविशेषः |
| प्राजापत्यः – | प्रायश्चित्तविशेषः |
| यामः – | प्रहरः |
| वाजिमखः– | अश्वमेधयागः |
| वापी– | दीर्घिका |
| व्यतीपातः – | योगविशेषः |
| शारदः – | अपराह्णः |
| सङ्गवः – | पूर्वाह्णः |
| सारसं – | पुष्करिणी |
| सौत्रामणिः– | यागविशेषो यत्र सुरा गृह्यते |

## आदर्शप्रश्नाः

निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः )

१) ग्रहणस्य स्वरूपं निर्दिश्य तत्र भोजननिषेधव्यवस्थां प्रतिपादयत ।
२) ग्रहणं कदा भवतीति प्रतिपाद्य तत्र श्राद्धव्यवस्थां प्रदर्शयत ।
३) ग्रहणे स्नानदानादिव्यवस्थां प्रदर्श्य बालवृद्धातुराणां भोजनव्यवस्थां प्रतिपादयत ।

विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः )

१) ग्रहणस्य स्वरूपं कालञ्च यथाग्रन्थं प्रदर्शयत ।
२) ग्रहणे स्नानदानहोमादिव्यवस्थां यथाग्रन्थं निरूपयत ।
३) ग्रहणे भोजननिषेधव्यवस्थां प्रतिपादयत।
४) ग्रस्तोदये ग्रस्तास्ते च विशेषव्यवस्थां विचारयत ।
५) ग्रहणे श्राद्धव्यवस्थां प्रदर्श्य बालवृद्धातुराणां भोजनव्यवस्थां प्रपिादयत ।
६) रात्रौ सूर्यग्रहणे दिवसे च चन्द्रग्रहणे भोजनव्यवस्थां विवेचयत ।

लघुप्रश्नाः (प्रत्येकं ५ अङ्काः )

१) ग्रहणकालं निर्दिशत ।
२) का महानद्यः यथाग्रन्थं प्रदर्शयत ।
३) चूडामणियोगस्य स्वरूपं विचारयत ।
४) ग्रहणे स्नानविधिं प्रदर्शयत ।
५) ग्रहणे दानविधिं प्रतिपादयत ।
६) ग्रहणे होमदेवार्चनादिकालं प्रदर्शयत ।
७) ग्रहणे गङ्गादिपुण्यतोयाऽलाभे विकल्पं निर्दिशत।
८) ग्रस्तास्तग्रहणे विशेषं विचारयत ।
९) ग्रहणे कस्मिन् मासे कुत्र स्नायात् तद्विचारयत ।

एकाङ्कप्रश्नाः (प्रत्येकं१अङ्कः )

१) सूर्यग्रहणं कदा भवति ?
२) चन्द्रग्रहणं कदा भवति ?
३) ग्रहणे कस्य कृते उष्णोदकस्नानं विहितम् ?
४) सोमवारे चन्द्रग्रहणे को योगः ?
५) रविवारे सूर्यग्रहणे को योगः ?
६) ग्रहणे श्राद्धं केन द्रव्येण कार्यम् ?
७) ग्रहणे रात्रौ श्राद्धं भवति न वा ?
८) ग्रहणे कदा दानं प्रशस्तम् ?
९) ग्रहणे कदा स्नानं प्रशस्तम् ?
१०) ग्रहणे कदा होमः प्रशस्तः ?
११) रात्रौ सूर्यग्रहणं पालनीयं न वा ?

१२) दिवसे चन्द्रग्रहणं पाल्यते न वा ?
१३) चन्द्रग्रहणात् कियत्कालात्प्राग् भुञ्जीत ?
१४) सूर्यग्रहणात् कियत्कालात्प्राग् भुञ्जीत ?
१५) ग्रहणे सूर्यं चन्द्रश्च को गृह्णाति ?
१६) मेघाच्छन्ने सति चन्द्रसूर्ययोः मुक्त्यदर्शने कथं स्नायात् ?
१७) पापक्षयकामः ग्रहणे किं कुर्यात् ?
१८) ग्रहणे पुत्रवतो गृहस्थस्योपवासोऽस्ति न वा ?
१९) सायाह्ने सूर्यग्रहणे सति बालवृद्धादयः कदा भुञ्जीरन् ?
२०) अपराह्णे सूर्यग्रहणे सति बालवृद्धादयः कदा भुञ्जीरन् ?

## एकाङ्कप्रश्नानामुत्तराणि

| | |
|---|---|
| १) अमाप्रतिपत्सन्धौ | २) पूर्णिमाप्रतिपत्सन्धौ |
| ३) आतुरस्य | ४) चूडामणिः |
| ५) चूडामणिः | ६) आमान्नेन |
| ७) भवति | ८) मुच्यमाने |
| ९) ग्रस्यमाने मुक्ते च | १०) सम्पूर्णे ग्रस्ते |
| ११) न | १२) न |
| १३) प्रहरत्रयात् प्राक् | १४) प्रहरचतुष्टयात्प्राक् |
| १५) राहुः | १६) ज्योतिःशास्त्राद् मुक्तिं विज्ञाय |
| १७) उपवासम् | १८) नास्ति |
| १९) मध्याह्ने | २०) पूर्वाह्णे |

## सप्तमपत्रं समाप्तम्

**************